(1) किमत्र दस्रा कृणुथः किमासाथे जनो यः कश्चिदहविर्महीयते। अति क्रमिष्टं जरतं पणेरसुं ज्योतिर्विप्राय कृणुतं वचस्यवे (१ $\frac{१८२}{३}$) = What are you doing here, Oh performers of miraculous deeds (दस्रा = दस्रौ)? Why sit here? A worthless (यः कश्चित्) man, one that never makes offerings to you (अहविः), is being hononr-ed by you (महीयते). Pass him over (अतिक्रमिष्टं). Olden (जुरतं) the miser's life, create light for one that praises (वचस्यवे=विप्राय). वचस् + युः = वचस्युः = one that gives praise. विप् + रः = विप्रः = one that praises.

(2) न स देवा अतिक्रमे तं मर्तासो न पश्यथ (१ $\frac{१०५}{१६}$) = That path, Oh gods, can never be crossed (अतिक्रमे) by mortals. Oh mor-tals, you do not see it. अतिक्रमे present infinitive.

(3) अति विश्वाः परिष्ठाः स्तेन इव व्रजमक्रमुः (१० ९७/१०) = यथा स्तेनः व्रजं गोव्रजम् अतिक्रामति एवम् ओषधयः विश्वाः सर्वाः परिष्ठाः प्रतिरोधकान् रोगान् अति अक्रमुः अतिक्रामन्ति. अतिक्रम् here means to conquer. अतिक्रम् to get across or beyond i. e. to conquer. परिष्ठाः = परितः तिष्ठन्ति ताः. A cattle-lifter conquers a herd of cows that is strongly guarded. Diseases may be strongly entrenched in the human body. Medicinal herbs do overcome these.

क्रामेय and अक्रमीत् are two other forms of क्रम् found used with अति.

अति + सृज्

सृज् appears as असृग्रन्, असृक्षत and सृजानं. अ + सृज् + र + अन् = असृग्रन्. अ+सृज्+स+त = असृक्षत.

(1) एते वामभ्यसृक्षत तिरः पवित्रमाशवः। युवायवोऽति रोमाण्यव्यया सोमासो अत्यव्यया (१ १३५/६) = हे इन्द्राग्नी एते युवायवः युवां कामयमानाः आशवः अश्वाः अश्ववत् शीघ्रगतयः सोमाः अव्यया अव्या अव्यानि अवीनां रोमाणि अविरोम्णां कृतं पवित्रम् अति तिरः कलशान् अभि असृक्षत धावन्ति.

(2) देवेभ्यस्त्वा मदाय कं सृजानमति मेष्यः। सं गोभिर्वासयामसि (९ ८/५) = हे सोम मेष्यः मेषीणां रोमाणि अति सृजानं धावन्तं त्वां देवेभ्यः मदाय कं देवान् मादयितुं गोभिः गोक्षीरेण वासयामः आच्छादयामः.

(3) एते असृग्रन्नाशवोऽति ह्वरांसि॰सोमाः (९ ६३/४) आशवः = अश्वाः = अश्ववत् शीघ्रगतवः. ह्वरांसि = रोमाणि = पवित्रम्.

अति + इ.

(1) ईयिवांसमति स्रिधः शश्वतीरति सश्चतः। अन्वीमविन्दन् ० अप्सु सिंहमिव श्रितम् (३ ९/४) = शश्वतीः सश्चतः स्रिधः अति ईयिवांसम् ईम् एतम् अग्निम् अप्सु अनु मध्ये सिंहम् इव श्रितं देवाः अविन्दन्=The gods obtained Agni lying hidden like a lion in water, Agni who passes across i. e. conquers all (शश्वतीः) opposing (सश्चतः) foes (स्रिधः).

(2) अरममाणो अत्येति गा अभि (९ ७२/३) = Sôma, after passing

through (अति) the strainer, goes (एति) towards (अभि) the cows (गाः) without halting (अ + रममाणः) on the way. रम् = to stop. अति = पवित्रम् अति. गाः = cows i. e. their milk with which Sôma is mixed.

(3) अवर्षीर्वर्षमुदु षू गृभायाकर्धन्वान्यत्येतवा उ (५६३) = हे पर्जन्य त्वं वर्षम् अवर्षीः । एतं वर्षम् उ सु उत् गृभाय गृहाण । एतं वर्षं धन्वानि अति एतवे एतुम् उ अकर् कुरु = Oh god of rain, thou hast rained down rain; do take it up and make it flow across sandy deserts.

The two उs emphasises गृभाय and अकर्.

इहि, इतां यन्ति and इयाम् are other forms of इ used with अति.

अति + या

(1) ताँ अति येषं रथेन (२३६) = Riding in a chariot (रथेन) I wish to go (येषं) beyond (अति) those traps (तान् पाशान्) laid for catching foes. येषं potential 1st per. sing. of या.

(2) एष वसूनि पिब्दना परुषा ययिवाँ अति । अव शादेषु गच्छति (९२५) = एष सोमः परुषा परुषाणि अति ययिवान् शादेषु अव गच्छति. परुषा = परुषाणि = the variegated hair of the ram, the strainer. I do not understand वसूनि, पिब्दना and शादेषु. शादेषु = कलशेषु ? It occurs here only. Does वसूनि mean the hair that covers (वस् to cover) the body of the ram ? पिब्दना occurs again in विश्वा सु नो विथुरा पिब्दना वसो अमित्रान् सुषहान् कृधि (६४६) = हे वसो वसुमन् इन्द्र नः अस्माकं विश्वा विश्वानि पिब्दना पिब्दनानि सु सुखेन विथुरा विथुराणि अमित्रान् च सुषहान् कृधि कुरु. पिब्दनानि = अमित्रान् = foes ? विथुरा = devoid of strength. सुषहान् = easily subdued. So in the present Rk. परुषा most probably means the strainer made of the particoloured hair of the ram. पिब्दनानि वसूनि = riches belonging to the enemy. शादेषु अव मध्ये पिब्दनानि वसूनि गच्छति = while falling into the jar, he goes to enemies' riches i. e. secures them.

याति, याथः, याहि and यातं one other forms of या used with अति.

अति with other verbs.

(1) यदत्त्युपजिव्हिका यद्वम्रो अति सर्पति। सर्वं तदस्तु ते घृतम् (८ १०२/२१) = हे अग्ने यत् उपजिव्हिका अत्ति यच्च वम्रः अतिसर्पति सर्वं तत् तव घृतं खाद्यम् अस्तु. Yāska understands ants by उपजिव्हिका and वम्रः- अहिर्न जूर्णामतिसर्पति त्वचम् (९ ८६/४४) means:—Sôma casts off his skin as a serpent its old worn-out slough. Can उपजिव्हिका mean a female elephant that has her tongue hidden by the trunk? Elephants devour trees. वम्र may be some big tree that drops its bark. Agni devours all sorts of things–trees, bark and all. The Ṛk. is obscure on occount of these two words.

(2) यः परस्याः परावतस्तिरो धन्वाति रोचते [१० १८७/२] = Who (Agni) from (his station in) the highest (परस्याः) heaven (परावतः) shines through (अति = तिरः) the desert i. e. the region between heaven and earth.

(3) तं त्वा यमो अचिकेच्चित्रभानो दशान्तरुष्यादतिरोचमानम् (१० ५१/२३) = हे चित्रभानो अग्ने (ओषधिषु अप्सु च बहुधा प्रविष्टं) तं त्वां यमः अचिकेत् ज्ञातवान्। कीदृशम्। दश अन्तर् उष्यात् दश यानि तव निवासस्थानानि तेभ्यः अतिरोचमानम्. There may have been a tradition that Agni exists in ten places, such as heaven with its three divisions, the sky, water, wood, herbs and the two fire-producing sticks; but what is the 10th? उष्यं may mean an abode from वस् to dwell. अन्तरुष्यं = a hidden dwelling-place. दशानाम् अन्तरुष्याणां समाहारः दशान्तरुष्यम्. Or, was there a tradition that Agni lay enveloped in ten thick covers in order to hide himself from the gods who had mal-treated his two elder brothers? But in spite of these smothering covers Agni could not help shining or blazing through. A heap of fuel cannot smother fire in. Agni must fone his way out.

अति may mean through or it may intensify रोचमानं.

(4) कनिक्रन्ति पवित्र आ। यदक्षारति देवयुः (९ ४५/३) = यत् यदा देवयुः देवान् कामयमानः सोमः पवित्रम् अति अक्षार क्षरति तदा स पवित्रे आ मध्ये कनिक्रन्ति क्रन्दति.

कनिक्रन्ति frequentative of **क्रन्द् कनिक्रन्द् + ति = कनिक्रन्ति. अति** governs **पवित्र** understood. **क्षर्** to flow.

(5) **तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युमूहथुः पतङ्गैः** (१ ११६/४) = You, Oh Näsatyas, conveyed Bhujyu by means of birds that flew (**व्रजद्भिः**) beyond i. e. more than 3 nights and 3 days.

(6) **मही न धारात्यन्धो अर्षति** (९ ८६/४) = **अन्धः सोमः मही महत्या धारा धारया पवित्रम् अति न सद्य एव अर्षति** = Sôma rushes in a big stream through the strainer towards the jar all at once.

(7) **रात्र्याश्चिदन्धो अति देव पश्यसि** (१ ९४/७) = Oh god Agni, thou seest through or beyond (**अति**) even (**चित्**) the darkness (**अन्धः**) of night.

अति is also fonnd used with **वेति** (५ ४४/७), **स्कन्दति** (५ ५२/३), **स्रसेम** (६ ११/६), **धावति** (९ ३/३), **अपाविषुः** (९ ६०/२), **असिष्यदत्** (९ ६०/३), **अक्षरन्** (९ ६३/१५) and **द्रव** (१० २४/१०).

अति beyond the pale of

(1) **घृणा तपन्तमति सूर्यं परः शकुना इव पप्तिम** (९ १०७/२०) = **हे सोम तव पानेन वयं घृणा उष्मणा तपन्तं सूर्यम् अति परः पप्तिम। यथा शकुनाः सूर्यम् अति पतन्ति तथा. अति = परः** = beyond.

(2) **नि हीयतामतियाजस्य यष्टा** (६ ५२/१) = **यः यज्ञं कर्तुं शास्त्रेण प्रतिषिद्धः सः अतियाजः। यः ऋत्विक् एतादृशं याजयति स यष्टा शास्त्रनिषिद्धेन कर्मणा निहीयतां नीचैः गच्छतु.** A priest that performs the sacrifice of one that is beyond the Āryan pale must sink in rank and be degraded.

(3) **पुरुष एवेदं सर्वं यद् भूतं यच्च भाव्यम्। उतामृतत्वस्येशानो यदन्नेनातिरोहति** (१० ९०/२) = **यत् भूतं यच्च भाव्यं भविष्यमाणं तत् इदं सर्वं पुरुषः एव। उत अपि च पुरुषः अमृतत्वस्य ईशानः स्वयम् अमृतः परेभ्यश्च अमृतत्वस्य दाता तेन अमृतत्वरूपेण अन्नेन यत् इदम् अतिरोहति तदपि सर्वं पुरुष एव.** The great one is not only what has been and what is but also what is to be. The whole changing universe is he and yet being immortal and therefore beyond change he is greater than this

changing universe. He is it or in it and beyond it too because he is changeless.

(4) अविन्दन्ते अतिहितं यदासीद्यज्ञस्य धाम परमं गुहा यत् (१०$\frac{१८१}{२}$) = ते वसिष्ठाः यज्ञस्य परमं धाम यत् अतिहितम् आसीत् यत् गुहा गूढम् आसीत् तत् अविन्दन्. अतिहितं=placed (हितं) beyond (अति) this world. Sacrifice had fled and lay hidden (गुहा) in a region far away from the earth. It was a great to-do to find his hiding-place.

अति + इ etc. to exceed, to surpass.

(1) प्र वीर्येण देवताति चेकिते विश्वस्मा उग्रः कर्मणे पुरोहितः (१$\frac{५५}{३}$) = विश्वस्मै सर्वस्मै कर्मणे पुरोहितः पुरः स्थापितः उग्रः इन्द्रः वीर्येण देवता देवान् प्र अति चेकिते. चेकिते = is known. देवता अति = above all gods.

(2) अतीदं विश्वं भुवनं ववक्षिथ (१$\frac{१०२}{८}$) = Thou art said to surpass all the universe.

(3) वयमग्ने अर्वता वा सुवीर्यं ब्रह्मणा वा चितयेमा जनाँ अति। अस्माकं द्युम्नमधि पञ्च कृष्टिषूच्चा स्वर्ण शुशुचीत दुष्टरम् (२$\frac{२}{१०}$) = हे अग्ने वयम् अर्वता वा ब्रह्मणा वा (पञ्च) जनान् अति सुवीर्यं धनं चितयेम । अस्माकं द्युम्नं धनं पञ्चसु कृष्टिषु पञ्चजनेषु अधि मध्ये स्वर् सूर्यः इव शुशुचीत प्रज्वलेत् । दुष्टरं च स्यात्. We will kindle our wealth better than that of others, so that it would outshine all. ब्रह्मणा = अर्वता= by means of (our) wealth.

(4) बृहस्पते अति यदर्यो अर्हात् द्युमद्विभाति क्रतुमज्जनेषु । यद्दीदयच्छवस ऋतप्रजात तदस्मासु द्रविणं धेहि चित्रम् (२$\frac{२३}{१५}$)=हे बृहस्पते यत् अर्यः अति अर्हात् यत् द्युमत् क्रतुमत् सत् (पञ्च) जनेषु विभाति यत् शवसा दीदयत् प्रकाशते तत् द्रविणं चित्रम् अस्मासु धेहि. ऋतप्रजात = born of truth (Sāyaṇa). But the word most probably was originally ऋतप्रजातं and qualified यत्. ऋतेन युक्तं प्रकृष्टं जातं यस्मिन् = which contained riches upon riches. Even if ऋतप्रजात be the true reading, it would mean the same. Bṛ. is posseased of wealth upon wealth. द्युमत् = क्रतुमत् = possessed of, packed

with, riches. द्यु, क्रतु, ऋत, जात, द्रविण and चित्र all means wealth. अति अर्हात् = would outshine or be richer (than that) of the enemy (अर्यः). विभाति and दीद्यत् lead me to the conclusion that अर्हात् has the sense of these two words अर्यः = अरेः. The 5 Āryan tribes are the enemies. It is the ambition of the poet that his wealth should outshine the wealth of all those tribes.

(5) येन वयं चितयेमात्यन्यान् तं वाजं चित्रमृभवो ददा नः (४ ३६/१) = हे ऋभवः येन वाजेन चित्रेण वयम् अन्यान् अति चितयेम तं वाजं चित्रं नः अस्मभ्यं दद दत्त. अति + चित् = to outshine. चित्रं = वाजं = wealth.

(6) प्र सद्यो अग्ने अत्येष्यन्यानाविर्यस्मै चारुतमो बभूथ (५ १/१) = हे अग्ने चारुतमः त्वं यस्मै आविर बभूथ भवसि स सद्यः अन्यान् प्र अत्येति. अत्येषि is wrong. Sāyaṇa faithfully interprets अत्येषि; he says:-त्वम् अन्यान् अग्नीन् अत्येषि and leaves यस्मै etc. without any conclusion. प्र - प्रकर्षेण = very much.

(7) ये राधसा श्रवसा चात्यन्यान् सुवीर्येभिश्चाभि सन्ति जनान् (६ १/५०) = ये अन्यान् जनान् राधसा श्रवसा च अति सन्ति। सुवीर्यैश्च अन्यान् जनान् अभि सन्ति. राधस् and श्रवस् mean riches. सुवीर्यं = सुवीराणां सुपुत्राणां समूहः = quite a troop of valiant sons. अतिसन्ति=surpass. अभिसन्ति = defeat.

(8) जातेन जातमति स प्र सर्सृते यंयं युजं कृणुते ब्रह्मणस्पतिः (२ २५/१) = ब्रह्मणस्पतिः यं यं युजं सखायं कृणुते करोति सः सः जातेन शौर्येण जातम् इतरेषां शौर्यम अति प्र सर्सृते अतिशेते. सर्सृते from सृ reduplicated with ते of 3rd per. sing. present tense. प्र = अति.

(9) स मज्मना जनिम मानुषाणाममर्त्येन नाम्नाति प्र सर्स्रे (६ १८/७) = सः इन्द्रः मज्मना शक्त्या अमर्त्येन नाम्ना वीर्येण मानुषाणां जनिमानि वीर्याणि अति प्र सर्स्रे अतिशेते. सर्स्रे perfect 3rd per. sing. of सृ. प्र as above.

(10) यस्य दिवमति मन्हा पृथिव्याः पुरुमायस्य रिरिचे महित्वम् (६ २१/२) = यस्य पुरुमायस्य बहुशक्तेः इन्द्रस्य महित्वं महत्त्वं मन्हा महत्त्वेन दिवम् अति रिरिचे पृथिव्याश्च रिरिचे. दिवं is accusative on account of अति- पृथिव्याः is ablative or पृथिव्याः महित्वम अति रिरिचे may be the construction. महित्वं मन्हा is tataulogical. पुरुमायस्य=पुरवः बह्व्यः मायाः यस्य. माया = miracle-working power.

(11) सेदग्निरग्नीँरत्यस्त्यन्यान् (७ १/१४) = सः इत् एव अग्निः अन्यान् अग्नीन् अति अस्ति अतिशेते.

(12) एष एतानि चकारेन्द्रो विश्वा योऽति शृण्वे । वाजदावा मघोन्माम् (८ $\frac{२}{३४}$) = 'यः वाजदावा मघोनाम् अति शृण्वे श्रूयते स एष इन्द्रः एतानि विश्वा चकार. वाजान् ददाति असौ वाजादावा. मघोनां = मघवतः । अथवा मघोनां मध्ये. विश्वा=विश्वानि वीर्याणि. Indra is known as surpassing all liberal donors.

(13) मघैर्मघोनो अति शूर दाशसि (८ $\frac{२४}{२}$) = हे शूर इन्द्र मघोनः धनवतः मघैः धनैः अति दाशसि =Thou givest, Oh brave Indra, beyond rich donors by (giving) riches (मघैः) दाश् = to give.

(14) अयुजो असमो नृभिरेकः कृष्टीरयास्यः । पूर्वीरति प्र वावृधे विश्वा जातान्योजसा (८ $\frac{६२}{२}$) = अयुजः नृभिः असमः एकः अयास्यः पूर्वीः कृष्टीः विश्वा विश्वानि च ओजसा अति प्र वावृधे. अयुजः = not requiring (the help of) friends (युजः). नृभिः असमः = not resembling other brave persons, having nothing in common with them. The Maruts are अयासः and Indra is अयास्यः i. e. the leader of the Maruts. I do not know why the Maruts are called अयासः. Perhaps अ + याः = one that cannot be attacked अयास्यः = मरुत्वान्. By कृष्टीः are meant the 5 Āryan tribes (पञ्चजनाः). Indra subdued them and was thence called कृष्टिहा and कृष्टिप्राः. पूर्वीः = all. जातानि = बलवन्ति = powerful beings. प्र = अति. अतिवावृधे = outgrew (them), was more than a match for them.

(15) प्र सृत्वरीणामति सिन्धुरोजसा (१० $\frac{७५}{१}$) = सिन्धुः ओजसा वेगेन सृत्वरीणां वहन्तीनां नदीनाम् ओजः वेगम् प्र अति वर्तते =The Indus by far surpasses the speed of all flowers, all flowing rivers–by its speed.

(16) स्तेगो न क्षामत्येति पृथ्वीम् (१० $\frac{३१}{८}$) = स्तेगः यथा पृथ्वीं क्षाम् अत्येति न तथा (यः द्यावापृथिव्यौ बिभर्ति सः ते द्यावापृथिव्यौ अत्येति). In the preceding Ṛk. we are told of a being greater than heaven and earth which it sustains. That being exceeds the broad earth like स्तेग; but who this स्तेग is I do not know. Sāyaṇa renders स्तेग by आदित्य; but the being here mentioned is greater than आदित्य.

(17) स भूमिं विश्वतो वृत्वात्यतिष्ठद्दशाङ्गुलम् (१० $\frac{९०}{१}$) = सः पुरुषः भूमिं विश्वतः वृत्वा तां दशाङ्गुलम् अत्यतिष्ठत्.

(18) स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः (१० $\frac{९०}{२}$) = सः जातः पुरुषः भूमिं पश्चात् पुरश्च अत्यरिच्यत.

(18) त्वे सु पुत्र शवसोऽवृत्रन् कामकातयः । न त्वामिन्द्राति रिच्यते (८ ९२/१४) = हे शवसः पुत्र कामकातयः त्वे त्वया सु अवृत्रन्। किंतु तेषां न कोऽपि त्वाम् अति रिच्यते. **कामकातयः** occurs here only. **कामकाति** was perhaps the name of a hostile tribe. They played the part of Vrtra (अवृत्रन्) towards Indra. Yet none could surpass him.

Cf. स भूमिं विश्वतो वृत्वात्यातिष्ठद्दशाङ्गुलम् (१० ९०/१) and
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः (१० ९०/५).

अतिमन् and अतिकृ to disregard, to dishonour.

(1) किं नो भ्रातरगस्त्य सखा सन्नति मन्यसे (१ १७०/३) = हे भ्रातर् अगस्त्य अस्माकं सखा सन् अस्मान् किमर्थम् अतिमन्यसे=Why dost thou disregaid us (when making offerings)?

(2) अति वा यो मरुतो मन्यते नो ब्रह्म वा यः क्रियमाणं निनित्सात् । तपूंषि तस्मै वृजिनानि सन्तु (६ ५२/२) = हे मरुतः यः अस्मान् अतिमन्यते यो वा अस्माभिः क्रियमाणं ब्रह्म स्तुतिं निनित्सात् निन्देत् तस्मै वृजिनानि निर्घृणानि तपूंषि सन्तु. तपूंषि = fiery missiles or weapons. **वृजितानि**=vile.

(3) नहि त्वा पूषन्नतिमन्य आघृणे (१ १३८/४). **आघृणे** = Oh blazing one! **अतिमन्ये** = I disrespect.

(4) सुवितस्य मनामहेऽति सेतुं दुराव्यम् । साव्हांसो दस्युमव्रतम् (९ ४१/२)=साव्हांसः अभिभवितारः वयं सुवितस्य कल्याणस्य सेतुं बन्धकं दुराव्यं हविर्भिः देवान् यः न प्रीणाति तम् अव्रतं दस्युम् अतिमनामहे = Intent on crushing him (**साव्हांसः**) we treat with disdain (**अतिमनामहे**) that villain (**दस्युं**) that comes in the way (**सेतुं**) of our happiness (**सुवितस्य**), that never pleases the gods (**दुराव्यं**) and never observes Āryan rites of religion. **दुराव्यं** or **दुष्प्राव्यं** is opposed to **सुप्राव्यं**. दुः + आ + वी. **वी** to please wlth offerings.

(5) न देवानामति व्रतं शतात्मा चन जीवति (१० ३३/९) = देवानां व्रतम् अति मन्य शतात्मा दीर्घायुः अपि न जीवति = One that disregards the rites of the gods shall not live, though endowed with a hundred souls or vitalities. **मन्य** is understood here.

(6) किं स्विन्नो राजा जगृहे कदस्याति व्रतं चकृमा को वि वेद (१० १२/५)

= राजा अग्निः किं स्वित् किमर्थं खलु अस्मान् जगृहे जग्राह। अस्य कत् किं व्रतं वयम् अतिचक्रम। कः वि वेद = Why has king Agni seized us in his grip, what rite of his have we disregarded, who indeed knows? अतिक्र and अतिमन् mean the same thing.

(7) नि षू नमातिमतिं कयस्य चित्तेजिष्ठाभिररणिभिर्नोतिभिरुग्राभिरुग्रोतिभिः (१ १२९/५) = हे उग्र इन्द्र कयस्य एतन्नाम्नः कस्यचित् शत्रोः अतिमतिं गर्वं देवविषयम् अनादरं निनम नीचैः कुरु सु सुतराम्। केन साधनेन। उग्राभिः ऊतिभिः। कीदृश्यः ऊतयः। तेजिष्ठाः अतितीक्ष्णाः अरणयः अग्न्युत्पादककाष्ठानि तानि इव. कय=a certain demon. तेजिष्ठ=sharpest. ऊति=that which protects by warding off enemies; so a missile, a weapon.

अति denotes defeat or destruction in.

(1) यो जनान् महिषाँ इवातितस्थौ पवीरवान्। उतापवीरवान् युधा (१० ६०/३) = यः इन्द्रः युधा पवीरवान् तथा अ-पवीरवान् जनान् महिषान् इव अतितस्थौ. Certain people were called पवीरव, perhaps because they roared (रव) like thunder (पवि). Indra subdued all whether they were stentorian or otherwise in combat, as he would subdue a troop of wild animals.

(2) प्र नू स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत (१ ६४/१३) = हे मरुतः यं यूयम् आवत अरक्षत रक्षथ सः मर्तः वः युष्माकम् ऊत्या शवसा (पञ्च) जनान् प्र नू अति तस्थौ तिष्ठति पराभवति.

अति intensive.

(1) अति त्री सोम रोचना रोहन्न भ्राजसे दिवम् (९ १७/५) = हे सोम त्री त्रीणि रोचना रोचनानि दिवं च रोहन् अति भ्राजसे. The 3 Rōchanas were the 3 parts of द्यौ, stationed one above another. They are not different from दिवं. न is expletive.

(2) प्र सोमो अति धारया पवमानो आसिष्यदत् (९ ३०/४) = पवमानः सोमः धारया प्र अति आसिष्यदत्. स्यन्द् = to run. प्र and अति intensify the meaning of स्यन्द्.

(3) प्र पृथिव्या रिरिचाथे दिवश्च । प्र सिन्धुभ्यः प्र गिरिभ्यो महित्वा प्रेन्द्राग्नी विश्वा भुवनात्यन्या (१ $\frac{१०९}{६}$) = हे इन्द्राग्नी पृथिव्याः दिवश्च सिन्धुभ्यः गिरिभ्यश्च महित्वा महत्वेन युवां प्ररिरिचाथे । अन्यानि विश्वानि भुवनानि च अति रिरिचाथे. भुवनानि is in the accusative on account of अति. प्ररिच् to exceed, to be greater than. प्र and अति are intensive.

(4) दूरे चित्सन्तळिदिवाति रोचसे (१ $\frac{९४}{७}$) = हे अग्ने दूरे सन् चित् अपि त्वं तडित् विद्युत् इव अति रोचसे.

(5) यो मर्त्यः शिशीते अत्यक्तुभिर्मा नः स रिपुरीशत (१ $\frac{३६}{१६}$) = यः मर्त्यः रिपुः अक्तुभिः ज्वालाभिः शस्त्रम् अति शिशीते तीक्ष्णीकरोति सः अस्माकं मा ईशत ईष्टाम्. शी to sharpen. अक्तु means night, a current, light, perhaps a flame as possibly here.

(6) अमी च ये मघवानो वयं च मिहं न सूरो अति निष्टतन्युः (१ $\frac{१४१}{१३}$) = हे अग्ने अमी ये मघवानः धनवन्तः ते शत्रून् निः निःशेषम् अति सामग्र्येण च ततन्युः प्रकिरेयुः । वयं च शत्रून् प्रकिरेम । यथा सूरः सूर्यः मिहं प्रकिरति तथा. तन् seems to mean to scatter, to disperse. The Sun disperses mist (मिहं); so shall we disperse foes. अति and निः intensify the stampede.

(7) अस्य भानवः । अत्यक्तुर्न सिन्धवोऽग्ने रेजन्ते अससन्तो अजराः (१ $\frac{१४३}{३}$) = अस्य अग्नेः अससन्तः कदापि न स्वपन्तः अजराः न कदापि जीर्णाः श्रान्ताः भानवः अति वेगेन रेजन्ते धावन्ति । यथा सिन्धवः सिन्धोः अक्तुः प्रवाहः अति वेगेन धावति तथा. सिन्धवः = सिन्धोः. सिन्धवः is genetive singular as सिन्धवि is locative singular. अक्तुः (from अञ्ज् to go) = a current. रेज् = to shake with fear; but here to rush.

(8) अध प्लायोगिरति दासदन्यानासङ्गो अग्ने दशभिः सहस्रैः (८ $\frac{१}{३३}$) = हे अग्ने अध अथ प्लयोगस्य पुत्रः आसङ्गः दशसहस्रैः योधैः अन्यान् योधान् अति दासत् पर्यभवत्. अति adds force to दासत्.

(9) त्वं द्यां च पृथिवीं चाति जभ्रिषे (९ $\frac{८६}{२९}$; ९ $\frac{१००}{९}$) = Thou bearest Oh Sôma, heaven and earth with perfect ease (अति) or far. जभ्रिषे = बिभर्षि.

(10) यस्ते अग्ने सुमतिं मर्तो अक्षत्॰ अति स प्र शृण्वे (१० $\frac{११}{७}$) = हे अग्ने यः मर्त्यः तव सुमतिम् अक्षत् अश्नोति स प्र अति शृण्वे श्रयते प्रख्यातो

भवति. सुमतिं = favour, अक्षत् = अश् + स + त्. प्र = अति = far and wide.

(11) न त्वावाँ इन्द्र कश्चन न जातो न जनिष्यतेऽति विश्वं ववक्षिथ (१ ८१/६) = हे इन्द्र त्वावान् त्वत्सदृशः न कश्चन अस्ति । नापि जातः नापि जनिष्यते । त्वं विश्वं ववक्षिथ वहसि. ववक्षिथ is 2nd per. sing. of वह् reduplicated + स. अति as above. Or from वच् to speak in which case अति विश्वं ववक्षिथ would mean, thou art spoken of as being beyond all.

(12) अतीदं विश्वं भुवनं ववक्षिथ (१ १०२/८). Vide 11.

(13) मा० परि वर्क्तमुत माति धक्तम् (१ १८३/४) = Oh As′wins, do not injure (वर्क्तं) us, nor burn us. अति = परि = outright. दह्+ तं = धक्तम्. वृज् + तं = वर्क्तम्.

(14) माति धग्भगो नः (२ ३१/२१) = भगः अस्मान् मा अति धक् दहतु.

(15) विश्वानि सान्त्यभ्यस्तु मन्हा । अति यो मन्द्रः (२ २८/१) = यः वरुणः मन्द्रः हर्षशीलः स्तुत्यो वा स मह्ना महत्त्वेन विश्वानि सान्ति सन्ति बलवान्ति वस्तूनि अति अभ्यस्तु अभिभवतु. अति=completely; or अत्यस्तु =अभ्यस्तु.

(16) स हि विश्वाति पार्थिवा रयिं दाशन्महित्वना । वन्वन्नवातो अस्तृतः (६ ११/१०) = सः अग्निः अस्तृतः अहिंसितः अवातः अहिंसितः महित्वना महत्वेन विश्वानि पार्थिवानि अति वन्वन् हिंसन् अस्मभ्यं रयिं धनं दाशत् ददातु. विश्वा पार्थिवा = all earthly foes. वन् = to injure. अवातः = न वातः. वात p. p. of वन्.

(17) दीर्घप्रयज्युमति यो वनुष्याति वयं जयेम पृतनासु दूढ्यः (७ ८२/१)= यः शत्रुः दीर्घप्रयज्युं दीर्घकालं यः यजति तं जनम् अति वनुष्यति हिनस्ति तं दूढ्यः दुर्धियं वयं पृतनासु संग्रामेषु जयेम. प्रयज्यु is an epithet of the Maruts 5 times, Indra twice and Agni once. So दीर्घं प्र प्रकृष्टं यजति ददाति असौ दीर्घप्रयज्युः = one that gives lasting (दीर्घ) and abundant (प्र) wealth. अति= disregarding. Who injures us, disregarding Indra or Varuṇa who gives us lasting and abundant wealth. दुः+धीः is opposed सु+धीः. सुधीः = one that makes offerings. दुर्धीः = one that does not. दुर + ध्यः (= दू + ढ्यः) is acc. pl. of दुः + धी.

(18) शतं दासाँ अति स्रजः (८ ५६/३). सृज् often means to give. अति = entirely. स्रजः seems a corruption of सृजः. स्रक् is a noun and occurs thrice in Ṛgveda.

(19) **प्रत्वक्षाणो अति विश्वा सहांस्यपारेण महता वृष्ण्येन** (१०$^{४४}_{१}$) = **अपारेण अन्तरहितेन महता वृष्ण्येन बलेन विश्वानि सहांसि बलानि अति प्र त्वक्षाणः नाशयन् इन्द्रः.** **त्वक्ष्** = to bear down, to destroy. **अति** = **प्र** = completely.

(20) **स विप्रश्चर्षणीनां शवसा मानुषाणाम् । अति क्षिप्रेव विध्यति** (४$^{६}_{८}$) = **स विप्रः अग्निः स्वेन शवसा बलेन मानुषाणां चर्षणीनां मनुष्याणां शवांसि क्षिप्रेण धनुषा इव अति विध्यति.** **मानुषाणां** ought to be **मानुषीणां** as it is an adjective of **चर्षणीनां** which word is feminine; or the two words may be in apposition. **क्षिप् + रं = क्षिप्रं** = that which throws arrows, a bow.

(21) **अर्चद्वृषा वृषभिः स्वेदुहव्यैर्मृगोनाश्नो अति यज्जुगुर्यात् । प्र मन्दयुर्मनां गूर्त होता भरते मर्यो मिथुना यजत्रः** (१$^{१७३}_{२}$) = **यत् यदा वृषा वृषबलः इन्द्रः मृगः कश्चित् वन्यपशुः व्याघ्रसिंहादिः स इव अश्नः बुभुक्षुः जुगुर्यात् भक्ष्यं स्वीकर्तुम् इच्छेत् तदा सः स्वेदुहव्यैः स्वेदूनि स्वादूनि हव्यानि तैः वृषभिः वृषबलैः सोमैः अर्चत् अर्च्यते । मन्दयुः मन्दयतीति मन्दः सोमः तं कामयमानः होता इन्द्रः मनां सोमरूपं हविः गूर्त स्वीकरोति तदा यजत्रः यजनीयः हविर्भिः तर्पणीयः इन्द्रः मर्यः शूरः मिथुनौ उषसं सूर्यं च प्रभरते ददाति.** **मन्दयुः** may qualify **वृषा.** Cf **वृषन्निन्द्र वृषपाणास इन्दव इमे सुताः० तुभ्यं० । ते त्वा मन्दन्तु** (१$^{१३९}_{६}$). **अश्न** is often used of Vṛtra that swallows waters. **गुर्** means both to accept and to offer. **मनां**=an offering. Sāyaṇa gives three alternative explanations but they are not acceptable to me. **अति** intensifies **जुगुर्यात्.**

(22) **अया धिया तुतुर्यामात्यंहः** (५$^{४५}_{११}$) = **अया धिया अनेन धनेन अंहः दारिद्र्यम् अति तुतुर्याम** = We hope to destroy poverty altogether (**अति**) by means of this wealth. **तुर्** elsewhere also means to destroy. Does it mean to cross here ?

(23) **तदृतं पृथिवि बृहच्छ्रव एष ऋषीणाम् । ज्रयसानावरं पृथ्वति क्षरन्ति यामभिः** (५$^{६६}_{५}$) = **हे पृथिवि देवि त्वयि तत् सर्वैः अर्थ्यमानत्वेन प्रसिद्धं बृहत् प्रभूतम् ऋतम् उदकम् ऋषीणां स्तोतृणामस्माकं श्रवएषे अन्नस्य एषणे सति ज्रयसानौ गच्छन्तौ अरम् अलम् अत्यर्थं पृथु यथा भवति तथा यामभिः गमनैः अति क्षरन्ति अत्यर्थं च वर्षतः (सायण).** As the Rk. happens in a Sūkta of Mitra and Varuṇa, Sāyaṇa has been compelled to consider **क्षरन्ति** as irregular for **क्षरतः.** But the very wording

shows that the Ṛk. refers to the Maruts. **यामन्ः** is used frequently in connection with them.

हे पृथिवि ज्रयसानाः वेगवन्तः मरुतः यामभिः त्वरितगमनैः तत् बृहत् वरं सर्वेषाम् इष्टं पृथु ऋतम् उदकम् अति क्षरन्ति वर्षन्ति । किमर्थम् । ऋर्षीणां श्रवसः अन्नस्य एषे प्रापणाय ऋषयः जलं प्राप्नुयुरिति हेतोः.

(24) **अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः** (८ $\frac{६\,१}{१\,४}$) = **शक्रः इन्द्रः विश्वाः द्विषः अति अति ओहते निःसारयति.** **इत्** and **उ** both expletives or **इत्** = **एव.** **ओहते इत्** = **ओहते एव** = most certainly (**अति अति इत्**) drives off (**ओहते**).

(25) **स्तोता यत्ते विचर्षणिरतिप्रशर्धयाद्गिरः । वया इवानुरोहते जुषन्त यत्** (८ $\frac{१\,३}{६}$) = **हे इन्द्र यदा विचर्षणिः स्तोता तव गिरः स्तुतीः अतिप्रशर्धयत् शत्रून् अत्यन्तं शर्धयित्रीः हिंसन्तीः करोति यदा च ताः त्वां जुषन्त सेवन्ते तदा सः स्तोता वयाः वृक्षस्य शाखाः इव अनुरोहते वर्धते. शर्धयत्** may be a corruption of **वर्धयत्** as **शर्ध्** always means to injure. **वृध्** is often used in connection with **गिरः** etc. as in **त्वां वर्धन्तु नो गिरः** (१ $\frac{५}{८}$) ; **यां त्वां दिवो दुहितर्वर्धयन्त्युषः सुजाते मातिभिर्वसिष्ठाः** (७ $\frac{९\,७}{६}$). **विचर्षणिः** is an ornamental epithet.

(26) **अतिविद्धा विथुरेणा चिदस्त्रा त्रिः सप्त सानु संहिता गिरीणाम्** (८ $\frac{९\,६}{२}$) = **गिरीणां त्रिः सप्त एकविंशतिः असंख्यानि संहिता संहितानि दृढानि सानु सानूनि इन्द्रेण अतिविद्धानि। केन साधनेन । विथुरेण श्लथेन चित् अपि अस्त्रा अस्त्रेण.** Indra held loosely a missile and with it broke through and throngh all the innumerable tops of mountains. **अति** may mean through and through or it may simply intensify **विद्धानि.**

(27) **यद्बंहिष्ठं नातिविधे सुदानू अच्छिद्रं शर्म भुवनस्य गोपा । तेन नो मित्रावरुणावविष्टम्** (५ $\frac{६\,२}{९}$) = **हे सुदानू शोभनदानौ भुवनस्य गोपौ मित्रावरुणौ यत् शर्म कल्याणं बंहिष्ठं बहुतमं स्यात् यत् अतिविधे अतिवेधनाय न शक्यं यच्च अच्छिद्रं तेन अस्मान् अविष्टम् अवतं रक्षतम्.** **अतिविधे** for piercing through. **नातिविधे** wnat cannot be pierced through. or **अति** may intensify **विधे.**

(28) **पृथिव्यामतिषितं यदूधः पयो गोष्वदधा ओषधीषु** (१० $\frac{७\,३}{९}$) = **हे इन्द्र यत् ऊधः अति दृढं सितं बद्धं मेघरूपं तस्मात् ऊधसः पृथिव्यां वर्तमानासु गोषु ओषधीषु च त्वं पयः अदधाः.** Indra deposits in cows

and herbs milk which he gets from the tightly-bound udder viz. clouds.

(29) **उत प्रहामतिदीव्या जयाति** (१०४२/१) = **अपि च प्रहां कंचित् अक्षविक्षेपम् अतिदीव्य अतिकुशलं देवनं कृत्वा जयाति**=Indra wins at dice by casting (**दीव्य**) very skilfully (**अति**) a particular cast of the dice (**प्रहां**). Indra is called **प्रहावान्** in **समिथेषु प्रहावान् वस्वो राशिमभिनेतासि भूरिम्** (४२०/८). **प्रहां** may be construed with **अतिदीव्य**. Throwing skilfully a particular cast of the dice called **प्रहा**. Or it may be construed with **जयति**. He wins the 'wager (**प्रहां**). I cannot determine the meaning of **प्रहा**.

(30) **परा हीन्द्र धावासि वृषाकपेरति व्यथिः। नो अहः प्र विन्दस्यन्यत्र सोमपीतये** (१०८६/२)= **हे इन्द्र अति अत्यन्तं व्यथिः श्रान्तः वृषाकपेः पराधावसि। सोमपीतये सोमपानाय वृषाकपेः गृहादन्यत्र अहः दिनं नो नैव प्रविन्दसि लभसे**. In the 1st Ṛk we are told that Sôma was being drunk and yet no one paid attention to Indra who found his friend deep in drink. Indra sped back in hot haste, tired and perspiring through rage. Some one seem to twist him for the disrespect shown him by that friend. **अतिव्यथिः** means exceedingly fatigued.

(31) **समच्यन्त वृजनातित्विषन्त यत्स्वरन्ति घोषं विततमृतायवः**(५५४/१२)= **मरुतः वृजनानि यज्ञान् प्रति सं सह अच्यन्त गच्छन्ति। यदा ते ऋतायवः ऋतम् उदकं ददतः विततं घोषं संततं नादं स्वरन्ति उच्चारयन्ति कुर्वन्ति तदा ते अतिविषन्त अत्यन्तं प्रकाशन्ते**=When the Maruts utter (**स्वरन्ति**) i. e. make a long (**विततं**) thundering sound (**घोषं**) while (giving) water (**ऋतायवः**), they shine exceedingly (**अतित्विषन्त**) and then attend (**समच्यन्त**) sacrifices (**वृजना**). **समच्यन्त वृजना** is not intelligible.

(32) **अतिष्कदो भियसा तन्न आवत्** (१०१०८/२) = **हे पणयः तत् इन्द्रदौत्यं नः मां भियसा भीत्या अतिष्कदः परिभवात् आवत् अरक्षत्**. It was Indra's mission entrusted to me that saved me from the attack of terror at the thought of such a long perilous journey. **स्कद्**=to attack. **अतिस्कद्** = an overhelming attack by terror (**भियसा**).

(33) **नास्माकमस्ति तत्तर आदित्यासो अतिष्कदे। यूयमस्मभ्यं मृळत** (८६७/१९) = **हे आदित्याः शत्रून् अतिष्कदे आस्कन्दितुम् अस्माकं तत् आवश्यकं तरः बलं नास्ति। तस्मात् अस्मभ्यं मृळत दयां दर्शयत**.

(34) मा ते गृध्नुरविशस्तातिहाय छिद्रा गात्राण्यसिना मिथू कः (१ १६२/२०) = हे अश्वमेधीय अश्व गृध्नुः तव मांसम् इच्छन् नरः मिथू सहवर्तमानानि अविशस्तानि अद्य यावत् अच्छिन्नानि तव गात्राणि असिना छिद्रा छिन्नानि मा कः करोतु । अतिहाय अन्यान् प्राणिनः त्यक्त्वा. मिथू occurs five times and seems to mean 'being together'. The two dogs that watch a house (१ २९/३), and night and dawn (२ ३१/५) are मिथूदृशा. A chariot is मिथूकृत i.e. set together or made compart. (१० १०२/१).

(35) आदित्साप्तस्य चर्किरन्नानूनस्य महि श्रवः। श्यावीरतिध्वसन्पथश्चक्षुषा च न संनशे (८ ५५/५) = (यदा काण्वायनाः अश्वान् आप्नुवन्) आत् इत् तदा तदनन्तरमेव ते अनूनस्य साप्तस्य महि श्रवः धनम् आ चर्किरन् स्तुतवन्तः। चक्षुषा चन अपि संनशे व्याप्तुम् अति अत्यन्तवेगेन श्यावीः श्यामवर्णाः अश्वाः पथः ध्वसन् मार्गान् मार्गैः गतवत्यः. The Ṛk. is very obscure. साप्त in 3 other places means a gift. But here it might be the name of the donor who was not deficient in wealth (अनूनस्य). The recipients praise this great wealth (श्रवः). चर्किरन् seems to mean praised in places where it occurs and governs the genetive. Black mares were the great wealth They were so swift that they ran along the paths with a speed that was beyond the reach of one's ken.

(36) तं वां हुवे अति रिक्तं पिबध्यै (८ ५८/३) = हे अश्विनौ वां युवयोः तं रथम् अतिरिक्तं सोमं पिबध्यै पातुं हुवे आह्वयामि. अतिरिक्तं overflowing through excess.

अति without a verb.

(1) अग्ने० वि राजस्यति स्रिधः (३ १०/७) = Thou shinest, Oh Agni, disregarding or conquering foes. अति=अतिमन्य अथवा जित्वा, अति द्विषः is almost meaningless as in Ṛks. 5 and 7 of $\frac{10}{126}$. So also अति स्रिधः here.

(2) आ याहि पूर्वीरति चर्षणीराँ अर्य आशिष उप नो हरिभ्याम् (३ ४३/२) = हे इन्द्र पूर्वीः चर्षणीः अतिमन्य नः अस्मान् हरिभ्याम् उप आ याहि । अर्यः अरेः आशिषः अतिमन्य उप आ याहि. पूर्वीः चर्षणीः = all the 5 Āryan tribes. अर्यः = of the enemies viz. these tribes. आशिषः = Sōma offerings; आशिर् is the base. अतिमन्य = disre-

garding. Indra is requested to disregard the offerings of the enemy.

(3) सद्यो यः स्यन्द्रो विषितो धवीयान् ऋणो न तायुरति धन्वा राट् (६$^{२}_{१६}$) = यः राट् राजा अग्निः (अरणिभ्यां) विषितः धन्वा धन्वानि अति (गच्छति). सितः = bound, confined (within the fire-producing sticks). वि+सितः = unbound, loosened, freed. Agni released from the sticks immediately (सद्यः) runs and crosses sandy deserts or long distances. In this act he resembles a thief (तायुः). ऋणं= wealth. ऋणः = possessed of wealth i. e. stolen property. स्यन्द् (to run)+रः = स्यन्द्रः. धवीयान्=स्यन्द्रः = running, taking to his heels. A thief escapes with stolen property and runs away at high speed.

(4) सा नो विश्वा अति द्विषः स्वसॄरन्या ऋतावरी। अतन्नहेव सूर्यः (६$^{२}_{६१}$)=ऋतावरी धनवती सा सरस्वती तस्याश्च अन्याः स्वसॄः स्वसारः अस्मान् विश्वाः द्विषः सर्वान् शत्रून् अति नयन्त्यः अतन् समृद्धात् कुर्वन्तु। यथा सूर्यः अहा अहानि अतन् तनोति दीर्घीकरोति. 'The Sun lengthens days' is a frequent idea in Ṛgveda and yet Sāyaṇa renders अतन्नहेव सूर्यः by सूर्यः अतन् सततं गच्छन् यथा अहानि अतिनयति तद्वत्. But अतन् is simply imperfect 3rd per. plural of तन्.

(5) ता वामद्य हवामहे हव्येभिर्वाजिनीवसू। पूर्वीरिष इषयन्तावति क्षपः (८$^{६}_{२६}$)= हे वाजिनीवसू अश्विनौ पूर्वीः इषः अति क्षपः इषयन्तौ ता तौ वां हव्येभिः हव्यैः अद्य हवामहे. वाजिनी=वसु=wealth. वाजिनीवसू= possessed of wealth. अति=संख्याम् अति इताः क्षपः = riches beyond calculation. क्षपः generally means nights; but स्वर्, अहर्, and क्षपा were used to denote wealth. अति=पूर्वीः. क्षपः = इषः. इषयन्तौ= ददतौ. पूर्वीरति क्षपः occurs in 10$^{7}_{2}$ and has this same sense.

(6) अतीहि मन्युषाविणं सुषुवांसमुपारणे। इमं रातं सुतं पिब (८$^{३}_{३}{}^{२}_{२}$) =उपारणे अरणः शत्रुः तस्य उप समीपे सुषुवांसं सोमं सुन्वन्तं मन्युः शत्रुः तदर्थं साविनं सोमं सुन्वन्तम् अति अतिमन्यः इहि आगच्छ। इमं रातं दत्तं सुतं सोमं पिब. मन्युषाविणं occure here only. It may be equal to उपारणे सुषुवांसं. Indra is called हरिमन्युसायकः (१०$^{६}_{३६}$) i. e. one whose bow (सायक) and arrows (मन्यु) are of gold (हरि). So here मन्यु may mean an arrow. मन्यून् सुवते क्षिपति असौ मन्युषावी। उपारणे

अरणस्य उपरि यः मन्यून् सुवति तं सुषुवांसं सोमं सुन्वन्तम् अति अतिमन्य इहि. One may offer Sōma and yet be a dangerous man, one, for instance, who would molest strangers. This may be the sense. The words **मन्युषाविणं** and **उपारणे** are, however, difficult.

(7) **इहि तिस्रः परावत इहि पञ्च जनाँ अति** (८$\frac{३२}{२२}$)=**हे इन्द्र तिस्रः परावतः अति इत्य इहि। पञ्च जनांश्च अतिमन्य इहि** = Cross the three heavens and do not mind (the tempting Sōma-offerings of) the 5 Āryan tribes.

(8) **विश्वेषामिरज्यन्तं वसूनां सासह्वांसं चिदस्य वर्पसः। कृपयतो नूनमत्यथ** (८$\frac{४६}{१६}$) = **विश्वेषां वसूनां सर्वेषां धनानाम् इरज्यन्तम् ईशानं तथा सर्वान् शत्रून् सासह्वांसम् अभिभवन्तम् इन्द्रं (गीर्भिः आह्वयामः). अस्य कृपयतः ज्वलतः वर्पसः बलस्य इरज्यन्तं** may be the construction. Indra rules i.e. commands or possesses all this refulgent strength and hence conquers all foes. **नूनं**=verily. **अति + अथ** looks abrupt. It may be thus explained :—**अथ तथा शत्रून् अतियन्तं** = surpassing also all foes. Or **अति** may intensify **सासह्वांसं**. Indra overcomes foes completely (**अति**) on account of his well-known (**अस्य**) burning (**कृपयतः**) strength (**वर्पसः**). The words after **सासह्वांसं** are really very difficult. **नूनमथ** in the preceding Ṛk. (८$\frac{४६}{१५}$) is equally obscure.

(9) **भिनत्स्यद्रिं तपसा वि शोचिषा प्राग्ने तिष्ठ जनाँ अति** (८$\frac{६०}{१६}$) = **हे अग्ने त्वम् अद्रिं तपसा शोचिषा वि भिनत्सि। जनान् अतिमन्य प्रतिष्ठ. तपसा = शोचिषा = ज्वालया. अद्रिं** = a mountain. **वि** = apart, into pieces. **प्रतिष्ठ** = start (towards us).

मन्य is to be understood after **अति** in **अति धन्वेव ताँ इही** ($3\frac{45}{1}$) also.

(10) **प्रजा ह तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे** (८$\frac{१०१}{१४}$) = **तिस्रः प्रजाः प्रजाताः उषसः अत्यायं यथा न पुनरायन्ति न पुनरेयुःतथा ईयुः गतवत्यः। अन्याः उषसः अर्कं सूर्यं निविविश्रे निविविशुः.** The preceding Ṛk. speaks of the Dawn. Three (i. e. a very large number of the) Dawns have departed for ever. Others are entering the Sun even now and will thus disappear. **अत्यायं**=beyond return ; they depart so as never to return. This interpretation may not be correct. It is only a guess.

(11) पवस्व देववीरति पवित्रं सोम रंह्या ($९^{३}_{१}$)= हे सोम देववीः त्वं रंह्या पवित्रम् अति (इत्य) पवस्व. देववीः = who feedest the gods. रंह्या=with speed. इत्य as here should be understood in 9^{36}_{2}, 9^{60}_{2}, 9^{97}_{4}, 9^{106}_{13}, 9^{107}_{17}, and 10^{93}_{6}.

(12) नावा न क्षादः ० स्वस्तिभिरति दुर्गाणि विश्वा ($१०^{५६}_{७}$) = न यथा नावा नौः जनान् क्षोदः जलम् अति (पारयति) तथा अग्निः अस्मान् स्वस्तिभिः विश्वानि दुर्गाणि अति (पारयतु).

(13) अत्यविः ($९^{२३}_{१}$), and अत्याविं ($९^{६}_{५}$ $९^{४५}_{५}$ $९^{१०६}_{११}$). अविम् आवि-रोम्णां कृतं पवित्रम् अतीतः = (Sōma) that has passed through the strainer.

(14) अत्यूर्मिर्मत्सरो मदः सोमः पवित्रे अर्षति ($९^{१७}_{३}$) = मत्सरः मदः सोमः अत्यूर्मिः पवित्रे अर्षति. मत्सरः = मदः = सोमः. संख्याम् अति इताः ऊर्मयः यस्य. Sōma runs into the strainer in countless ripples or waves. Cf. मध्वः पवन्त ऊर्मयः ($९^{७}_{८}$).

(15) ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः। संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ($७^{१०३}_{७}$) = हे मण्डूकाः संवत्सरस्य यत् अहः प्रावृषीणं बभूव संवत्सरे यस्मिन् अहनि पर्जन्यो वर्षति तत् अहः परि स्थ अभितः उपविशाथ। किं कुर्वाणाः। अतिरात्रे अतिरात्रनाम्नि सोमे सोमयागे सोमेन पूर्णं सरः अभितः आसीनाः ऋचश्च वदन्तः ब्राह्मणाः इव वाचं कुर्वाणाः. The rainy day is compared to a tank full of Sôma in the अतिरात्र sacrifice. Just as Brahmaṇas sit round such a tank in the अतिरात्र sacrifice and repeat Ṛks., so frogs croak when it is raining. परि = अभितः.

N. B. I regret the quotations under अति have not been arranged as they ought to have been according to Maṇdala and Sûkta.

अन्तरिक्ष

Wherever we find this word in company with words that mean heaven and earth, we may generally conclude that it means the aerial or mid region. That is the case in 1, 2, 5, 6, 10, 21, 23, 30, 31, 33, 36, 37, 40, 41, 43, 44, 47, 48, 52, 59-61, 66, 70, 77-79, 82, 85-87, 95 and 96.

द्यौः पृथिवी or द्यावापृथिवी is the usual expression for heaven and earth ; but in 2, 21, 40, 48, and 86 we have रोदसी instead. Again द्यौः is replaced by बृहत् in 1 and by परावत् in 79 ; so also पृथिवी by भूमि in 10,37,47 and 52, by अर्वावत् in 79 and पञ्च मानुषान् in 85. I suspect that the earth is represented by सुहवाः यजत्राः in 77 and अग्निजिव्हाः यजत्राः in 82.

The word means heaven in 22, 28, 45, 46, 54-58, 64, 65, 67, 71, 72, 88, 89, 98-100.

अन्तरिक्षं दिव्यात् पातु अंहसः (28) shows that अन्तरिक्ष is the same as Dyaus.

The Sun i. e. Sōma yokes his horse to travel along अन्तरिक्ष (55), the request to Ushas to fetch the gods from अन्तरिक्ष for drinking Sōma (58), the invitation to the Aświns (64) to come-down from अ०, अन्तरिक्षात् as an equivalent for दिवस्परि (65), the Ṛbhus being called heroes of अ० (17), the reference to Savitṛ's paths in अ० (72), Savitṛ (98) being called अन्तरिक्षप्राः and Agni अन्तरिक्षसद् (100), all these clearly prove that the word once meant heaven.

In 4 the word most probably means heaven and not the mid-region.

आ द्यां तनोषि रश्मिभिरन्तारिक्षमुरु प्रियम् (13); here उरु प्रियम् अन्तरिक्षं seems to be the same as द्यां. Ushas is not concerned with the mid-region.

विद्वान् पथीनाम् उरु अन्तरिक्षं (16); Agni knows the उरु अन्तरिक्ष and is requested to fetch the gods. The gods dwell in heaven. अन्तरिक्षं therefore must mean heaven. Does पथीनां mean देवानां ?

46 seems to betray a knowledge or at least an idea of the other hemisphere.

In 3, 15, and 49 we find अन्तरिक्ष in company with Dyaus only; yet even in the absence of the earth I think the word means the aerial region.

A frequent epithet of the aerial region is उरु (4, 9, 12, 13, 16, 23, 24, 30, 38, 61, 77, 78, and 84). वरीयः occurs twice only (6 and 25). In 24 अन्तरिक्षं is called उरु रजः and in 39 उरुलोकं. Sometimes उरु itself stands for अन्तरिक्ष as in :—वेद वातस्य वर्तनिमुरोः ऋष्वस्य बृहतः (१२५९) = Varuṇa knows the path of the wind, the wide (mid-region) and the vast (Dyaus). ऋष्व and बृहत् were once the exclusive epithets of Dyaus. उरोः वेद बृहतः वेद is the construction. प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वात् बृहतः सुदानू (७६१२); उरोः and ऋष्वात् बृहतः as above. प्र (रिरिचाथे) = exceed.

The word means space above the earth in 51, 81 and 90. It seems to mean the sea in 101.

9, 11, 17, 19, 24-27, 29, 32, 34, 35, 38, 39, 42, 49, 50, 53, 62, 63, 68, 69, 73-76, 80, 83, 84, 91, 93, and 99 are doubtful cases in which it is difficult to fix the meaning of the word.

वनेषु व्यन्तरिक्षं ततान (२०); it is impossible even to guess the sense of अ०. What is वनेषु? in water? Varuṇa stretches heaven or the sky in water i. e. causes its reflection. Can this be the meaning?

In 7 we find द्यां, अन्तरिक्षं, पृथिवीं and रोदसी too which must be considered a stop-gap. Otherwise the conclusion must be that the composer did not know the meaning of रोदसी. 35 is similar.

द्यावाक्षामा पृथिवी अन्तरिक्षम् (8); what does पृथिवी mean here? It cannot mean the earth as there is क्षामा. It is equal to पृथिव्यौ which then would qualify द्यावाक्षामा. Perhaps it is a stop-gap.

In 14 we have त्रिः अन्तरिक्षं, त्री रजांसि, त्रीणि रोचना, तिस्रो दिवः, and पृथिवीः तिस्रः. What are रजांसि and रोचना? रजांसि includes heaven, earth and the mid-region or it means heaven which it often does. रोचना means the 3 stories of heaven and nothing else. रजांसि and रोचना are really not wanted as we have दिवः.

Yāska derives the word thus:—अन्तरा क्षान्तम्। अन्तरा इमे इति वा (निरुक्त २।१०). अन्तरा = मध्ये. इमे = द्यावापृथिव्यौ. क्षान्तं = पृथिव्याः

अन्तं. अन्तरि may be the locative singular of अन्तर्. क्षं = क्षेति. That which exists (क्षं) between heaven and earth. But this derivation would be inapplicable if the word once meant heaven.

(1) त्वं भुवः प्रतिमानं पृथिव्या ऋष्ववीरस्य बृहतः पतिर्भूः । विश्वमाप्रा अन्तरिक्षं महित्वा सत्यमद्धा नकिरन्यस्त्वावान् (१५२१३).

भुवः = भूः = अभवः भवसि वा. प्रतिमानं = a match or an equal; a foe; a master. ऋष्वाः वीराः अस्य सः = who has brave sons viz. the gods. बृहतः = दिवः. बृहत् often qualifies द्यौः and sometimes stands for द्यौ itself. महित्वा = महत्त्वेन. आ + प्राः = पूरितवान्. Indra fills the whole of अन्तरिक्ष. Is अन्तरिक्ष the aerial region or heaven? अद्धा = सत्यं = indeed, verily. नकिः = no one. नकिः अन्यः = none else. त्वावान् = त्वत्सदृशः.

(2) यान् राये मर्तान् सुषूदो अग्ने ते स्याम मघवानो वयं च । छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान् रोदसी अन्तरिक्षम् (१७३८)= हे अग्ने यान् मर्तान् राये त्वं सुषूदः ते मर्ताः वयं च मघवानः स्याम । रोदसी द्यावापृथिव्यौ अन्तरिक्षम् आपप्रिवान् त्वं छाया इव विश्वं भुवनं सिसक्षि.

सूद् (= to give, to present) reduplicated becomes सुषूद्. Those mortals whom thou givest to wealth i. e. makest wealthy. May we be those (ते) rich mortals (मघवानः). सच् = to be with, to accompany. Thou followest the whole world as though thou wert its shadow (छाया). Thou never leavest the universe to itself but must over-awe it with thy presence. आ + पप्रिवान् = filling through and through.

(3) अदितिर्द्यौरदितिरन्तरिक्षं (१८९१०). Aditi is everything. Only द्यौ and अन्तरिक्ष are mentioned. Are they one or two?

(4) त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः । त्वमा ततन्थोर्वन्तरिक्षं त्वं ज्योतिषा वि तमो ववर्थ (१९१२२).

Sôma generates all these plants, waters and cows. उरु अन्तरिक्षं त्वम् आ ततन्थ = Thou hast stretched (आ + ततन्थ) the wide aerial region. Thou uncoverest (वि + ववर्थ) darkness by thy light. तन् by reduplication ततन्. ततन् + थ = ततन्थ. वृ by reduplication ववृ. ववृ + थ = ववर्थ. वृ = to cover. वि + वृ = to

uncover, to expel. Does अ० here mean the aerial region or heaven? I think it means heaven which looks crumpled on account of darkness. Light shows how extended it is. उरु generally qualifies अन्तरिक्ष meaning the aerial region. But here the उरु अन्तरिक्ष is heaven. Sōma like Agni illumines and thus extends heaven.

(5) चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावा-पृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च (१ ११५/१) = देवानां चित्रम् अनी-कम् उत् अगात् = the blazing (चित्रं) light (अनीकं) of the gods has come out. चक्षुः etc. = (the Sun who is) the eye of Mitra, Varuṇa and Agni. That light has filled heaven, earth and the mid-region. The Sun is the soul of everything that moves (जगतः) and everything that stands i. e. is stationary.

(6) यः पृथिवीं व्यथमानामदृंहद्यः पर्वतान् प्रकुपिताँ अरम्णात्। यो अन्तरिक्षं वि ममे वरीयो यो द्यामस्तभ्नात्स जनास इन्द्रः (२ १२/२) = He is Oh men (जनासः = जनाः) Indra, who steadied (अदृंहत्) the afflicted (व्यथमानां) earth, stopped (अरम्णात्) mountains that were fleeing (प्रकुपितान्), measured the wide aerial region and propped up (अस्तभ्नात्) heaven.

दृंह् = to steady. रम् = to stop. व्यथ् = to suffer pain or affliction. कुप् = to tremble or to run in fear. उरु, वरीयः, वरिष्ठं. वरीयः = wider, very wide. विममे = measured i. e. perveded or occupied. स्तभ् = to prop up.

(7) अवंशे द्यामस्तभ्नाद्बृहन्तमा रोदसी अपृणादन्तरिक्षम्। स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार (२ १५/२) = Indra held on high (अस्तभ्नात्) mighty (बृहन्तं) heaven (द्यां) without (using) a pillar (अवंशे), filled or occupied (आ + अपृणात्) heaven and earth and the aerial region. He steadied (धारयत्) and spread out (पप्रथत्) the earth. Indra did all these (marvels) under the influence (मदे) of Sōma. The metre requires अस्तभत् and not अस्तभ्नात्.

(8) आदित्या रुद्रा वसवः सुनीथा द्यावाक्षामा पृथिवी अन्तरिक्षम्। सजोषसो यज्ञमवन्तु देवा ऊर्ध्वं कृणवन्त्वध्वरस्य केतुम् (३ ८/८).

सुनीथाः = नीथवन्तः. नी + थं = नीथं = that which is conveyed i. e. praise or an offering or wealth. सुनीथाः = praised or having wealth. Is पृथिवी different from क्षामा? Or does it qualify द्यावाक्षामा? पृथिवी पृथिव्यौ द्यावाक्षामा द्यावाक्षामे सजोषसः = together. अवन्तु = may they guard or endow with wealth. May they raise on high (ऊर्ध्वं कृणवन् कुर्वन्तु) the banner of the sacrifice (अध्वरस्य केतुम् = अग्निम्).

(9) अग्ने यत्ते दिवि वर्चः पृथिव्यां यदोषधीष्वप्स्वा यजत्र । येनान्तरिक्षमुर्वाततन्थ त्वेषः स भानुरर्णवो नृचक्षाः (३ २२) = हे यजत्र अग्ने यत् ते तव वर्चः तेजः दिवि पृथिव्यां यत ओषधीषु अप्सु आ मध्ये येन वर्चसा उरु अन्तरिक्षम् आवतन्थ सः भानुः त्वेषः अर्णवः नृचक्षाः.

वर्चस् = lustre. आ means in or it may be equal to च; ओषधीषु अप्सु च. यजत्र = one that deserves offerings. त्वेषः = दीप्तिमान् = resplendent. भानुः = lustre. वर्चः is neuter while भानुः is masculine, yet the two are in apposition; यत् वर्चः स भानुः. अर्णवः = (extensive like) the sea. नृचक्षाः should be नृचक्षः (हे नृचक्षः अग्ने); otherwise it would qualify भानुः and be meaningless. नृणां देवानां चक्षाः चक्षुः; Agni is the eye of the gods. For अ० vide 4.

(10) नि सामनामिषिरामिन्द्र भूमिं महीमपारां सदने ससत्थ । अस्तभ्नाद् द्यां वृषभो अन्तरिक्षमर्षन्त्वापस्त्वयेह प्रसूताः (३ ३०) = हे इन्द्र सामनां (?) इषिरां धनयुक्तां महीं महतीम् अपाराम् अनन्तां भूमिं त्वं सदने निससत्थ अस्थापयः । वृषभः वृषबलः इन्द्रः द्याम् अन्तरिक्षं च अस्तभ्नात् । त्वया प्रसूताः विसृष्टाः आपः इह पृथिव्याम् अर्षन्तु धावन्तु.

सामनां? समानां अथवा साम्नां नयन्तीं (सायण). The स in समना may have been altered to सा for metre. समना = a common wife or a woman. The earth was a floating body which Indra seated in a seat or steadied. The earth was a faithless, erratic woman, the property of all. Indra fixed her. इष् (wealth) + इरां = rich. अपारां = without end, limitless. अर्षन्तु = let (them) run on. प्रसूताः = ordered, let go. Does अन्तरिक्ष here mean the sea? Let waters ordered by thee run towards the sea. We hardly find mention of the steadying of the aerial region. आपः अन्तरिक्षम् अर्षन्तु may be the construction. Or अन्तरिक्षं = द्याम्.

(11) इन्द्र ओषधीरसनोदहानि वनस्पतीरँसनोदन्तरिक्षम् । बिभेद वलं नुनुदे विवाचोऽथाभवद्दमिताभिक्रतूनाम् (३$\frac{३}{१}\frac{४}{०}$)=

ओषधीः=herbs. वनस्पतीन्=big trees. असनोत्=gave. Indra gave days by rescuing the Sun from Vṛtra and heaven (अन्तरिक्षं) by clearing it of Vṛtra i. e. clouds. Vala was an enemy that concealed cows. Indra broke him. He drove away (नुनुदे) the barbarians (विवाचः). विवाचः=who were speechless or who spoke jargon. दमिता=दमयिता=a tamer. अभिक्रतूनां=of those that attack sacrificies or riches. क्रतु means wealth, offerings, power. ये क्रतून् अभिभवन्ति ते अभिक्रतवः. Does अ० mean heaven or water or something else ?

(12) देवानां दूतः पुरुध प्रसूतोऽनागान्नो वोचतु सर्वताता । शृणोतु नः पृथिवी द्यौरुतापः सूर्यो नक्षत्रैरुर्वन्तरिक्षम् (३$\frac{५}{१}\frac{४}{१}$) = देवानां दूतः अग्निः पुरुध सर्वत्र प्रसूतः प्रेषितः नः अस्मान् सर्वताता सर्वेषां देवानां ताता तातौ संघे अनागान् एते अनागसः इति वोचतु ब्रवीतु. May Agni declare us to be sinless when he stands midst the gods.

प्रसूतः = dispatched, commissioned. पुरुध = in all places. आपः शृण्वन्तु. Is नक्षत्रैः to be construed with सूर्यः or अन्तरिक्षं ? If it be taken with अन्तरिक्षं, the latter would mean heaven ; but there is the word द्यौः too. In the other alternative how can the stars and the Sun keep company ?

(13) आ द्यां तनोषि रश्मिभिरान्तरिक्षमुरु प्रियम् । उषः शुक्रेण शोचिषा (४$\frac{५}{७}$२)=Thou stretchest (आ तनोषि), Oh Dawn, heaven and the wide sky with thy beams and with thy blazing light.

आन्तरिक्षं=आ+अन्तरिक्षं. आ (तनोषि). The root in शुक्र and शोचिष् is शुच् to blaze. प्रियं=which gives us good things. But for उरु, अन्तरिक्षं most probably is the same as द्यां.

(14) त्रिरन्तरिक्षं सविता महित्वना त्री रजांसि परिभूस्त्रीणि रोचना । तिस्रो दिवः पृथिवीस्तिस्र इन्वति त्रिभिर्व्रतैरभि नो रक्षति त्मना (४$\frac{५}{५}$३)

त्रिः=त्रीणि; as every region is three. महित्वना=महत्त्वेन. त्री=त्रीणि. रजांसि ? Is it अन्तरिक्ष or द्यौ ? But both are mentioned here. परिभूः=one that pervades. रोचना=रोचनानि=the 3 stories of heaven ;

(द्यौ). इन्वति=प्रेरयति=charges or fills (with his power). व्रतैः =with the 3 acts of rising, reaching the meridian and setting or with his 3 strides. अभि + रक्षति. त्मना =with (gifts of) wealth. Here several regions are mentioned. रजांसि, रोचना and दिवः mean heaven. The composer of the Ṛk does not mind repetition.

(15) मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् । क्षेत्रस्य पतिर्मधुमन्नो अस्त्वरिष्यन्तो अन्वेनं चरेम (४ ५७/३) = ओषधीः ओषधयः द्यावः आपः मधुमतीः मधुमत्यः उदकवत्यः नः भवन्तु । अन्तरिक्षं मधुमत् भवतु । क्षेत्रस्य पतिः नः अस्मभ्यं मधुमत् अस्तु । अरिष्यन्तः वयम् एनं क्षेत्रस्य पतिम् अनु चरेम.

मधु = water sweet as honey. अ + रिष्यन्तः = not coming to grief ; unafflicted. अनु + चर् = to walk after, to obey.

(16) आद्य रथं भानुमो भानुमन्तमग्ने तिष्ठ यजतेभिः समन्तम् । विद्वान् पथीनामुर्वन्तरिक्षमेह देवान् हविरद्याय वक्षि (५ १/१ १/१) = हे भानुमः भानुमन् अग्ने अद्य यजतेभिः यजतैः हविरर्हैः देवैः समन्तं सह भानुमन्तं रथम् आतिष्ठ । पथीनाम् उरु अन्तरिक्षं विद्वान् हविरद्याय देवान् इह आ वक्षि वह.

आद्य = आ + अद्य. भानुमः voc. sing. of भानुमान्. समन्तं misused for समं. समन्ते (द्यावापृथिव्यौ) occurs twice and समन्ता (समन्तौ घर्मौ) once in RV. पथीनां ? It seems to mean देवानां i.e. of gods that move along the paths (of heaven). पथीनां occurs here only. पथीनां देवानाम् उरु अन्तरिक्षं विद्वान्. Does अ० here mean heaven in which the gods dwell ? Or पथीनां = पथः ? Agni knows all the paths leading to heaven.

(17) प्रैष स्तोमः पृथिवीमन्तरिक्षं वनस्पतींरोषधी राये अश्याः । देवोदेवः सुहवो भूतु मह्यं मा नो माता पृथिवी दुर्मतौ धात् (५ ४/१ २/६) = एषः स्तोमः पृथिवीं ० राये प्र वेगेन अश्याः अश्नोतु । देवः देवः (सर्वे देवाः) मह्यं सुहवः आव्हातुं सुलभः भूवु भवतु । माता पृथिवी नः अस्मान् दुर्मतौ मा धात् दधातु.

अश्याः = अश्यात् = may (my praise) reach the earth etc. (for obtaining wealth). देवः देवः = every god. सुहवः = सुखेन आव्हातव्यः= of ready response to my call. दुर्मतौ (in want of wealth i. e. poverty) opposed to सुमतौ (in prosperity). माता पृथिवी is mother earth. So the 1st पृथिवी must be द्यौ who too is broad and wide.

(18) व्यक्तून्रुद्रा व्यहानि शिक्वसो व्यन्तरिक्षं वि रजांसि धूतयः। वि यदज्राँ अजथ नाव ईं यथा वि दुर्गाणि मरुतो नाह रिष्यथ (५ ५४/४) = हे मरुतः यत् यदा अक्तून् अहानि अन्तरिक्षं रजांसि अज्रान् दुर्गाणि वि अजथ तदा अह अत्र अस्मिन् कर्मणि यूयं न रिष्यथ.

अक्तून् = nights. रुद् (to howl) + रः = रुद्रः = a howler. धूतयः = धूतीनां कर्तारः = shakers. शिक्वसः ? The word used in the case of Agni seems to mean a flame. In 3 places it qualifies मरुतः and in one रुद्र. शिक्वसः = resplendent. Is शिच् another form of शुच् ? We have शुशुक्वांसः from शुच्. शिक्वांसः would be the correct form. न रिष्यथ = you never come to grief. The 2nd half has been explained under अज्र (P. 8). There अज् was made to mean to push. To cross, however, seems better. रजांसि generally means heaven; अ० therefore should mean the aerial region.

(19) स्वयं दधिध्वे तविषीं यथा विद बृहन्महान्त उर्विया वि राजथ। उतान्तरिक्षं ममिरे व्योजसा शुभं यातामनु रथा अवृत्सत (५ ५५/२) = हे मरुतः यथा यूयं विद जानीध्वे तथा यूयं स्वयं तविषीं दधिध्वे। महान्तः यूयं बृहत् उर्विया च वि राजथ। उत अपि च ते मरुतः ओजसा अन्तरिक्षं वि ममिरे। शुभं प्राप्तुं यातां गच्छतां मरुतां रथाः अनु अवृत्सत.

तविषीं धा = to hold under control. You know **(यथा विद ?)** how to control yourselves as occasion requires. This may be the sense. बृहत् = much. उर्विया an adverb from उरु. उरु+इया = widely. वि राजथ = you rule. बृहत्, उर्विया and वि, all these mean greatly, widely, extensively. वि ममिरे=(the Maruts) occupy. शुभं यातां = of those that are going to win the damsel, Sūryā. अनु + वृत् = to roll on, to move smoothly or without jolting. The Maruts rush along the mid-region; but they move in heaven too. Cp. दिवा यान्ति मरुतः(52).

(20) वनेषु व्यन्तरिक्षं ततान वाजमर्वत्सु पय उस्रियासु। हृत्सु क्रतुं वरुणो अप्स्वग्निं दिवि सूर्यमदधात्सोममद्रौ (५ ८५/२).

अर्वत्सु वाजम् अदधात् = put strength (lit. booty) into horses. उस्रियासु पयः = milk into cows. हृत्सु क्रतुं = courage into hearts. अप्सु अग्निं = Agni into water. दिवि सूर्यं = the Sun in heaven. अद्रौ सोमं = Sōma on mountains. वनेषु अन्तरिक्षं विततान ?

Does वन mean water? Varuṇa stretched heaven in water i. e. caused a reflection of heaven or the sky in water. This would be a poor feat, no doubt. वनेषु is dlfficult. वन may mean forests over which stretches the canopy of the sky.

(21) नीचीनवारं वरुणः कवन्धं प्र ससर्ज रोदसी अन्तरिक्षम् । तेन विश्वस्य भुवनस्य राजा यवं न वृष्टिर्व्युनत्ति भूम (५ ८५/३) = वरुणः नीचीनवारं कवन्धं रोदसी द्यावापृथिव्यौ अन्तरिक्षं च प्रति प्र ससर्ज । तेन कवन्धेन विश्वस्य भुवनस्य राजा न यथा वृष्टिः यवं व्युनत्ति तथा भूम भूमिं व्युनत्ति.

कवन्ध occurs thrice in RV. उत्सं कवन्धमुद्रिणं (८ ७/१०) where उत्सं, कवन्धं and उद्रिणं all mean a cloud. सेमभि प्रवाद्दिवस्कवन्धमव दर्षदुद्रिणं (९ ७४/७) = सः सोमः ईम् एतं दिवः कवन्धम् उद्रिणं अभि अव दर्षत् दारयति = Sŏma tears open the watery (उद्रिणं) cloud. प्रवत् (= प्रवतं = flowing, rushing on) is in apposition to कवन्धं. उद्रिणं in both Ṛks. may be translated by 'watery'. नीचीनं वारं द्वारं बिलं यस्य तं = whose bilge is on the bottom-side. भूम = the earth. Cf. चर्मेवोदभिर्व्युनन्ति भूम (१ ८५/५). नीचीनवारं qnalifies अवतं (८ ७३/१०). नीचीनवारे qualifies गवि (१० १०६/१०). Thus the word occurs thrice only in RV.

(22) स जायमानः परमे व्योमनि व्रतान्यग्निर्व्रतपा अरक्षत् । व्यन्तरिक्षममिमीत सुक्रतुर्वैश्वानरो महिना नाकमस्पृशात् (६ ८/२) = Agni, that (सः) guardian of acts (व्रतपाः) guarded them (व्रतानि) the moment he was born in high heaven. He pervaded heaven; Vaishwānara filled it with his power.

व्योमन्, अन्तरिक्ष and नाक all mean heaven. व्रतं = an act or a law. सुक्रतुः = possessed of mighty power. स्पृश् = to pervade, to fill. Agni is born in the highest heaven and fills it with his greatness. The region that he measures (वि + अमिमीत) must therefore be heaven and not the aerial region with which he has nothing to do.

(23) अयं स यो वरिमाणं पृथिव्या वर्ष्माणं दिवो अकृणोदयं सः । अयं पीयूषं तिसृषु प्रवत्सु सोमो दाधारोर्वन्तरिक्षम् (६ ४७/४) = It is this Sōma that made the extent of earth and heaven. It is he who put nectar (पीयूषं) into the 3 rivers. He also held on high the wide aerial region.

वर् (most probably connected with उरु) + इमन् - वरिमन्. वरिमन् = वर्ष्मन् = width, extent, stretch. वृष् + मन् = वर्ष्मन् = that which contains rain ? पीयूषं (from पी to drink) = that which is drunk, water, nectar. आधात् or some such verb is understood. प्रवत् = a flowing, rushing river. What are the three rivers ?

(24) आपप्रुषी पार्थिवान्युरु रजो अन्तारिक्षम् । सरस्वती निदस्पातु (६ ६१/११) = May S. protect (पातु) us from slanderers (निदः), she who fills (आ + पप्रुषी) earthly regions (पार्थिवानि), the wide (उरु) world (रजः) of heaven and the mid-region (अन्तरिक्षं).

पॄ by reduplication पपॄ. पप्रिवान् perf. part.; feminine पप्रुषी. Heaven is called पृथु रजः (१ ५०/७) and पार्थिवं रजः (१ ८१/५). What does पार्थिवानि mean ? Is it equal to पार्थिवं ? पार्थिवं = उरु. उरु पार्थिवं रजः = heaven ? Or पार्थिवानि = पृथिवी-स्थलानि ? Or रजांसि may be understood after पार्थिवानि and अन्तरिक्षं may be the उरु रजः. Most probably उरु is to be construed with अन्तरिक्षं. It is placed before रजः for the sake of metre.

(25) इन्द्राविष्णू तत्पनयाय्यं वां सोमस्व मद उरु चक्रमाथे । अकृणुतमन्तरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि (६ ६९/५). तत् पनयाय्यं वां = that was a praiseworthy act of yours. उरु चक्रमाथे = you stalked far and wide. अकृणुतं = अकुरुतम्. वरीयः = wider. अन्तरिक्षं and रजांसि both mean heaven. The sky looking crumpled in darkness choked the early Āryans who breathed freely (जीवसे) when the sky lay extended in all its fulness in the light of the Sun. The first line would be metrically improved by omitting तत् and inserting कृतं before वां.

(26) शं नो द्यावापृथिवी पूर्वहूतौ शमन्तारिक्षं दृशये नो अस्तु । शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः (७ ३५/५).

नः शं = for our welfare. पूर्वा हूतिः = the earliest invocation to the gods i. e. a sacrifice. दृशये = to enable us to see. अन्तरिक्षं means heaven or the Sun. वनिनः = वनस्पतयः = lofty trees. जिष्णुः = victorious (Indra). Indra conquered Dyaus and became रजसः पतिः.

(27) जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच । एन्द्र पप्राथोर्वन्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ (७ ९८/३) = As soon as born (जज्ञानः) thou drankest Sōma for (getting) strength. Thy mother then declared thy greatness. Thou spreadest wide heaven, Oh Indra, and gavest wide space to the gods by fighting with their foes.

सहसे = for strength. प्र + उवाच = proclaimed, declared aloud. एन्द्र = आ + इन्द्र. आ + पप्राथ. युधा instr. sing. of युध् a fight. वरिवः = wide space. Heaven was made to look small by the enemy whom Indra killed and restored heaven to its original extent.

(28) मा नो रक्षो अभि नड् यातुमावतामपोच्छतु मिथुना या किमीदिना। पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् (७ १०४/२३) = यातुमावतां रक्षः नः मा अभि नट्। किंतु तत् रक्षः किमीदिना किमीदिनौ या यौ मिथुना मिथुनौ तौ अप उच्छतु विवासयतु। पृथिवी नः अस्मान् पार्थिवात् अंहसः पातु। अन्तरिक्षं दिव्यात् अंहसः अस्मान् पातु. यातु and रक्षः both mean magic. यातु + मान्=यातुमान्. यातुमान् + वान्=यातुमावान्. वत् is a superfluous affix here. May no magic spell of magicians destory (अभिनट) or trouble. किमीदं विद्यते अस्य सः किमीदी = one that deals in magic. किमीद् is allied to chymia. The late Mr. Tilak thought that किमीदिन् was made of एकिम्मु (Ekimmu) and डिम्मे (Dimme) which were the names of two Accadian spirits with whom magicians had dealings. But the real word is किमीद् which by taking the affix इन् becomes किमीदिन्. किमीदी, किमीदिनौ etc. is the declension. May that magic spell drive away (अप + उच्छतु) couples (मिथुना) that dabble in that evil art. Perhaps उषाः is the subject of अपोच्छतु. Magicians work in the dark. Light puts a stop to their diablerie. पार्थिवात् अंहसः = from earthly injury. Here अन्तरिक्ष = द्यौ.

(29) व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना। इन्द्रो यदभिनद्वलम् (८ १४/७) = यत् यदा सोमस्य मदे इन्द्रः वलम् अभिनद् नाशयामास तदा सः अन्तरिक्षं रोचना रोचनानि वि अतिरत् दत्तवान्.

वि + तिर् = to give. As soon as Vala was broken, heaven and the aerial region were given back to man. Are अन्तरिक्षं

and रोचना one or two? Most probably one, as Indra after killing his enemies frees heaven from darkness.

(30) उभे द्यावापृथिवी विश्वमिन्वे अर्यमा देवो अदितिर्विधाता । भगो नृशंस उर्वन्तरिक्षं विश्वे देवाः पवमानं जुषन्त (९ ८६/१).

विश्वं धनम् इन्वतः दत्तः ते विश्वमिन्वे. विश्वमिन्वे उभे द्यावापृथिव्यौ = both heaven and earth that give all wealth. देवः अर्यमा. विधाता अदितिः. Aditi was masculine also. Or विधाता and अदिति may be different deities. नृशंसः (भगः) = praised by men. जुषन्त=सेवन्ते.

(31) पुनर्नो असुं पृथिवी ददातु पुनर्द्यौर्देवी पुनरन्तरिक्षम् । पुनर्नः सोमस्तन्वं ददातु पुनः पूषा पथ्यां या स्वस्तिः (१० ५९/७).

असुं = breath, life. तन्वं (accusative singular of तनू) = self, life. या स्वस्तिः तां पथ्यां पूषा नः पुनर् ददातु. पथ्या स्वस्तिः = welfare on the road.

(32) इन्द्राग्नी वृत्रहत्येषु सत्पती मिथो हिन्वाना तन्वा समोकसा । अन्तरिक्षं मह्या पप्रुरोजसा घृतश्रीर्महिमानमीरयन् (१० ६५/२) =वृत्रहत्येषु सत्पती मिथः हिन्वाना हिन्वानौ तन्वा समोकसा समोकसौ इन्द्राग्नी महिमानम् ईरयन् घृतश्रीः सोमः एते सर्वे महि अन्तरिक्षम् ओजसा आपप्रुः.

Indra and Agni are lords of the gods (सत्पती) i. e. they lead them in battles (वृत्रहत्येषु). हि (= to mix) + नु + आना = mixed with each other (मिथः). तन्वा समोकसा = having a common (सं) abode (ओकसा) physically. They have as it were one body i.e. they always act together. घृतश्रीः = (Sōma) having the hue of ghee, yellow. महिमानम् ईरयन् = (Sōma) sending into every one his own power. Sōma inspires all his devotees with courage. अन्तरिक्षं = heaven or space.

(33) द्यावापृथिवी जनयन्नभि व्रताप ओषधीर्वनिनानि यज्ञिया । अन्तरिक्षं स्वरापप्रुरूतये वशं देवासस्तन्वी नि मामृजुः (१० ६६/९)=देवाः व्रता व्रतानि अभि द्यावापृथिवी द्यावापृथिव्यौ अपः ओषधीः यज्ञिया यज्ञियानि वनिनानि जनयन् अजनयन् । अन्तरिक्षं च स्वर् स्वर्गं च ऊतये आपप्रुः । तन्वि वशं सामर्थ्यं विमामृजुः स्थापयामासुः.

अभि व्रता = in accordance with laws. वनिनानि occurs here only. It is irregular for वनिनः. वनिनानि = वनिनः = वृक्षान्. यज्ञिया = worthy of offerings. स्वर् = heaven or the Sun. वशं etc. =the

gods put (निमामृजुः) into these same (तन्वि) power (वशं) in order to protect or benefit men (ऊतये).

(34) समुद्रः सिन्धू रजो अन्तरिक्षमज एकपात्तनुयित्नुरर्णवः। अहिर्बुध्न्यः शृणवद्वचांसि मे विश्वे देवास उत सूरयो मम (१० ६६/११).

समुद्रः = सिन्धुः = अर्णवः. Do these 3 words mean a river or a sea ? or समुद्रः = the sea. सिन्धुः =the river Indus. अर्णवः ? or अर्णवः = full of, overflowing with, water. The Indus may be so called. रजः = heaven ? अजः एकपात् = the one-footed unborn, the Sun ? तनयित्नुः = (द्यौः) = heaven that rumbles; Jupiter tonans. Do not the all-gods include समुद्रः etc? or were they a class by themselves ? सूरयः may qualify देवासः or it may mean the wise on earth. शृणवत् = शृण्वन्तु.

(35) देवेभिर्न्विषितो यज्ञियेभिरग्निं स्तोषाण्यजरं बृहन्तम् । यो भानुना पृथिवीं द्यामुतेमामा ततान रोदसी अन्तरिक्षम् (१० ८८/३) = यः अग्निः भानुना स्वतेजसा पृथिवीम् उत अपि च द्यां रोदसी अन्तरिक्षम् आततान तम् अजरं बृहन्तम् अग्निं यज्ञियेभिः यज्ञियैः देवेभिः देवैः इषितः प्रेरितः नु खलु स्तोषाणि स्तौमि. The gods desirous of offerings inspire the dev tee to praise Agni who conveys these offerings to them.

न्विषितः = नु + इषितः. इषितः = asked, commanded, inspired. स्तु + स् (of लेट्) + आनि = स्तोषाणि = I will praise. रोदसी is nothing but a repetition of द्यां and पृथिवीं. I have a suspicion that रोदसी originally different from theae two came in course of time to be confounded with them. I am not, however, prepared at present to produce evidence in favour of this view.

(36) न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः। यदस्य मन्युराधिनीयमानः शृणाति वीळु रुजति स्थिराणि (१० ८९/६) = यत् यदा अस्य इन्द्रस्य मन्युः बलम् अधिनीयमानः अभिगच्छन् वीळु शृणाति स्थिराणि रुजति यस्य च अन्तं द्यावापृथिव्यौ धन्व अन्तरिक्षं च न आपुः तस्मै सोमः अक्षाः क्षरति. Neither heaven nor earth nor धन्व (?) nor the aerial region nor mountains can reach the end of Indra's might.

अधिनीयमानः = being carried toward. वीळु = strong. स्थिराणि = steadfast things. शृणाति = breaks to pieces. रुजति = demolishes. यस्य = यस्य अन्तम्. I do not know what part of the uni-

verse was धन्व. अक्षाः is really not wanted here; besides it spoils the metre of the 2nd quarter. नाद्र्यो न सोमः most probably ended it.

(37) नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत। पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयत् (१०$\frac{९०}{१४}$).

The aerial region is a big cavity; so is the navel of the पुरुष. So the aerial region sprang out of that navel. The head is the top of the human body. द्यौ is the topmost region. So द्यौ sprang from his head. Man treads on the earth; so the earth was born of P's feet. The several quarters and the ear are space. So the directions were born of his ear. अकल्पयत् = अकरोत्. The subject is पुरुषः or सः understood. Are the लोकs different from the earth, heaven and the aerial region? If so, what are they? The last quarter is suspicious.

(38) इदं स्वरिदमिदास वाममयं प्रकाश उर्वन्तरिक्षम्। हनाव वृत्रं निरेहि सोम हविष्ट्वा सन्तं हविषा यजाम (१०$\frac{१२४}{६}$)=इदं स्वर् इदम् एव वामम् आस आस्ति। अयं प्रकाशः वामः। इदम् उरु अन्तरिक्षं वामम्। हे सोम निर् आ इहि। आवां वृत्रं हनाव। हविः सन्तं त्वा त्वां हविषा यजाम परिचरेम.

The Sun (स्वर्), light (प्रकाशः), the wide (उरु) heaven (अन्तरिक्षं), all this is certainly as desirable as wealth (वामं). Vṛtra hides them. Let us fight him and kill him. Sōma-juice is solicited to come out of the plant itself or the strainer. The extractor of the juice appeals to Sōma not to delay. He would quaff it and then kill Vṛtra, thus releasing the Sun and heaven from his grip. The Sun and sunlight are absolute necessities. Sōma is an offering and yet requires to be propitiated with offerings.

(39) मम देवा विहवे सन्तु सर्व इन्द्रवन्तो मरुतो विष्णुरग्निः। ममान्तरिक्षमुरुलोकमस्तु मह्यं वातः पवतां कामे अस्मिन् (१०$\frac{१२८}{१}$).

विहवे = in battle. इन्द्रवन्तः = with Indra. उरुःलोकः यस्मिन् तत् = in which there is wide space, spacious. लोकं has been put in for metre; in other Ṛks. उरु अन्तरिक्षं is the expression. The Ṛk.

has a modern look. अस्मिन् कामे = in this desire (for victory). These two words, put in for making up the necessary number of syllables, spoil the metre all the same. The last quarter is metrically very defective.

(40) नृचक्षा एष दिवो मध्य आस्त आपप्रिवान् रोदसी अन्तरिक्षम्। स विश्वाचीरभि चष्टे घृताचीरन्तरा पूर्वमपरं च केतुम् (१० १३९/२)= This eye of the gods (नृचक्षाः) halts (आस्ते) in the centre of heaven (दिवः मध्ये), filling entirely (आपप्रिवान्) both heaven and earth (रोदसी) and also the mid-region (अन्तरिक्षं). He beholds (अभि चष्टे) the ghee-bright (घृताचीः) and all-illumining (विश्वाचीः) Dawns and also the early (पूर्वं) and the late (अपरं) banner (केतुं) of the gods between (अन्तरा) heaven and earth.

नृणां देवानां चक्षाः नृचक्षाः . घृतवत् अञ्चन्ति शोभन्ते ताः. Ghee made from cow's butter has a fine yellow hue. The Dawn looks like such ghee. विश्वम् अञ्चन्ति ताः = The Dawns illumine all. Agni appears early in the morning and also late at night. He is thus the early and late banner of the gods. He shines between heaven and earth.

(4ı) सविता यन्त्रैः पृथिवीमरम्णादस्कम्भने सविता द्यामदृंहत् । अश्वमिवाधुक्षद्धुनिमन्तरिक्षमतूर्तं बद्धं सविता समुद्रम् (१० १४९/१). The earth was a ıunaway whom Savitṛ fixed (अरम्णात्) with ropes (यन्त्रैः). S. fixed (अदृंहत्) Dyaus in space where there was no pillar (अस्कम्भने) to support it. S. milked the mid-region, a sea fixed in immovable (अतूर्तं) space.

यम् (to restrain) + त्रं = यन्त्रं = that which stops, a rope. अस्कम्भने = अवंशे. cf. अवंशे द्यामस्तभायद्बृहन्तं (२ १५/२). The mid-region is a sea that is fixed or tied (बद्धं) in space. तुर् + तं = तूर्तं. तुर्= to injure, to hasten. Space can never be injured or it does not move. The mid-region is compared to a horse, as both are tied, the one in space and the other in a stable. धुनि was the name of an enemy of Indra. It is also used of the Maruts who are called धुनयः. The word may mean cloudy. The cloudy sky is milked of its watery contents.

(42) त्वमिन्द्रासि वृत्रहा व्यन्तरिक्षमतिरः। उद् द्यामस्तभ्ना ओजसा (१०१५३३) = हे इन्द्र त्वं वृत्रहा असि। अन्तरिक्षं त्वं वि अतिरः। ओजसा द्याम् उद् अस्तभ्नाः. वि + अतिरः = gavest back. cf. 29. अन्तरिक्षं= द्यां.

(43) सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्। दिवं च पृथिवीं चान्तरिक्षमथो स्वः (१०१९०३) = The Creator (धाता) constructed (अकल्पयत्) the Sun and the Moon as before; also heaven, earth, the aerial region, and the Sun. What is स्वर्? दिवं is there; so also सूर्य.

The Sun and the Moon are hardly ever coupled in the old portions of the Ṛgveda. The language and the thought are modern.

अन्तरिक्षा.

(44) आ जनाय द्रुह्वणे पार्थिवानि दिव्यानि दीपयोऽन्तरिक्षा। तपा वृषन् विश्वतः शोचिषा तान् ब्रह्मद्विषे शोचय क्षामपश्च (६२२८) = हे वृषन् अग्ने द्रुह्वणे जनाय पार्थिवानि दिव्यानि अन्तरिक्षा अन्तरिक्षाणि च वस्तूनि स्थलानि वा आदीपयः प्रज्वलय। तान् द्रुह्वणः जनान् विश्वतः शोचिषा तप। ब्रह्मद्विषे क्षाम् अपश्च शोचय. आ = विश्वतः = on all sides. दीप्, तप्, शुच् = set on fire, make fiery-hot. द्रुह् + वन् = one that hates. शोचिषा = with flames. ब्रह्माणि द्वेष्टि असौ ब्रह्मद्विट्. अन्तरिक्षा used as an adjective. It should be अन्तरिक्ष्या. Vide 95 and 96.

(45) एते त्ये भानवो दर्शतायाश्चित्रा उषासो अमृतास आगुः। जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः (७७५३) = दर्शतायाः दर्शनीयायाः उषासः उषसः एते त्ये ते चित्राः ज्वलन्तः अमृतासः अमृताः भानवः आगुः आगताः। दैव्यानि व्रतानि जनयन्तः अन्तरिक्षा अन्तारिक्षाणि आपृणन्तः आपूरयन्तः ते वि अस्थुः तिष्ठन्ति.

दर्शता = worthy of being looked at, beautiful. उषासः = उषसः. चित् (to burn, to blaze) + राः = चित्राः. दैव्यानि व्रतानि जनयन्तः = producing i. e. giving rise to acts intended to please the gods such as sacrifices. अन्तरिक्षा = heaven; as the Dawn rises in heaven. वि + अस्थुः = stand or shine in different directions.

अन्तरिक्षाणि.

(46) वि सुपर्णो अन्तरिक्षाण्यख्यद्गभीरवेपा असुरः सुनीथः। क्वेदानीं सूर्यः कश्चिकेत कतमां द्यां रश्मिरस्याततान (१ ३५/७) = The eagle (सुपर्णः), rich (असुरः = सुनीथः) looked (वि + अख्यत्) at the heavens (अन्तरिक्षाणि). Where is the Sun now ? Who knows ? Which heaven does his beam extend ?

From कतमां द्यां it is clear that अन्तरिक्षाणि means heavens. The Sun is an eagle because he is on high. वि + ख्या = to see, to look at. गभीरं वेपः यस्य सः = whose praise (वेपस्) is deep. वेपस् = a praise, from विप् to praise. सु + नीथः=possesed of wealth (नीथं).

(47) न द्याव इन्द्रमोजसा नान्तरिक्षाणि वज्रिणम्। न विव्यचन्त भूमयः (८ ६/१५). Neither the heavens (द्यावः) nor the aerial regions (अन्तरिक्षाणि) nor the earths measure or equal Indra, the thunder-bearer. व्यच् = to spread wide, to occupy, to fill.

(48) न यं विविक्तो रोदसी नान्तरिक्षाणि वज्रिणम्। अमादिदस्य तित्विषे समोजसः (८ १२/२४) = यं वज्रिणं रोदसी द्यावापृथिव्यौ न विविक्तः अन्तरिक्षाणि न विविचुः अस्य तस्य इत् एव ओजसः अमात् संतित्विषे जगत्.

विव्यच् by samprasārana becomes विविच्. विविच् + तः = विविक्तः. ओजस् = अम = strength. त्विष् = to grow strong. तित्विषे = (the world) grows strong (by his strength); or does त्विष् mean to tremble ? Probably समोजसः is a compound and means possessed of strength. समोजसः अस्य अमात् सर्वं तित्विषे बलयुक्तं भवति.

(49) गिरीरज्रान् रेजमानाँ अधारयद् द्यौः क्रन्ददन्तरिक्षाणि कोपयत्। समीचीने धिषणे विष्कभायति वृष्णः पीत्वा मद उक्थानि शंसति (१० ४४/८) = Indra steadied (अधारयत्) mountains (गिरीन् = अज्रान्) which were trembling (रेजमानान्). Heaven (द्यौः) began to roar (through fear). He made the heavens tremble (कोपयत्). He props heaven and earth that travel together (समीचीने) by drinking (पीत्वा) powerful Sōma (वृष्णः) and getting intoxicated. (Hence the devotee) sings (शंसति) his praises (उक्थानि); or उक्थानि

उक्थ्यानि वीरकर्माणि मदः शंसति = The inspitatlon prescribes to Indra praiseworthy acts of bravery.

अन्तरिक्षाणि = द्यौः. रेज् and कुप् = to tremble. द्यौः क्रन्दत् ought to be द्यां क्रन्दत्; as it is, the style is faulty. धिषणे = द्यावापृथिव्यौ. समीचीने=travelling (अञ्च् to go) together. मद उक्थानि शंसति simply fills up the Pāda.

(50) स्वर्णरमन्तरिक्षाणि रोचना द्यावाभूमी पृथिवीं स्कंम्भुरोजसा। पृक्षा इव महयन्तः सुरातयो देवाः स्तवन्ते मनुषाय सूरयः (१०$\frac{६}{४}$^{५}) = देवाः ओजसा स्वर्णरादीन् स्कम्भुः। सुरातयः सूरयः देवाः मनुषाय मनुष्येण स्तवन्ते स्तूयन्ते.

स्वर्णर, अन्तरिक्षाणि, रोचना, all mean heaven. पृथिवीं is redundant as द्यावाभूमी is there. The composer of the Ṛk has put together these names for filling up the metre. पृक्षाः इव = पृक्षवन्तः धनिनः इव = like rich men? महयन्तः = ददतः =सुरातयः= making gifts. मनुषाय is a wrong mongrel word as I have said in the article on मनुस्. The composition is clumsy.

अन्तरिक्षेण

(51) वेदा यो वीनां पदमन्तरिक्षेण पतताम्। वेद नावः समुद्रियः (१$\frac{२}{७}$^{५})=अन्तरिक्षेण पततां वीनां पदं यः वेद। समुद्रियः नावः यः वेद.

पत् = to fly. अन्तरिक्षेण for अन्तरिक्षे is idiomatic. Vide 52. वीनां = of birds; Lat avis a bird. There can be no foot-prints in space, as we think. But Varuṇa sees them even there. समुद्रियः = sea-faring. समुद्रियाः (which also is found in RV.) seems to be the correct form. समुद्रियाः was probably shortened to समुद्रियः for metre here and in सो अर्णवो न नद्यः समुद्रियः (१$\frac{५}{५}$^{५}) and सिन्धुरापः समुद्रियः (१०$\frac{६}{१}$$\frac{५}{२}$). राजा देवः समुद्रियः (९$\frac{१०}{१}$^{७}) is correct.

(52) दिवा यान्ति मरुतो भूम्याग्निरयं वातो अन्तरिक्षेण याति। अद्भिर्याति वरुणः समुद्रैर्युष्माँ इच्छन्तः शवसो नपातः (१$\frac{१६}{१४}$^{१}). दिवा यान्ति = move along heaven i. e. they live and move in heaven. अग्निः भूम्या = Agni on earth. अद्भिः = समुद्रैः =(Varuṇa lives) in water. The 4th Päda is irrelevant. हे शवसः बलस्य नपातः पुत्राः ऋभवः

एते देवाः युष्मान् इच्छन्तः इच्छन्ति. The whole Ṛk. is irrelevant in the Sūkta.

(53) आक्ष्णयावानो वहन्त्यन्तरिक्षेण पततः। धातारः स्तुवते पयः(८ $\frac{७}{३५}$) = अन्तरिक्षेण पततः पतन्तः धातारः दातारः स्तुवते पयः उदकम् आवहन्ति. आक्ष्णयावानः = आ + अक्ष्णयावानः.

अक्ष्णयावानः? एवयावन् and शुभंयावन् are adjectives used of the Maruts. We have also अक्ष्णयाध्रुक् (१ $^{१}\frac{३}{२}^{२}$). अक्ष्ण most probably means a horse swift like a glance. अक्ष्णेन याति असौ अक्ष्णयाः अथवा अक्ष्णयावा. The Maruts ride horses. दिवा यान्ति मरुतः shows that अन्तरिक्ष means heaven. But the Maruts may fly in mere space or in the mid-region.

(54) तनूनपात्पवमानः शृङ्गे शिशानो अर्षति। अन्तरिक्षेण रारजत् (९ $\frac{५}{२}$).

शिशानः = whetting (his horns). शृङ्गे शिशानः is said of Agni. अर्षति = runs, rushes. रारजत् ought to be रराजत्. There is no root like रज् in RV. राज् = to rule. रराजत् = राजति = rules. Sōma rules in heaven. अन्तरिक्षेण ought to be अन्तरिक्षे. All the Āprī Sūktas are artificial. This one is most so. The whole composition is laboured and is a failure.

(55) अयुक्त सूर एतशं पवमानो मनावधि। अन्तरिक्षेण यातवे (९ $^{६}_{८}$^{३}) = सूरः पवमानः अन्तरिक्षेण यातवे मनौ अधि एतशम् अयुक्त = The Sun, namely, Sōma, yokes his gold-hued horse (एतशं) in Manu's palace (मनौ अधि) in order to march along heaven. एतश is the name of the horse of the Sun. मनौ आधि = in Manu's palace. Sôma-juice is extracted in Manu's or man's house. It runs towards the strainer and through it towards the jar. These two are heaven.

(56) राजा मेधाभिरीयते पवमानो मनावाधि । अन्तरिक्षेण यातवे (९ $\frac{६}{१}\frac{५}{६}$) = King Sôma goes (ईयते) with wealth (मेधाभिः). This is a senseless variation of the preceding.

(57) अन्तरिक्षेण पतति विश्वा रूपावचाकशत्। मुनिर्देवस्य देवस्य सौकृत्याय सखा हितः (१० $^{१}\frac{३}{४}^{६}$) = Muni flies (पतति) in heaven and

observes all creatures (रूपा = रूपाणि). He is a friend of every god, placed or designed for good deeds.

सुकृतं = a good deed. सुकृतांना समूहः सौकृत्यं = a multitude of good deeds. Who is this Muni ?

अन्तरिक्षात्

(58) विश्वान् देवाँ आ वह सोमपीतयेऽन्तरिक्षादुषस्त्वम्। सास्मासु धा गोमदश्वावदुक्थ्यमिषो वाजं सुवीर्यम् (१ $\frac{४}{१}\frac{८}{२}$) = हे उषः त्वं विश्वान् देवान् सोमपीतये अन्तरिक्षात् आवह। सा त्वम् अस्मासु गोमत् अश्ववत् सुवीर्यम् उक्थ्यं वाजम् इषः धाः. वीराणां समूहः वीर्यं = a lot of brave sons.

Wealth (वाजं) containing cows, horses and brave sons; such wealth would be the talk of all (उक्थ्यं). गोमत् अश्ववत् is neuter while वाजं is masculine and इषः (wealth) is feminine and plural. इषः may have originally been उषः. सोमपीतये and गोमदश्व–वत् spoil the metre and are redundant.

(59) अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यन्तरिक्षात्। स्वराळिन्द्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे रणाय (१ $\frac{६}{१}\frac{१}{९}$) = अस्य इन्द्रस्य इत् एव महित्वं महत्त्वं दिवः पृथिव्याः अन्तरिक्षात् परि प्र प्रकर्षेण अतिशयेन रिरिचे अधिकं भवति। स्वराट् इन्द्रः दमे आ मध्ये विश्वानि हवींषि गूर्तानि यस्मै सः स्वरिः अरिणा हविषां दात्रा यजमानेन युक्तः अमत्रः सोमेन पूर्णः रणाय ववक्षे उह्यते.

इत् = एव. रिरिचे = exceeds. परि = from. स्व + राज् =ruling by his own strength. दमे आ = in every house. विश्वगूर्तः = to whom all offerings are given. सु (shows possession) + अरिः (a sacrificer). अमत्रं = a pot full of Sōma; अमत्रः=Indra who empties such pots. वह् by reduplication ववह्. ववह् + स् (of लेट्) + ए = ववक्षे.

(60) एको द्वे वसुमती समीची इन्द्र आ पप्रौ पृथिवीमुत द्याम्। उतान्तरिक्षादभि नः समीक इषो रथीः सुयुजः शूर वाजान् (३ $\frac{३}{१}\frac{०}{१}$) =वसुमती वसुमत्यौ समीची समीच्यौ पृथिवीम् उत अपि च द्याम् इमे द्वे एकः आ पप्रौ पूरयति। उत अपि च हे शूर रथाः त्व सुयुजः अश्वान् रथे युक्त्वा वाजान् धनानि नः अस्माकं समीके समीपे अन्तरिक्षात् अभि इषः प्रेषय.

अन्तरिक्षं = heaven ? or the aerial region ? Perhaps **उत** would settle the question. **पृथिव्याः दिवः उत अन्तरिक्षात् वाजान् अभि इषः.**

(61) **प्र मात्राभी रिरिचे रोचमानः प्र देवेभिर्विश्वतो अप्रतीतः । प्र मज्मना दिव इन्द्रः पृथिव्याः प्रोरोर्महो अन्तरिक्षादृजीषी** (३$\frac{४६}{३}$) = **रोचमानः अप्रतीतः ऋजीषी इन्द्रः मात्राभिः मात्राभ्यः विश्वतः विश्वेभ्यः देवेभिः देवेभ्यः दिवः पृथिव्याः उरोः महः महतः अन्तरिक्षात् मज्मना बलेन प्र अतिशयेन रिरिचे अधिको भवति.**

मात्राभी रिरिचे = मात्राभिः रिरिचे. मात्राभिः = मात्राभ्यः. Indra exceeds all measures. **अप्रतीतः = अ + प्रति + इतः** = not confronted, unopposed. **मज् + मन्. मज् ?** There is no **मज्** in RV; yet it must have existed once. **ऋजीषी** = who has performed mighty deeds (**ऋजीष**). **महः** really belongs to **दिवः** but has been placed after **उरोः** for metre.

(62) **आ यात मरुतो दिव आन्तरिक्षादमादुत । माव स्थात परावतः** (५$\frac{५३}{८}$) = **हे मरुतः दिवः उत अपि वा अमात् बलवतः अन्तरिक्षात् परावतः वा आ यात । मा अव स्थात तिष्ठत.**

आन्तरिक्षात् = आ + अन्तरिक्षात्. आ + यात. अमः = strength. **अमात्** = from the strong aerial region. **परावत्** was a part or a story of heaven. So **अन्तरिक्ष** may be heaven itself.

(63) **निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इन्द्रियो रसः । निरन्तरिक्षादधमो महामहिं कृषे तदिन्द्र पौंस्यम्** (८$\frac{३}{२०}$) = **अग्नयः निः निःशेषम् अतिशयेन रुरुचुः । सूर्यः उ अपि निः रुरोच । इन्द्रियः इन्द्रजुष्टः सोमः रस. निः रुरोच । हे इन्द्र त्वं महां महान्तम् अहिम् अन्तरिक्षात् निर् अधमः । हे इन्द्र तत् पौंस्यं कृषे करोषि.**

रुच् =to shine. **धम्** = to blow off, drive away. **कृ + से = कृषे = करोषि. पौंस्यं** = a manly deed. **अन्तरिक्ष** = heaven ?

(64) **आ यातं नहुषस्पर्यान्तरिक्षात्सुवृक्तिभिः । पिबाथो अश्विना मधु कण्वानां सवने सुतम्** (८$\frac{८}{३}$) = **हे अश्विनौ नहुषः परि अन्तरिक्षात् परि सुवृक्तिभिः स्तुतीः श्रोतुम् आ यातम् । कण्वानां सवने सुतं मधु पिबथः पिबतम्.**

नहुष् was most probably another name of Manus who dwelt in heaven. **नहुषः = अन्तरिक्षात्. आ** (in **आन्तरिक्षात्**) + **यातं.**

(65) आ नो यातं दिवस्पर्यान्तरिक्षादधप्रिया । पुत्रः कण्वस्य वामिह सुषाव सोम्यं मधु (८ ८/४).

अन्तरिक्षात् = दिवः. परि = from. अधप्रिया ? अध = अथ. प्रिया= प्रियौ (अश्विनौ). But we have कधप्रिये (१ ३०/२०) and कधप्रियः (१ ३८/१). अधप्रिया, कधप्रियः and कधप्रिये are unintelligible. Perhaps अध= अह = पृथिवी. पृथिवी प्रिया ययोः तौ = to whom the earth is dear. सोम्यं = सोमरूपं सोममयं वा. सु by reduplication सुषु.

(66) पवमाना दिवस्पर्यन्तरिक्षादसृक्षत । पृथिव्या अधि सानवि (९ ६३/२७) = पवमानाः सोमाः दिवः अन्तरिक्षात् परि पृथिव्याः सानवि सानौ अधि असृक्षत.

Sōma ran from heaven to the top of the earth. सृज् = to run, to flow. अन्तरिक्षात् = दिवः. सानवि = सानौ.

(67) अप ज्योतिषा तमो अन्तरिक्षादुद्नः शीपालमिव वात आजत् । बृहस्पतिरनुमृश्या वलस्याभ्रमिव वात आ चक्र आ गाः (१० ६८/५) = बृहस्पतिः ज्योतिषा अन्तरिक्षात् तमः अप आजत् । कथम् । इव यथा वातः उद्नः उदकस्य शीपालम् अभ्रम् अप अजाति तथा । बृहस्पतिः अनुमृश्य वलस्य गाः आ चक्रे स्वसंनिधौ स्थापयामास.

शीपालं ? The word occurs here only. अनुमृश्य = roaring. B. we often find roaring and frightening Vala into yielding his cows; cf. वलं रुरोज॰ रवेण । बृहस्पतिरुस्रिया हव्यसूदः कनिक्रदद्वावशती-रुदाजत् (४ ५०/५) = बृहस्पतिः रवेण वलं रुरोज । सः कनिक्रदत् । हव्यसूदः वावशतीः उस्रियाः गाः उत् आजत्. Also मर्मृशदभिश्वसन् स्तनयन्नेति नानदत् (१ १४०/५); here मर्मृशत्, अभिश्वसन्, स्तनयन् and नानदत् all mean roaring, bellowing.

(68) आग्ने वह वरुणमिष्टये न इन्द्रं दिवो मरुतो अन्तरिक्षात् । सीदन्तु बर्हि-र्विश्व आ यजत्राः स्वाहा देवा अमृता मादयन्ताम् (१० ७०/११)= हे अग्ने नः अस्मा-कम् इष्टये यज्ञाय अस्मभ्यं धनं दातुं वा दिवः अन्तरिक्षात् वरुणम् इन्द्रं मरुतः आवह । विश्वे यजत्राः बर्हिः आसीदन्तु । अमृताः देवाः स्वाहा सोमपानेन माद-यन्तां हृष्यन्तु.

यजत्राः = हविरर्हाः. स्वाहा = सोमपानेन.

(69) प्राक्तुभ्य इन्द्रः प्र वृधो अहभ्यः प्रान्तरिक्षात्प्र समुद्रस्य धासेः । प्र वातस्य प्रथसः प्र ज्मो अन्तात्प्र सिन्धुभ्यो रिरिचे प्र क्षितिभ्यः (१० ८९/११)

अक्तुभ्यः = than nights. अहभ्यः = than days. धासेः ? धासि means nourishing food, an offering, light. What it means here I cannot say; perhaps it means extent. समुद्रस्य धासेः = than the extent of the sea. प्रथस् means wealthy. Here probably it means the utmost reach (of Vāta). ज्मः पृथिव्याः अन्तात् = than the uttermost end of the earth. सिन्धुभ्यः = than rivers. क्षितिभ्यः = than the 5 Āryan tribes. Here there is no rising series of comparisons. वृधः qualifies इन्द्रः and means growing. प्र = अतिशयेन. रिरिचे = exceeds.

(70) सूर्यो नो दिवस्पातु वातो अन्तरिक्षात्। अग्निर्नः पार्थिवेभ्यः (१० १५८/१).

दिवः = दिव्यात् अंहसः = from trouble caused by heaven. अन्तरिक्षात् = अन्तरिक्षे भवात् अंहसः. पार्थिवेभ्यः अंहोभ्यः. अंहस् (= trouble) understood.

अन्तरिक्षस्य.

(71) आ मनीषामन्तरिक्षस्य नृभ्यः स्रुचेव घृतं जुहवाम विद्मना। तरणित्वा ये पितुरस्य सश्चिर ऋभवो वाजमरुहन् दिवो रजः (१ ११०/६) = इव यथा वयं स्रुचा घृतं जुहुमः तथा वयम् अन्तरिक्षस्य नृभ्यः ऋभुभ्यः मनीषां स्तुतिम् आ जुहवाम जुहुमः। ये विद्मना तरणित्वा तरणित्वेन अस्य पितुः वाजं सश्चिरे। ऋभवः दिवः रजः लोकम् अरुहन्.

विद्मना=तरणित्वा = by performing miracles. अस्य पितुः दिवः वाजं धनं सश्चिरे. अस्य पितुः perhaps refers to अन्तरिक्ष i. e. द्यौ who is the father of all. The Ṛbhus obtained (सश्चिरे) wealth from this father of all. I have not yet determined the sense of सश्च्.

अन्तरिक्षे.

(72) ये ते पन्थाः सवितः पूर्व्यासोऽरेणवः सुकृता अन्तरिक्षे। तेभिर्नो अद्य पथिभिः सुगेभी रक्षा च नो अधि च ब्रूहि देव (१ ३५/११) = (Come down) to us (नः) today (अद्य), O god Savitṛ, by those (तेभिः=तैः) easy (सुगेभिः = सुगैः) paths (पथिभिः) which have been well-made (सुकृताः) for thee (ते=तुभ्यं) in heaven (अन्तरिक्षे), which are ancient (पूर्व्यासः =

पूर्व्याः) and dustless (अरेणवः). Protect (रक्षा) and declare (अधिब्रूहि) us guiltless.

अधि + ब्रू = to declare guiltless. A verb is wanted in the 3rd Pāda; that verb may be आयाहि or नय. Take us up along those paths or come down to us by those paths.

(73) कस्य ब्रह्माणि जुजुषुर्युवानः को अध्वरे मरुत आ ववर्त । श्येनाँ इव ध्रजतो अन्तरिक्षे केन महा मनसा रीरराम (१ १६५/२ ५). कस्य ० युवानः = whose praises do these youngsters (युवानः) are enjoying (जुजुषुः) ? को० ववर्त = who has drawn them down to his sacrifice ? आ+वृत् = to induce, to bring or draw down. श्येनाँ० रीरराम = with what great or mighty (महा = महता) prayer or charm (मनसा) shall we stop (रीरराम) these Maruts that are flying fast or darting fast (ध्रजतः) in space like so many eagles (श्येनान्) ?

(74) अध्वर्यवो यो दृभीकं जघान यो गा उदाजदप हि वलं वः । तस्मा एतमन्तरिक्षे न वातमिन्द्रं सोमैरोर्णुत जूर्न वस्त्रैः (२ १४/२) = O givers of offerings (अध्वर्यवः), give this Sōma (एतं) to him (तस्मै) who has killed (जघान) Dṛbhīka, discovered (अप + वः) Vala and driven out (उत्+आजत्) his cows. Cover Indra over (आ+ऊर्णुत) with Sōma.

The simile अन्तरिक्षे न वातं cannot be connected with इन्द्रं सोमैः ओर्णुत. Perhaps वातं न इव अन्तरिक्षे ध्रजन्तम् एतं सोमं दत्त may be the meaning. Give him this Sōma that is rushing towards the strainer or the water-jar. Or Indra perhaps is compared to Vāta. जूः occurs here only. जुवः (१ १३४/१ ४) means speedy horses and is the plural of जूः. जूः जुवौ जुवः etc. may be the declension. But what has a horse to do here ? जूः may mean a young damsel. Just as they muffle a young damsel with a heap of garments. Cf. यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव (८ २६/१३). जूः यूः युवतिः यथा वस्त्रैः आत्मानम् ऊर्णुते तथा इन्द्रम् ओर्णुत. जूः = an old man, says Sāyaṇa.

(75) ऊर्ध्वो ह्यस्थादध्यन्तरिक्षेऽधा वृत्राय प्र वधं जभार । मिहं वसान उप हीमदुद्रोत्तिग्मायुधो अजयच्छत्रुमिन्द्रः (२ ३०/३) = इन्द्रः अन्तारिक्षे अधि ऊर्ध्वः हि अस्थात् । अध अथ वृत्राय वधं वज्रं प्र जभार । मिहं वसानः इन्द्रः हि ईम् एतं वृत्रं प्रति अदुद्रोत् । तिग्मायुधः इन्द्रः शत्रुम् अजयत्.

वधं = (his) death-dealing thunder-bolt. मिहं वसानः = muffling himself in a cloud. अदुद्रोत् = ran up (to him). द्रु = to run. तिग्म from तिज् to sharpen.

(76) दिव्यन्यः सदनं चक्र उच्चा पृथिव्यामन्यो अध्यन्तरिक्षे । तावस्मभ्यं पुरुवारं पुरुक्षुं रायस्पोषं वि ष्यतां नाभिमस्मे (२ ४०/४) = अन्यः पृथिव्यां दिवि उच्चा सदनं चक्रे। अन्यः अन्तरिक्षे अधि सदनं चक्रे । तौ सोमापूषणौ अस्मभ्यं पुरुवारं पुरुक्षं रायः पोषं विष्यताम्। अस्मे अस्मभ्यं नाभिं च विष्यताम्. The strainer is called अन्तरिक्ष here. So Sōma makes his high station in the अन्तरिक्ष; while Pūshan makes it in wide heaven. पृथिव्यां seems to qualify दिवि. Or सोमः पृथिव्याम् अन्तरिक्षे अधि सदनं चक्रे. Pūshan dwells in heaven; Sōma in the strainer or the vessel on earth. This अन्तरिक्ष also represents heaven on earth. वार, क्षु, रायः, पोष and नाभि all mean wealth. पुरु वारं यस्मिन् तं पुरुवारं. पुरु क्षु यस्मिन् तं पुरुक्षुं. वि+सो = to loosen, to relax, to give.

(77) उरौ वा ये अन्तरिक्षे मदन्ति दिवो वा ये रोचने सन्ति देवाः। ऊमा वा ये सुहवासो यजत्रा आयेमिरे रथ्यो अग्ने अश्वाः (३ ६/८) ॥ ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा (३ ६/९) = Come down (आयाहि) with these gods (एभिः) seated in the same chariot or in different chariots, goods that lead a joyous life (मदन्ति) in the wide ærial region (अन्तरिक्षे) or those that live (सन्ति) in the bright region (रोचने) of heaven (दिवः) or those that are within call (i. e. on this earth). Probably यजत्राः qualifies all the ३ ये).

Perhaps earthly gods were called ऊमाः. आ + यम् = to restrain, to yoke. रथ्याः = capable of drawing chariots or fit to be yoked to them. आयेमिरे रथ्यो अग्ने अश्वाः and नानारथं seem interpolated. ऐभि०र्वाङ् is really the fourth quarter.

(78) ये वावृधन्त पार्थिवा य उरावन्तरिक्ष आ। वृजने वा नदीनां सधस्थे वा महो दिवः (५ ५२/७).

वृध् = to be fat by consuming offerings, to delight, to live. पार्थिवाः = earthly gods. अन्तरिक्षे आ मध्ये. नदीनां वृजने ? सधस्थे = स्थाने. Sometimes सधस्थ itself means heaven.

(79) यदद्य स्थः परावति यदर्वावत्यश्विना । यद्वा पुरू पुरुभुजा यदन्तरिक्ष आ गतम् (५ ७३/१) = wherever, O Aświns, you happen to

be today, whether in high heaven (**परावति**) or down (**अर्वावति**) on this earth, O possessors of immense wealth (**पुरुभुजा**), or in the aerial region (**अन्तरिक्षे**), come.

पुरु भुक् धनं ययोः तौ पुरुभुजौ. **पुरू** dual of **पुरु.** **पुरू** = O wealthy gods.

(80) **इमामू ष्वासुरस्य श्रुतस्य महीं मायां वरुणस्य प्र वोचम् । मानेनेव तस्थिवाँ अन्तरिक्षे वि यो ममे पृथिवीं सूर्येण** (५ ८५/५) = **श्रुतस्य प्रख्यातस्य आसुरस्य असुरपुत्रस्य वरुणस्य इमां महीं महतीं मायाम् उ सु प्रवोचं स्तौमि । यः अन्तरिक्षे तस्थिवान् सूर्येण मानेन इव पृथिवीं विममे.** **मानेन** = with a measuring rod. The Sun is the rod with which Varuna measures (**विममे**) the earth. This is his mighty miracle (**मायां**). **प्रवोचं** = have loudly praised. Where does V. stand while measuring and what does he measure? **पृथिवी** seems to mean wide heaven. V. takes his stand even in heaven. **अन्तरिक्ष** and **पृथिवी** both probably mean heaven. Where is the miracle in measuring the earth ?

(81) **अध स्मा नो वृधे भवेन्द्र नायमवा युधि । यदन्तरिक्षे पतयन्ति पर्णिनो दिद्यवस्तिग्ममूर्धानः** (६ ४६/११) = **अध अथ यत् यदा अन्तरिक्षे पर्णिनः तिग्ममूर्धानः दिद्यवः पतयन्ति उड्डयन्ते तदा हे इन्द्र नः अस्माकं वृधे भव । युधि नायम् अव.** **पर्णिनः** = feathered. **दिद्यवः** = arrows. **दिद्यु** from **द्यु** =to cut, to pierce ? **तिग्माः मूर्धानः येषां ते** = whose heads are sharp. **मूर्धनः** must have been the pronunciation for the sake of the metre. **नायं ?** **नी** = to make offerings, to praise ; **नीथ** = an offering, a praise, wealth. **नायः** = one that praises or makes offerings; or **नायम् अव** = give wealth.

(82) **विश्वे देवाः शृणुतेमं हवं मे ये अन्तरिक्षे य उप द्यवि ष्ठ । ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् बर्हिषि मादयध्वम्** (६ ५२/१३)=**हे विश्वे देवाः मे मम हवम् आह्वानं शृणुत । ये यूयम् अन्तरिक्षे स्थ अथवा द्यवि दिवि उप स्थ । ये अग्निः जिह्वा येषां तादृशाः । ये वा साक्षात् यजत्राः हविर्ग्रहणाय समर्थाः । ते सर्वे यूयम् आस्मिन् बर्हिषि आसद्य सोमपानेन मादयध्वं हृष्टाः भवत.** **उप** is redundant.

(83) **यास्ते पूषन् नावो अन्तः समुद्रे हिरण्ययीरन्तरिक्षे चरन्ति । ताभिर्यासि दूत्यां सूर्यस्य कामेन कृत श्रव इच्छमानः** (६ ५८/३) = **हे पूषन् याः ते तव**

हिरण्ययीः हिरण्मय्यः नावः समुद्रे अन्तरिक्षे अन्तः चरान्ति ताभिः कामेन कृतः श्रवः इच्छमानः सूर्यस्य दूत्यां यासि. Pūshan, it seems, fell in love with the Sun's daughter and wanted to win her. The Sun prescribed a condition that he was to bring Sūryā an immense amount of wealth. P. sought for wealth within the sea and the aerial region but perhaps he could not acquire the prescribed amount. दूत्यां = the work imposed on Pūshan who was to be the Sun's agent (दूत) and who in that capacity had to wander everywhere in search of wealth. Sāyaṇa gives a different story. The Sun was engaged in fighting with the demons. His wife desired his return to satisfy her passion. But unable to gratify her, he commissioned Pūshan to solace his wife. कृत is the largest amount of wealth. कृतश्रवः (कृतेन युक्तं श्रवः = the largestpossible wealth) may have been a compound. P. went in quest of this amount through incitement of love. अन्तरिक्षे = समुद्रे ?

(84) ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः। अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य (७३१/३) = हे ज्मयाः ज्मनि गच्छन्तः वसवः वसुमन्तः देवाः अत्र ज्मनि पृथिव्यां रन्त। हे शुभ्राः शोभमानाः यूयम् उरौ अन्तरिक्षे मर्जयन्त मृष्टाः स्नाताः शोभावन्तः भवत। उरुज्रयः वेगवन्तः यूयं पथः अर्वाक् कृणुध्वम्। नः अस्माकम् अस्य जग्मुषः गच्छतः दूतस्य अग्नेः श्रोता शृणुत. If the gods are moving about on earth (ज्मयाः), then they should halt (रन्त). If for the sake of good, fine looks, they are washing themselves in heaven, they should turn their paths or steps downwards. They should listen to the messenger, Agni.

रम् (= to halt) + त = रन्त (imperative 2nd per. pl.). मृज् = to wash and make charming. शुभ् (= to look fair) + राः = शुभ्राः = handsome. कृणुध्वं = कुरुत. श्रु + त = श्रोत.

(85) यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु। नृम्णं तद्धत्तमश्विना (८१/३)= Give (धत्तं) us, O As'wins, whatever (यत् तत्) wealth (नृम्णं) lies in heaven, the aerial region and among (अनु) the 5 Āryan tribes i. e. on earth. जनान् अनु = जनेषु.

(86) **यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु । यद्वा स्वधाभि-रधितिष्ठथो रथमत आ यातमश्विना** (८ १०/६) = Come down (**आ यातं**), O As'wins, from (**अतः**) wherever you are, whether you are flying (**पतथः**) in the aerial region or in heaven and earth, or whether you are seated in your chariot with vessels of Sōma.

यद्वेमे = यत् + वा + इमे. अनु = मध्ये. रोदसी अनु = रोदस्योः. स्वधाभिः = with potfuls of Sōma.

(87) **यद्वासि रोचने दिवः समुद्रस्याधि विष्टपि । यत्पार्थिवे सदने वृत्रहन्तम यदन्तरिक्ष आ गहि** (८ ९७/५).

दिवः रोचने = दिवि. समुद्रस्य विष्टपि अधि. विष्टपि ? पार्थिवे सदने = पृथिव्याम्.

(88) **एष शुष्म्यसिष्यददन्तरिक्षे वृषा हरिः । पुनान इन्दुरिन्द्रमा** (९ २७/६) **= वृषा वृषबलः हरिः हिरण्यवर्णः शुष्मी बलवान् एषः इन्दुः इन्द्रम् आ प्रति इन्द्रार्थं पुनानः पूयमानः अन्तरिक्षे कलशे असिष्यदत् क्षरति. स्यद्** = to run, to flow.

(89) **सप्त स्वसॄररुषीर्वावशानो विद्वान् मध्व उज्जभारा दृशे कम् । अन्तर्येमे अन्तरिक्षे पुराजा इच्छन् वव्रिमविदत्पूषणस्य** (१० ५/५) **= अरुषीः प्रकाशमानाः सप्त स्वसॄः वावशानः कामयमानः विद्वान् अग्निः मध्वः उदकात् दृशे कं दर्शनाय जनाः पश्येयुः इति उदात्तहेतोः सूर्यम् उत् जभार जहार। पुराजाः पुरा जातः अग्निः अन्तरिक्षे दिवि अन्तर् येमे गतवान् । वव्रिं रूपं दातुम् इच्छन् पूषणस्य सूर्यस्य सूर्याय तं वव्रिं रूपम् अविदत्.**

Agni desires the company of the 7 bright sisters viz. the 7 waters who are his mothers. He sent up the Sun out of water into heaven to enable people to see. He goes into heaven and gives light to the Sun; or he seeks and obtains the lustre of the Sun.

Agni's illumining the Sun is a favourite idea with the Vedic poets. **पूषणस्य** occurs here only. It ought to be **पूष्णः**. The Sun's rising out of the ocean is a popular belief.

(90) **अग्निमुक्थैर्ऋषयो वि ह्वयन्तेऽग्निं नरो यामनि बाधितासः । अग्निं वयो अन्तरिक्षे पतन्तोऽग्निः सहस्रा परि याति गोनाम्** (१० ८०/५) = Ṛshis invoke (**विह्वयन्ते**) Agni by their praises or prayers. Trou-

bled (बाधितासः) on the road (यामनि) men (call on him for help). (Even) birds flying in air (call on him). Agni gives (परियाति) thousands (सहस्रा) of cows (गोनां).

The old idiom was अन्तरिक्षेण पत्.

(91) उभोभयाविन्नुप धेहि दंष्ट्रा हिंस्रः शिशानोऽवरं परं च । उतान्तरिक्षे परि याहि राजन् जम्भैः सं धेह्यभि यातुधानान् (१०$\frac{८७}{३}$) = हे उभयाविन् अग्ने अवरं परं च दंष्ट्रं शिशानः हिंस्रः त्वम् उभा उभौ दंष्ट्रौ उभे दंष्ट्रे उपधेहि। हे राजन् अन्तरिक्षे परि याहि । जम्भैः यातुधानान् अभि संधेहि.

उभयाविन् ? उभयाविनं (८$\frac{१}{२}$) qualifies इन्द्रं. विन् is a possessive termination. What is the उभय which Agni and Indra possess ? Is it the two rows of teeth ? or the store of wealth in heaven and earth ? दंष्ट्र is masculine and is the same as जम्भ (= a jaw). दंष्ट्रा *f.* is classical. We have दंष्ट्रैः in 2$\frac{१३}{४}$. उपधेहि = close the two rows of teeth and crush between them the sorcerers. परि = everywhere, all round. यातु = magic. यातुधानः = a store of magic, one full of magic, a sorcerer. अभि-संधेहि = surround, press (them) on all sides (with thy teeth). हिंस् + रः = हिंस्रः. शिशानः from शो or शा to whet.

(92) यत्रेदानीं पश्यसि जातवेदस्तिष्ठन्तमग्न उत वा चरन्तम् । यद्वान्त-रिक्षे पथिभिः पतन्तं तमस्ता विध्य शर्वा शिशानः (१०$\frac{८७}{६}$) = हे जातवेदः अग्ने इदानीं यत्र यत्र यातुधानं तिष्ठन्तं चरन्तं वा यद्वा अन्तरिक्षे पथिभिः पतन्तं पश्यसि तत्र तत्र शिशानः अस्ता त्वं तं शर्वा विध्य.

पथिभिः is not wanted. शिशानः requires an object like शरुं. शर्वा instr. sing. of शरु (= an arrow). अस् (= to throw) + तृ. अस्ता = an archer. विध्य = pierce (him).

(93) येन द्यौरुग्रा पृथिवी च दृळ्हा येन स्वः स्तभितं येन नाकः । यो अन्तरिक्षे रजसो विमानः कस्मै देवाय हविषा विधेम (१०$\frac{१२१}{५}$) = येन उग्रा पृथिवी च द्यौः दृळ्हा दृढीकृता येन स्वः स्तभितं येन नाकः स्ताभितः यः अन्तरिक्षे स्थित्वा रजसः विमानः निर्माता सः कः देवः । कस्मै देवाय वयं हविषा विधेम हविः अर्पयिष्यामः.

द्यौ, स्वर्, नाक and रजस् mean heaven. अन्तरिक्षे = in heaven or in space. Who measured (विमानः) heaven (रजस्) by taking his stand in heaven or in space. The whole Rk. seems to speak

of heaven only. Vide 80. उज् + र = उग्र. उज् must have existed once and meant to grow strong. स्तभ् = to prop up, to hold on high.

(94) **अन्तरिक्षे पथिभिरीयमानो न निविशते कतमच्चनाहः। अपां सखा प्रथमजा ऋतावा क स्विज्जातः कुत आ बभूव** (१०$^{१६८}_{३}$) = Vāta, always running (**ईयमानः**) or rushing along the paths in the aerial region, rests (**निविशते**) not on any (**कतमत्**) day (**अहः**) whatever (**चन**). The friend of waters (**अपां सखा**), the first-born (**प्रथमजाः**), possessed of water (**ऋतावा**), where indeed (**कस्वित्**) was he born and whence has he come? Or **कुत आ बभूव = कस्वित् जातः.**

कुतः आ = कुतः. **आ** = from. **पथिभिः** is not wanted.

अन्तरिक्ष्या

(95) **प्रवत्वतीयं पृथिवी मरुद्भ्यः प्रवत्वती द्यौर्भवति प्रयद्भ्यः। प्रवत्वतीः पथ्या अन्तरिक्ष्याः प्रवत्वन्तः पर्वता जीरदानवः** (५$^{५४}_{१}$).

प्रवत् = प्र + वत्. The word is feminine. It means a flowing, rushing stream and also an incline, a slope. **प्रवत्वती** = sloping, easy to pass along. The Maruts have an easy passage anywhere and everywhere. **प्रयद्भ्यः** = to them going with speed. **अन्तरिक्ष्याः** = aerial (paths). **जीरं स्तुत्यं दानु येषां** = (mountains) that have praiseworthy gifts.

(96) **स विश्वा दाशुषे वसु सोमो दिव्यानि पार्थिवा। पवतामान्तरिक्ष्या** (९$^{३६}_{५}$) = **स सोमः दाशुषे हविः दत्तवते विश्वा विश्वानि दिव्यानि पार्थिवा पार्थिवानि अन्तरिक्ष्या अन्तरिक्ष्याणि वसु वसूनि आ पवतां पवनेन ददातु. आ + पवतां** = may (he) give while being purified. Is it **आन्तरिक्ष्या** or **अन्तरिक्ष्या**? The 1st would be classical, the 2nd ancient. The 9th and the 10th Mandalas make an approach to modern Sanskrit. Therefore it is likely that the word is **आन्तरिक्ष्या.**

(97) **ते विश्वा दाशुषे वसु सोमा दिव्यानि पार्थिवा। पवन्तामान्तरिक्ष्या** (९$^{६४}_{६}$). Here we have **ते** and **सोमाः पवन्तां** while 96 has **सः** and **सोमः पवतां.** That is the only difference between the two.

अन्तरिक्षप्राः

(98) Savitr is **अन्तरिक्षप्राः** (७ ४५/२); so is Sōma (९ ८६/१४). Here **अन्तरिक्ष** is heaven. Sōma's garment is said to be **दिविस्पृशं** in the same Ṛk. (९ ८६/१४) which proves that **अन्तरिक्ष** is heaven.

अन्तरिक्षप्रां

(99) This adjective qualifies **इन्द्रं** (१ ५१/२). Indra subdued heaven and therefore occupied it. The word is used of Ûrvaśï (१० ९५/१७). She is also **रजसो विमानी** (१० ९५/१७). Both adjectives mean, who occupies heaven.

अन्तरिक्षसत्

(100) **वसुरन्तरिक्षसत्** (४ ४०/५) is said of Agni who, being born in heaven, must have a seat there.

अन्तरिक्षप्रुद्भिः ?

(101) **तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः । तमूहथुर्नौभिरात्मन्वतीभिरन्तरिक्षप्रुद्भिरपोदकाभिः** (१ ११६/३) = **हे अश्विना अश्विनौ न यथा ममृवान् कश्चित् रयिम् अव जहाति तथा तुग्रः भुज्युम् उदमेघे अव अहाः अजहात् । तदा अन्तरिक्षप्रुद्भिः अपोदकाभिः आत्मन्वतीभिः नौभिः तम् युवाम् ऊहथुः. उदमेघे = समुद्रे (सायणः).** The word **मेघ** occurs once again (१ ३६१/८) and means a drink (of Sōma). Tugra, it seems, was drunk and in a fit of inebriation or delirium tremens cast his son into the sea, as one on the brink of death and therefore not being quite conscious gives away his wealth to a stranger. **उदमेघ** = after drinking **उद** which may mean a large quantity of a liquid. **उदमेघे** corresponds to **ममृवान्**. The As'wins fetched B.out by using water-tight (**अपोदकाभिः**), strong (**आत्मन्वतीभिः**) or living, boats. **अन्तरिक्षप्रुद्भिः ? उदप्रुत्** means swimming in water (४ ४५/४ । ९ १०८/७). So **अन्तरिक्षप्रुत्** =swimming or floating in the sea, going deep into the sea and yet not admitting even a drop of water. **अन्तरिक्ष** = the sea. **प्रु** = to dive into. **प्रु = प्लु** = to swim. **प्लव** comes from **प्लु** and occurs in RV. (१ १८२/५). **प्लवते** (१० १५५/३) = floats.

अमुया

This word is used 7 times and seems to stand for something deadly, old age, perhaps death itself, something that must not be even named. It expresses the dislike or even hatred felt by man for old age or death. निर्ऋति is most probably the wicked one. She gives the final stroke.

(1) समिन्द्र गर्दभं मृण नुवन्तं पापयामुया (१ २९/५) = Destroy (संमृण) this braying (नुवन्तं) ass (गर्दभं) by (the help of) this wicked one. Indra is asked to call in death to give a coup-de-grace to a certain enemy.

(2) नदं न भिन्नममुया शयानं ० अति यन्त्यापः (१ ३२/८) = The waters which Vṛtra had hemmed in rush (यन्ति) over (अति) him as he lay (शयानं) owing to her (अमुया), being broken (भिन्नं) like a bull (नदं). V. lies like a slaughtered bull. Vṛtra's body was broken by Indra's bolt.

The word appears in such forms as काष्ठा, काष्ठायाः and काष्ठानां (each used only once), काष्ठां and काष्ठासु (twice each), and काष्ठाः (4 times). In 1 it means a battle-ground or a race-ground ; in 3 and 4 a race; in 8 a stable; in 2, 5 6, 7, 9, 10, and 11 it means a prison. 1, 3, and 4 are allied in meaning ; so 8 and the rest. A stable in which a horse is pent up for days together becomes a prison. The word does not mean a direction or water anywhere.

(1) मा सीमवद्य आ भागुर्वी काष्ठा धनं हितम् । अपावृक्ता अरत्नयः (८$\frac{८०}{२}$) = हे इन्द्र सीम् अस्मान् अवद्ये दुरिते मा आ भाक् भागिनः कुरु ।

काष्ठा उर्वी अस्ति । धनं च तत्र हितं भवति । अरत्नयः अपावृक्ताः . = O Indra, do not make us sharers of ill (but of good). Wide is the battle-field where wealth is laid (for capture). Foes have been cut off.

आ भज् = to give shares, to make partners. अवद्ये = in evil, in adversity; lit. in that which cannot be spoken of or praised. उर्वी काष्ठा हितं धनं = Wealth lies in the wide field of battle; let us share it. Or huge wagers are laid in races. अरत्नौ is the only other form of अरत्नि that occurs in RV. अरत्नि is perhaps the same as अरति. रत् may have been a root from which रत्न is derived. रत् = to give. रत् + निः = रत्निः = one that gives oblations to the gods. अरत्निः = one that does not.

काष्ठां

(2) उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः । अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते (७ ९३/३)=धीभिः धनैः सह प्रमतिं धनम् इच्छमानाः इच्छन्तः अन्वेषयन्तो वा वाजिनः वाजं धनम् इच्छन्तः विप्राः स्तोतारः यत् यदा विदथं यज्ञं संग्रामं वा उप उ ह गुः गच्छन्ति तदा ते नरः काष्ठां मन्दुरां बन्दिवासं वा नक्षमाणाः अर्वन्तः अश्वाः न इव इन्द्राग्नी जोहुवतः आव्हयन्तः भवन्ति.

प्रमतिः = wealth ; one that helps with wealth. cp. आपिर्नः पिता प्रमतिः (१ ३१/१४). वाजिनः = desirious of obtaining wealth. विदथं = a sacrifice or a battle in both of which wealth can be had. काष्ठां = a prison or a stable. Horses that have been cooped up in stables unconscionably long become restive and demand freedom by constant neighing. So men call upon the gods to help them. cp No. 6. जोहुवतः irregular for जोहुवन्ति. The wrong form is due to the nearest word इन्द्राग्नी. जोहुवति, जोहुवतः, जोहुवन्ति.

(3) एत उ त्ये अवीवशन् काष्ठां वाजिनो अक्रत । सतः प्रासाविषुर्मतिम् (९ २१/७) = एते त्ये ते वाजिनः सोमाः कलशान् अवीवशन् इच्छन्ति काष्ठां च अक्रत कुर्वन्ति । सतः यजमानात् मतिं स्तुतिं प्रासाविषुः उत्पादिववन्तः.

These horses (वाजिनः) desire to reach the jars and are therefore running a race. This refers to the flowing of Soma-juice into the jar. सतः etc. I do not understand. They inspire praise from the sacrificer, says Sayana. Or they produce (प्रासाविषुः) wealth (मतिं) for the sacrificer. Or सतः = सन्तः (सोमाः). काष्ठां कृ = to run a race.

काष्ठाः

(4) उदु त्ये सूनवो गिरः काष्ठा अज्मेष्वत्नत। वाश्रा अभिज्ञु यातवे (१ ३/१ ७/०) = गिरः सूनवः वाश्राः त्ये ते यातवे अज्मेषु अभिज्ञु काष्ठाः उत् अत्नत.

गिरः सूनवः = the sons of thunder i. e. the Maruts. वाश्राः = thundering. वाश् (=to roar) + रः = वाश्रः. अभिज्ञु = towards sacrifices (ज्ञु). अज्मेषु = in their marches. अज् (= to run) + मन् = अज्मन् altered to अज्म. काष्ठाः उत् अत्नत = ran races. While marching, now and again they ran races to expedite their journey. काष्ठां तन् = काष्ठां कृ = to run a race.

(5) प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचन्ते । वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शम्बरं भेत् (१ ५/९) = वृत्रहणं यं वृषभं पूरवः सचन्ते तस्य वृषभस्य महित्वं नु प्र वोचम्। दस्युं जघन्वान् वैश्वानरः अग्निः काष्ठाः अव अधूनोत् शम्बरं च भेत्.

वृत्रहणं = who (Agni) kills Vrtra (like Indra). The Purus serve or worship them. महित्वं = महत्त्वम्. नु प्र वोचं = I have verily (नु) proclaimed. The दस्यु is शम्बर. जघन्वान् = having struck. काष्ठाः अवाधूनोत् = shook down his hiding-place. भेत् = बिभेद.

(6) त्वं ह त्यदिन्द्रारिषण्यन् दृळ्हस्य चिन्मर्तानामजुष्टौ । व्यस्मदा काष्ठा अर्वते वर्घनेव वज्रिन् श्नथिह्यमित्रान् (१ ६/३) = हे इन्द्र मर्तानां दृळ्हस्य चित् अपि हविषः अजुष्टौ असेवित्वा अरिषण्यन् त्वं ह खलु त्यत् तदा अस्मत् अस्माकम् अर्वते काष्ठाः वि आवः उद्घाटितवान् असि । हे वज्रिन् अमित्रान् घना घनान् इव श्नथिहि नाशय.

अरिषण्यन् = not injuring (us). दृळ्हस्य etc. = without i. e. not taking or tasting (अजुष्टौ) offerings (understood) of even the strongest (दृळ्हस्य) of mortals. वि + आ + वः = threwest open. Thou didst throw open the prison for our horse.

This is probably figurative. Some hero lay long in prison like a horse cooped up long in a stable. The hero and the horse are impatient for escape or release. Cp. No. 1. घनेव occurs twice besides. घनेव विष्वग् वि जह्यराव्णः (१$\frac{३}{१}\frac{६}{६}$) and घनेव विष्वग् दुरितानि वि घ्नन् (९$\frac{१}{१}\frac{७}{४}$). घना = घनेन = वज्रेण according to Sayana; but why इव ? Most probably घनेव = घनान् इव. Indra smashes clouds; so he should smash foes.

(7) सिन्धोरिव प्राध्वने शूघनासो वातप्रमियः पतयन्ति यव्हाः। घृतस्य धारा अरुषो न वाजी काष्ठा भिन्दन्नूर्मिभिः पिन्वमानः (४$\frac{५}{८}$) = सिन्धोः यव्हाः (ऊर्मयः) इव काष्ठाः भिन्दन् पिन्वमानः अरुषः वाजी न इव शूघनासः वातप्रमियः घृतस्य धाराः प्राध्वने अध्वनि ऊर्मिभिः पतयन्ति.

Streams of ghee are compared to the rolling waves of a river or to a horse that out of impatience breaks all barriers, here perhaps his stable. सिन्धोः यव्हाः = children of a river i. e. its waves or streams. प्राध्वने = प्र+अध्वने=प्रकृष्टाय अध्वने = for their long journay. शूघनासः resembles शूरणासः and धीरणासः. नास seems to be added to शूघ, शूर, and धीर. शूघनाः शूघनासौ शूघनासः seems to be the declension. शूघनासः perhaps refers to rapid motion. शूघनासः occurs here only. वातं प्रमिनन्ति ताः वातप्रमियः = those that destroy i. e. surpass the wind in speed. अरुषः = bright. काष्ठाः = a prison or a stable. पिन्वमानः = fat. A big horse makes frantic efforts to get out of durance. cp. 2 and 6. The stream of ghee rushes on like a restive horse or like the stream of a river.

काष्ठायाः

(8) इमं तं पश्य वृषभस्य युज्यं काष्ठाया मध्ये द्रुघणं शयानम्। येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु (१०$\frac{१०२}{९}$) =

Here (इमं) behold (पश्य) द्रुघण that companion or yoke-fellow (युज्यं) of the bull (वृषभस्य) lying down (शयानं) for rest in (मध्ये). the stable (काष्ठायाः), with whose help Mudgala seized a hundred thousand cows in battles. M. had in former battles employed Drughaṇa to run races and made a large capture of cows. That same animal is the equal of any bull in the world.

Some one out of pride, it seems, exhibits a large, powerful bull and demands his equal. Another takes up the challenge and points to Drughaṇa sleeping in a stable. जिगाय = conquered, seized. पृतनाज्येषु = in battles. द्रुघणं = one that destroys (घनं) trees; a beast that fells trees with a mere push. The story that Drughaṇa was a wooden hammer is a myth based on misinterpretation of the name.

(9) अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम्। वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः (१ ३२/१०) = वृत्रस्य शरीरम् इन्द्रेण अतिष्ठन्तीनाम् अनिवेशनानां काष्ठानां मध्ये निण्यं निहितम्। आपः वि चरन्ति। इन्द्रशत्रुः वृत्रः दीर्घं तमः आशयत्.

Vṛtra's body was placed low (निण्यं) in durance or a prison that neither stood (halted) nor rested. Indra's foe thus lies asleep in long (enduring) darkness. Waters therefore rode on Vṛtra's body. The durance here is of course water that flows on forever. Prison-houses are confined to certain spots; but not this one. It is a sort of hell in which the waves ever tumble about. Waters wreak their vengeance on their capturer and incarcerator.

Yāska renders काष्ठाः by water; but that is not the real meaning of that word; it is inferential. निण्यं (नि + ण्यं) = low, very deep; or confidently, withoutf ear. In रजांसि चित्रा वि चरन्ति तन्यवः (५ ६३/५) विचरन्ति is transitive and governs रजांसि (horses). विचरन्ति means ride; निण्यं=confidently.

(10) दिदृक्षेण्यः परि काष्ठासु जेन्य ईळेन्यो महो अर्भाय जीवसे। पुरुत्रा यदभवत्सूरहैभ्यो गर्भेभ्यो मघवा विश्वदर्शतः (१ १४६/५) = यत् यस्मात् सूः माता (अग्नेः) पुरुत्रा सर्वत्र अभवत् अह अथ तस्मात् एभ्यः गर्भेभ्यः अग्निः (प्रादुरभूत्)। कीदृशः अग्निः। दिदृक्षेण्यः इत्यादि.

काष्ठासु परि दिदृक्षेण्यः = who can be seen even in his hiding-place. Agni lies deep hidden in water; yet he can be seen through the water. परि (=through or in spite of) generally governs the accusative; but here it governs काष्ठासु. जेन्यः = victorious, dear. ईळेन्यः=पूजनीयः. एन्य is an affix in these 3 words.

दृश् becomes दिदृश् by reduplication. दिदृश्+स् (of लेट्) + एन्यः = दिदृक्षेण्यः. महः = महते. Agni deserves worship from all creatures (जीवसे) great as well as small (अर्भाय). मघवा = possessed of wealth. विश्वदर्शतः = visible to all. सूः = a mother. The word occurs here and in 1$^{32}_{9}$ where the word means Vṛtra's mother. Water is everywhere ; so is Agni.

(11) त्वामिद्धि हवामहे साता वाजस्य कारवः। त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः (६$^{४६}_{१}$) = कारवः स्तोतारः वयं वाजस्य साता सातौ वाजसातौ त्वाम् इत् एव हि खलु हवामहे आव्हयामः । हे इन्द्र नरः वृत्रेषु सत्पतिं त्वाम् आव्हयन्ते । अर्वतः काष्ठासु वर्तमानाः त्वाम् आव्हयन्ते.

वाजस्य साता = वृत्रेषु = in battles. काष्ठासु अर्वतः = horses long pent up in stables are restive and call on Indra for release. This is probably figurative. Heroes lying in durance invoke Indra's help for rescue cp. Nos. 2 and 6. Or काष्ठासु=in battles.

कृत and श्वघ्नी

कृत seems to mean the highest amount of wealth. It is 5 times the object of वि + चि which means both to win and to give after winning and once each of अव्, सन् and गृभ्. Once it is the object of दृधतः (11) and means the highest wager. It is opposed to दभ्र (5) कृत means full also (12–14). कृतं and श्वघ्नी both occur in 7 and 8. Here too कृत means the highest wager. श्वघ्नी means a dicer; but how I cannot say. It loooks feminine like अपतिघ्नी, वृत्रघ्नी, सपत्नघ्नी and पारावतघ्नी; but it is not so. श्वघ्नं विद्यते अस्य स श्वघ्नी. But what is श्वघ्न ? dice ? if so, how ? वि + चि and जि are used twice each of श्वघ्नी ; सि and आ+मि once each.

कृतं

(1) त्वया वयं मघवन् पूर्व्ये धन इन्द्र त्वोताः सासह्याम पृतन्यतो वनुयाम वनुष्यतः । नेदिष्ठे अस्मिन्नहन्यधि वोचा नु सुन्वते । अस्मिन्यज्ञे वि चयेमा भरे कृतं वाजयन्तो भरे कृतम् (१$^{१३२}_{१}$) = हे मघवन् इन्द्र त्वया सहायेन त्वोताः त्वया रक्षिताः पूर्व्ये धने पृतन्यतः सासह्याम वनुष्यतः वनुयाम ।

अस्मिन् नेदिष्टे अहनि सुन्वते नु खलु अधि वोच । अस्मिन् यज्ञे अस्मिन् भरे वाजयन्तः धनम् इच्छन्तः वयं कृतं विचयेम.

पृतन्यतः = those that desire to fight. सह् = to defeat. वन् = to destroy. वनुष्य् = to desire to destroy. सासह्याम and वनुयाम have the sense of the future. नेदिष्ठ = quite close. अहन् = the day of battle. अधिवोच = promise (immense booty). A sacrifice (यज्ञ) was also a scene of battle (भर). विचमेय=shall gather. कृतं = the largest booty.

(2) ईळे अग्निं स्ववसं नमोभिरिह प्रसत्तो वि चयत्कृतं नः (५ ६०/१).

स्ववसं=सु + अवसं = possessed of wealth. नमोभिः = with offerings. प्रसत्तः occurs here only. It means 'seated.' May Agni, seated here, gather (विचयत्) for us the highest quantity of wealth.

(3) यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम् । तेन माविष्टमश्विना (८ १/५).

पुरूणि दंसांसि कर्माणि धनानि वा ययोः तौ = those that perform a number of mighty acts or possess huge quantities of wealth. Endow (अविष्टं) me (मा), O Aświns, with all that wealth that exists in water, in big trees and in small plants.

(4) यस्य त्वमूर्ध्वो अध्वरस्य तिष्ठसि क्षयद्वीरः स साधते । सो अर्वद्भिः सनिता स विपन्युभिः स शूरैः सनिता कृतम् (८ ११/१०) = यस्य मनुष्यस्य अध्वरस्य ऊर्ध्वः त्वं हे अग्ने तिष्ठसि क्षयन्तः वीराः यस्य स मनुष्यः साधते । सः अर्वद्भिः विपन्युभिः शूरैः कृतं सनिता दाता.

He who kindles fire in his sacrifice has brave sons (क्षयद्वीरः) and obtains (साधते) wealth. He grants (सनिता) wealth (कृतं) to those brave sons. अर्वद्भिः = अर्वद्भ्यः = to those that are as strong as horses. विपन्युभिः = विपन्युभ्यः=to those that praise Agni. शूरैः = शूरेभ्यः . The instrumental is idiomatic.

(5) दभ्रं चिद्धि त्वावतः कृतं शृण्वे अधि क्षमि । जिगात्विन्द्र ते मनः (८ ४५/३२).

Even (चित्) the little (दभ्रं) that belongs to thy devotee (त्वावतः) has been heard (शृण्वे) as becoming a treasure (कृतं)

on earth (क्षमि अधि). Let thy wealth (मनः), O Indra, come (to thy devotee).

Indra makes the little portion of his devotee great wealth.

(6) त्वया वयं पवमानेन सोम भरे कृतं वि चिनुयाम शश्वत् (९ ९७/५८) = हे सोम पवमानेन त्वया वयं भरे शश्वत् कृतं वि चिनुयाम. शश्वत् = all. cp. No. 1.

(7) उत प्रहामतिदीव्या जयाति कृतं यच्छ्वघ्नी वि चिनोति काले । यो देवकामो न धना रुणद्धि समित्तं राया सृजति स्वधावान् (१० ४२/९) = उत अपि च श्वघ्नी काले यत् कृतं विचिनोति तत् कृतं (तां) प्रहां (तं श्वघ्नीम्) अतिदीव्य यः देवकामः (सः) जयाति । स्वधावान् इन्द्रः (तस्य) धना धनानि न रुणद्धि । किंतु तं राया सं सृजति इत् खलु = He who is a devotee of the gods conquers that highest amount of wealth (कृतं) which (यत्) a dicer (श्वघ्नी) acquires (वि चिनोति) at dicing (काले), by out-dicing him. Indra, lord of riches (स्वधावान्), most certainly (इत्) unites (सं सृजति) him with wealth (राया) and does never (न) withhold (रुणद्धि) wealth (धना) from him.

प्रहा seems to have the meaning of कृत. Indra is called प्रहावान्. Or प्रहा may be far greater than कृत. The devotee acquires not only कृत but even प्रहा. प्रहा, अतिदीव्य and काले occur here only. काले = देवने. cp. 8. I have explained उत प्रहामतिदीव्या जयाति (P. 31 No. 29) differently. I am compelled to differ from myself here.

(8) कृतं न श्वघ्नी वि चिनोति देवने संवर्गं यन्मघवा सूर्यं जयत् । न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः (१० ४३/५)=यत् यदा मघवा इन्द्रः संवर्गं सूर्यं जयत् अजयत् तदा न यथा श्वघ्नी देवने कृतं विचिनोति तथा स धनं व्याचिनोत् । हे इन्द्र अन्यः ते तव तत् वीर्यम् अनु (कर्तुं) न शकत् शक्नोति । न पुराणः नापि नूतनः .

There was once great hostility between the worshippers of the Sun and those of Indra. संवर्गं सं रयिं जय (८ ७५/१२); here संवर्गं seems to be the same as रयिं. देवने occurs here only. The Sun is a great treasure.

(9) उत्स्म वातो वहति वासो अस्या अधिरथं यदजयत्सहस्रम् । रथीरभून्मुद्गलानी गविष्टौ भरे कृतं व्यचेदिन्द्रसेना (१० १०२/२)= मुद्गलानी इन्द्र-

सेना यत् यदा अधिरथं रथे स्थित्वा सहस्रम् अजयत् तदा अस्याः वासः वातः उत् वहति उद्वहत्। गविष्टौ मुद्गलानी रथीः अभूत्। इन्द्रसेना भरे कृतं व्यचेत्.

She drove so hard that the wind raised on high her garment. गविष्टौ = in the fight for cows.

कृतानि

(10) स सव्येन यमति व्राधताश्चित्स दक्षिणे संगृभीता कृतानि। स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विन्द्र ऊती (१ $\frac{१००}{१}$)=

With the left hand he holds even increasing weath (व्राधतः); in the right he holds all accumulated wealth. He gives (सनिता) wealth even to the humble bard (कीरिणा). May Indra with his followers, the Maruts, be for our welfare (ऊती = ऊत्यै). संगृभीता = संगृभीतानि = संगृहीतानि = accumulated.

(11) सभामेति कितवः पृच्छमानो जेष्यामीति तन्वा शूशुजानः। अक्षासो अस्य वि तिरन्ति कामं प्रतिदीव्ने दधत आ कृतानि (१० $\frac{३४}{६}$) =

The gambler (कितवः) goes to the gambling den (सभां) inquiring (if any one was ready to play with him) and swelling (शूशुजानः) with wealth (तन्वा) in prospect with the consciousness (इति) 'I will win' (जेष्यामि). The dice (अक्षासः) increase (वि तिरन्ति) i. e. whet his desire for winning (कामं), as he already has made over (दधतः) i. e. bet his wealth to the competing gambler (प्रतिदीव्ने). शूशुजान occurs here and in 1C $\frac{२७}{२}$ only.

कृते

(12) आ यज्ञैर्देव मर्त्य इत्था तव्यासमूतये। अग्निं कृते स्वध्वरे पूरुरीळीतावसे (५ $\frac{१७}{१}$) = हे देव मर्त्यः पूरुः तव्यांसं धनवन्तम् अग्निं कृते स्वध्वरे ऊतये अवसे आ ईळीत याचेत.

इत्था यज्ञैः = महद्भिः हविर्भिः. पूरुः = of the Pūru tribe कृते स्वध्वरे = in full offerings. ऊतये = अवसे = for wealth.

(13) कृते चिदत्र मरुतो रणन्त (७ $\frac{५७}{५}$).

The Maruts do (चित्) revel (रणन्त) here (अत्र) in full offerings.

(14) प्र यत्कृते चमसे मर्जयद्धरी पीत्वा मदस्य हर्यतस्यान्धसः (१०९६) = When after drinking Sōma Indra drenches even his horses in vessels full of Sōma. कृत=full. कृते चमसे=कृते स्वध्वरे (१२).

श्वघ्नी ?

(15) पुनः पुनर्जायमाना पुराणी समानं वर्णमभि शुम्भमाना । श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयन्त्यायुः (१९२१०). पुनः पुनः जायमाना = born again and again and yet पुराणी = old. समानं वर्णम् अभि शुम्भमाना = decking herself with the same colour. सर्वस्य आयुः जरयन्ती = wearing out the life of all or increasing the wealth (आयुः) of all. विजः occurs here and in सो अर्यः पुष्टीर्विज इवामिनाति (२१२५) = Indra distributes (आमिनाति) the riches (पुष्टीः) of the enemy (अर्यः) like विजः(?). विजः = wagers ? श्वघ्नी इव कृत्नुः etc. = liberal (कृत्नुः) like a dicer. The dicer wins and liberally distributes his winnings (विजः). Ushas too is liberal of her gifts. आमिनान elsewhere means destroying.

(16) येनेमा विश्वा च्यवना कृतानि यो दासं वर्णमधरं गुहा कः । श्वघ्नीव यो जिगीवाँ लक्षमाददर्यः पुष्टानि स जनास इन्द्रः (२१२४) = येन इमा इमानि विश्वा विश्वानि च्यवना च्यवनानि कृतानि = who has been the cause of the fall of all these (clouds or mountains or treasures of heaven). च्यवन from च्यु to cause to fall. यः दासं वर्णम् अधरं कः गुहा कः = who has pressed down, driven into secret haunts, the Dāsa tribe. जिगीवान् = conquering. अर्यः अरेः लक्षम् आदत् = has seized the wealth of the enemy. लक्षं ? Is लक्ष a member of the word लक्ष्मी ? लक्ष्मीः = one that possesses wealth ? पुष्टानि = wealth. Or इव यथा श्वघ्नी लक्षं जयति. But what do श्वघ्नी and लक्ष mean ?

(17) इमं यज्ञं त्वमस्माकमिन्द्र पुरो दधत्सनिष्यसि क्रतुं नः । श्वघ्नीव वज्रिन् सनये धनानां त्वया वयमर्य आजिं जयेम (४३२०) = हे इन्द्र अस्माकं पुरः इमं यज्ञं दधत् नः अस्मभ्यं क्रतुं धनं सनिष्यसि ददासि । हे वज्रिन् धनानां सनये वयं त्वया सहायेन अर्यः अरेः आजिं जयेम इव यथा श्वघ्नी आजिं जयति तथा.

सन् = to give. सनये = प्राप्तये. आजि = a bet, money, wealth. अस्माकं पुरः इमं यज्ञं दधत् etc. = placing before us so much wealth, thou art giving us a (veritable) treasure (क्रतुं).

(18) एवारे वृषभा सुतेऽसिन्वन् भूर्यावयः । श्वघ्नीव निवता चरन् (८.४.५.२१). = हे वृषभ इन्द्र एवा एवम् अरे अरं पर्याप्तं सुते भूरि बहु वयः धनम् असिन्वन् बन्धनात् मुञ्चन् निवता चरन् आगच्छ.

The Padakara has एवारे and आवयः as padas. अरं = sufficient. अरे qualifies सुते. सि = to bind. अ + सि = to unbind, to give. भूरि + आ + वयः भूरि वयः असिन्वन् आ (गच्छ). Giving (असिन्वन्) immense (भूरि) wealth (वयः) like (इव) a dicer (श्वघ्नी) and moving (चरन्) down aerial slopes (निवता) come, now that enough (अरे) Sōma has been extracted (सुते). एवारे may have been एह्यारे (एहि + आ + अरे)

N. B. The usual note will be found at the end of this article.

क्रतुः

(1) इन्द्रः सहस्रदाव्नां वरुणः शंस्यानाम् । क्रतुर्भवत्युक्थ्यः (१.१७.५) = Indra and Varuṇa are (भवति) laudable (उक्थ्यः) donors (क्रतुः) of thousands (सहस्र) of praiseworthy (शंस्यानां) gifts (दाव्नां). दा + वन् = a gift.

(2) स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः । तं मेधेषु प्रथमं देवयन्तीर्विश उपब्रुवते दस्ममारीः (१.७७.३).

मर्यः = a brave warrior and therefore capable of winning and giving away wealth (साधुः). अद्भुतस्य अमितस्य धनस्य रथीः रथेन आनेता मित्रः न इव भूत् भवति. He brings in large treasures. Godly (देवयन्तीः) Āryan people (आरीः विशः) therefore invoke (उपब्रुवते) that greatest giver (दस्मं) first in battles (मेधेषु). मेधेषु = in battles where wealth (मेध) is to be had. आरीः = Āryan. आरीः विशः = Āryan people. दस् (= to give) + मः = दस्मः = the greatest giver. दस् + रः = दस्रः = a greater giver.

(3) वीरेण्यः क्रतुरिन्द्रः सुशस्तिरुतापि धेना पुरुहूतमीट्टे । आर्दयद् वृ

त्रमकृणोदु लोकं ससाहे शक्रः पृतना अभिष्टिः (१० १०४/१०) = इन्द्रः वीरेण्यः सुशास्तिः क्रतुः अस्ति । उत अपि च धेना पुरुहूतम् ईट्टे । अभिष्टिः शक्रः वृत्रम् आर्दयत् । उ उरुं लोकं च अकृणोत् अकरोत् । पृतनाः ससाहे.

Indra is a donor (क्रतुः), one who makes gifts (सुशास्तिः) and gives brave sons (वीरेण्यः). The tongue (धेना) praises (ईट्टे) the all-called (पुरुहूतं) one. The giver (शक्रः = अभिष्टिः) killed Vṛtra, defeated (ससाहे) armies (पृतनाः) and made wide space (उ लोकं). वीरेण्य is like दिदृक्षेण्य. वीर + एन्यः = वीरेण्यः. What does it mean ? सुशास्तिः = शास्तियुक्तः. शस् = to give; शास्तिः = a gift. धेना = a tongue, from धे (= to suck). उ लोकं = wide space. Vṛtra envelopes the universe with darkness and thus makes it small. Indra dispels darkness and makes wide breathing space. अभिष्टिः = wealth; one possessed of wealth.

(4) क्रतुर्न नित्यः (१ ६६/३) । (5) क्रतुर्न भद्रः (१ ६७/१) = Agni is one's own (नित्यः) like (न) a treasure and rich (भद्रः) like a treasure.

(6) त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः (१ ९१/५). सत्पतिः = a master of wealth. वृत्रहा = a killer of Vṛtra i. e. foes. भद्रः क्रतुः = a rich treasure.

(7) शुष्मिन्तमो हि ते मदो द्युम्निन्तम उत क्रतुः (१ १२७/९ । १ १७५/५).

These words are addressed to Agni in the 1st Ṛk. and to Indra in the 2nd. Sōma (मदः) gives to each the highest inspiration. Their treasurer is packed with wealth. शुष्मं = strength. द्युम्नं = wealth. शुष्मिन्तमः = charged witn the highest inspiration. द्युम्नितमः = filled to the utmost with wealth.

(8) साव्हान् विश्वा अभियुजः क्रतुर्देवानाममृक्तः । अग्निस्तुविश्रवस्तमः (३ ११/६) = Agni defeats (साव्हान्) all foes (अभियुजः); highest of those that possess immense riches (तुविश्रवस्तमः), he is the bright (अमृक्तः) treasure of the gods. Vide अमृक्त (p. 69 No. 1). श्रवः = क्रतुः = wealth.

(9) पुरोळाशं सनश्रुत प्रातःसावे जुषस्व नः । इन्द्र क्रतुर्हि ते बृहन् (३ ५२/४) = हे सनश्रुत इन्द्र प्रातःसावे नः पुरोळाशं जुषस्व । ते तव हि क्रतुः बृहन्.

सनश्रुत = ever (सन) known (श्रुत). प्रातःसावे = in the morning Sōma-offering. जुषस्व = taste. क्रतुः = a treasure.

(10) मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे । त्वे अपि क्रतुर्मम (७ ३२/२१) = हे इन्द्र नः अस्मान् निदे वक्तवे अराव्णे मा रन्धीः । मम क्रतुः त्वे त्वयि अपि एव.

निदे = वक्तवे = to the slanderer. निद् = वक्तुः. वच्+तुः=वक्तुः. रा = to give. रावन् = a giver. अरावन् = one that does not give offerings to the gods or wealth to the Āryans. अर्यः is either genitive or nominative. The genitive cannot be construed. अर्ये (= अरये) would be correct. Or अर्यः ईश्वरः त्वं may be the construction. त्वे अपि etc. = my treasure is in thee alone.

क्रतवः

(11) अप्रक्षितं वसु बिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे । आवृतासोऽवतासो न कर्तृभिस्तनूषु ते क्रतव इन्द्र भूरयः (१ ५५/८) = Thou carriest (बिभर्षि) in thy hands (हस्तयोः) inexhaustible (अप्रक्षितं) wealth (वसु), hast (दधे) strength (सहः) in thy body (तन्वि), strength that can never be overcome (अषाळ्हं), famous (श्रुतः) as thou art. Numerous (भूरयः) treasures (क्रतवः) are in thy body (तनूषु), O Indra, resembling in this pits (अवतासः) covered (आवृतासः) by their makers (कर्तृभिः) in order to conceal their treasures.

As immense wealth lies buried in deep pits, so does it lie concealed in Indra's body too. सहः and श्रुतः may mean wealth. सहः is both strength and its result viz. riches. In दीर्घश्रुत् and दीर्घश्रुत्तम, श्रुत् means wealth. श्रुतः is plural of that word. Indra has wealth crammed into every part of his body.

(12) आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासोऽपरीतास उद्भिदः (१ ८९/१).

आ + यन्तु. भद्राः = full of riches. अ + दब्ध = never attacked. अ + परि + इत = never opposed or attacked. उद्भिदः ? This word is used of Sōma, the Maruts, the gods, day and night, and trea-

sures. Does it mean powerful? capable of bringing out by digging? or overflowing riches?

(13) इन्द्रस्य वज्र आयसो निमिश्ल इन्द्रस्य बाह्वोर्भूयिष्ठमोजः। इन्द्रस्य शीर्षन् ऋतवो निरेक आसन्नेषन्त श्रुत्या उपाके (८९⁶₃).

आयसः वज्रः इन्द्रस्य बाह्वोः निमिश्लः = A steel-bolt is invariably placed (निमिश्लः) in Indra's arms. भूयिष्ठम् ओजः = (so also) the greatest possible strength (is placed there). Treasures (ऋतवः) for distribution (निरेके) lie in Indra's head (शीर्षन् = शीर्षणि). The last quarter is unintelligible.

ऋतवः full of wealth

(14) ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य । आ वोऽर्वाचः ऋतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु (७⁴⁸₁) = हे ऋभवः अस्मे अस्माभिः सुतस्य सुतेन सोमेन मादयध्वं मद्युक्ताः भवत । यातां मार्गेण गच्छतां वः युष्माकं नर्यं रथं ऋतवः विभ्वः अश्वाः न सद्यः एव अर्वाचः सन्तः आवर्तयन्तु.

ऋभु धनम् । तेन युक्तं क्षन् धनं येषां ते. वाजाः = वाजेन धनेन युक्ताः. नरः = धनवन्तः । धनस्य दातारश्च. मघवानः = धनवन्तः. These 4 adjectives qualify ऋभवः or देवाः understood. ऋतवः = विभ्वः = धनवन्तः (अश्वाः). नर्यं = धनवन्तं (रथम्). Thus the Ṛbhus and their chariot and horses are full of riches. अर्वाचः=moving downwards. न = in a moment.

(15) ऋतूयन्ति ऋतवो हृत्सु धीतयो वेनन्ति वेनाः पतयन्त्या दिशः। न मर्डिता विद्यते अन्य एभ्यो देवेषु मे अधि कामा अयंसत (१०⁶⁴₂) = The rich gods (ऋतवः) give riches (ऋतूयन्ति). In their hearts (हृत्सु) lie riches (धीतयः). The birds (वेनाः) i. e. the gods fly about (वेनन्ति = पतयन्ति) in all directions (आ दिशः). There is none other than these (एभ्यः) that can show us grace or mercy (मर्डिता). My desires (मे कामाः) have gone up (अयंसत) among the gods (देवेषु अधि). हृत्सु धीतयः is difficult.

ऋतुः = wealth

(16) यस्ते साधिष्ठोऽवस इन्द्र ऋतुष्टमा भर । अस्मभ्यं चर्षणीसहं सस्निं वाजेषु दुष्टरम् (५³⁵₁) = हे इन्द्र अवसे कल्याणाय ते तव यः साधिष्ठः

क्रतुः तम् अस्मभ्यम् आभर आहर देहि । कीदृशं क्रतुम् । चर्षणीसहं सस्निं वाजेषु दुष्टरं च.

साध् (= to give) + इष्ठः = साधिष्ठः = the best giver. अवसे = for (our) prosperity. Indra overcame the 5 Āryan tribes (चर्षणीसहं), was capable of making gifts (सस्निं) and could not be beaten (दुष्टरं) in battles. So wealth given by him should possess these characteristics. सस्नि from सन् (= to give) reduplicated. वाजेषु = in battles. दुष्टरं = दुः + तरं = difficult to destroy.

क्रतुं = wealth

(17) ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । क्रतुं बृहन्तमाशाथे (१ ३/२) = ऋतेन ऋतवृधौ ऋतस्पृशौ मित्रावरुणौ बृहन्तं क्रतुम् आशाथे = Mitra and Varuṇa who increase wealth (ऋतावृधौ) and fill it to the full (ऋतस्पृशा) by means of their wealth (ऋतेन) give (आशाथे) large (बृहन्तं) wealth (क्रतुं). ऋत and क्रतु both mean wealth. स्पृश् = to fill to the full. आ + शा = to give.

(18) अति नः सश्चतो नय सुगा नः सुपथा कृणु । पूषन्निह क्रतुं विदः (१ ४२/७) = हे पूषन् इह अस्मासु क्रतुं धनं विदः देहि. The rest is explained on P. 15 No. 2.

(19) अभि सूयवसं नय न नवज्वारो अध्वने । पूषन्निह क्रतुं विदः (१ ४२/८) = हे पूषन् अस्मान् सुयवसं तृणप्रचुरं धान्यप्रचुरं च देशम् अभि प्रति नय.

न नवज्वारो अध्वने ? ज्वार occurs here only. It is impossible to guess the meaning. अध्वने मार्गाय नवज्वारः नूतनः संतापः न भवतु (सायणः)=let there be no new (inexperienced) heat on the road.

(20) शग्धि पूर्धि प्र यंसि च शिशीहि प्रास्युदरम् । पूषन्निह क्रतुं विदः (१ ४२/९). शग्धि = पूर्धि = यंसि = शिशीहि =give. शक्, पूर्, यम् and शा all mean to give. प्रासि = fill. उदरं = a belly ; a store-house Give us wealth that would fill our belly i. e. satisfy us entirely. उदरं figuratively would mean a treasure. The Pada-patha is प्रासि which we again find in $8\frac{1}{23}$. Were it not for this second appearance of प्रासि, I would split it into प्र and आसि. हे पूषन् त्वं प्रकर्षेण उदरं धननिधिः आसि = Thou art, O P., an inexhaustible treasure.

(21) अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति (१ ६४/१३)

= (The man favoured by the Maruts) carries (आभरते) immense wealth ; he rules over it (क्षेति), increases it (पुष्यति). अर्वत् = नृ = वाज = धन = क्रतु = weath. आपृच्छ्यं = (so huge) as to raise questions or curiosity. अर्वद्भिः = नृभिः = धनैः=(packed) with wealth. All the 5 words mean immeasurable wealth.

(22) पितुर्न पुत्राः क्रतुं जुषन्त श्रोषन् ये अस्य शासं तुरासः । वि राय और्णोद् दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः (१ ६८ ⁄ ५)= ये तुरासः तुराः अस्य शासं श्रोषन् शृण्वन्ति ते न यथा पुत्राः पितुः क्रतुं धनं जोषन्ते लभन्ते तथा अस्य अग्नेः क्रतुं जुषन्त लभन्ते । अग्निः रायः दुरः द्वाराणि वि और्णोत् उद्घाटितवान् । दमूनाः अग्निः नाकं दिवं स्तृभिः तारकाभिः पिपेश अलंकृतवान्.

Those that listen (श्रोषन्) to Agni's instructions or order (शासं) receive from him wealth as do sons from their father. Agni has opened (वि + और्णोत्) the doors (दुरः) of wealth (रायः). Owner of sacrificers' homes (दमूनाः) he bejewels (पिपेश) heaven (नाकं) with stars (स्तृभिः). श्रु+स् (of लेट्)+ अन्=श्रोषन्. तुरासः =donors पुरु क्षु धनं यस्य सः पुरुक्षुः=possessed of wealth. पुरु and क्षु both mean wealth. दुरः Cp. English doors. पिश् = to adorn.

(23) ऋतस्य रश्मिमनुयच्छमाना भद्रंभद्रं क्रतुमस्मासु धेहि । उषो नो अद्य सुहवा व्युच्छास्मासु रायो मघवत्सु च स्युः (१ १२३ ⁄ १३). ऋतस्य रश्मिम् अनुयच्छमाना=giving constantly a line i. e. a succession of wealth. क्रतुं = wealth. सुहवा = easy to call ; or सु धनम् । तेय युक्तः हवः धनं यस्याः सा = possessed of immense wealth. The Dawn is solicited to rise (व्युच्छ). मघवत्सु अस्मासु = in us who *will be* rich. भद्रं = wealth. भद्रं भद्रं=great wealth. भद्र, क्रतु and रायः all mean wealth.

(24) अध क्रतुं विदतं गातुमर्चत उत श्रुतं वृषणा पस्त्यावतः (१ १५१ ⁄ २) = हे वृषणा वृषणौ मित्रावरुणौ अध अथ अर्चते स्तोत्रं हविः वा अर्पयते यजमानाय क्रतुं गातुं विदतं दत्तम् । उत पस्त्यावतः हविष्मतः यजमानस्य (आव्हानं) श्रुतं शृणुतम्.

क्रतुं = गातुं = धनम्. विद् = to give. विदतं = give. अर्चते = to him who offers praises or offerings. पस्त्या = an offering or a seat.

(25) तमस्य राजा वरुणस्तमश्विना क्रतुं सचन्त मारुतस्य वेधसः । दाधार दक्षमुत्तममहर्विदं व्रजं न विष्णुः सखिवाँ अपोर्णुते (१ १५६ ⁄ ४).

King Varuṇa and the As'wins enjoy (सचन्त) that wealth (क्रतुं) of Vishnu who is so capable (वेधसः) and has the Maruts मारुतस्य) for his friends. He gives (दाधार) the best (उत्तमं) wealth (दक्षं) and throws open (अप + ऊर्णुते) in a moment (न) cow-pens (व्रजं), in company with his friends (सखिवान्). It is not only men that receive wealth from Vishṇu ; even great gods look up to him for that favour. Vishṇu, it seems, was once accompanied by the Maruts, as Indra was in later times. Like Indra he threw open strongholds in which lay imprisoned the Sun, the day, the Dawn and cows. अहर् = day or the Sun. विद् = to give. अहर्विदं व्रजं = the stronghold that, on being thrown open, was to give to the world the day or the Sun. Cp. अहः स्वर् विविदुः केतुमुस्राः (१ ७१/२).

(26) शुक्रेभिरङ्गै रज आ ततन्वान् क्रतुं पुनानः कविभिः पवित्रैः। शोचिर्वसानः पर्यायुरपां श्रियो मिमीते बृहतीरनूनाः (३ १/५) = शुक्रेभिः शुक्रैः अङ्गैः रजः द्याम् आततन्वान् कविभिः पवित्रैः क्रतुं पुनानः अपां शोचिः परि वसानः आयुः अग्निः बृहतीः अनूनाः पूर्णाः श्रियः धनं मिमीते ददाति.

The description is applicable to both Sōma and Agni. Agni is born of mother-waters and consequently wears (वसानः) their (अपां) lustre. Sŏma is diluted in water and therefore looks lustrous. Both have resplendent limbs, flames in one case, brilliance in the other. With these they stretch the darkened heaven (रजः). Both give immense (अनूनाः = बृहतीः) wealth (श्रियः). आयुः= श्रियः=wealth. Agni is sometimes styled कविक्रतु which probably is explained by क्रतुं पुनानः कविभिः पवित्रैः=giving wealth by help of the miracle-workers, the Maruts who are great donors (पवित्रैः). The Maruts were once attendants of Agni. Cp. मरुद्भिरग्न आ गहि (१।१९). Agni's epithet (कविक्रतु) is used of Soma also.

(27) अग्ने तमद्याश्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम् । ऋध्यामा त ओहैः (४ १०/१) = हे अग्ने तव स्तोमैः ओहैः अद्य हृदिस्पृशं भद्रं तं क्रतुं न सद्यः ऋध्याम.

ओहैः=स्तोमैः. ओहं, स्तोमं, and ब्रह्माणि are used in RV. 1 ६१/१ and mean prayers or praises. हृदिस्पृशं = heart-filling, abundant. भद्रं = क्रतुं = wealth. ऋध्याम ? We shall obtain ? What is अश्वं

न ? As one obtains a (war-) horse ? Or न = सद्यः. न (after क्रतुं) = at once. By praising thee, O Agni we shall obtain (not only) that horse, (but what is more), heart-filling i. e. abundant wealth. क्रतुर्न भद्रः is said of Agni (१ $\frac{६६}{१}$⁷). Agni may also be called अश्व. But तं is not Agni, though Sāyana says so. तं may stand for पुत्रं. We shall obtain a son by praises of thee, a son that is brave like a war-horse and a blessing like abundant wealth.

(28) ४ $\frac{२०}{३}$ explained under श्वघ्नी. (P. 102 No. 17).

(29) सूरश्चिद्रथं परितक्म्यायां पूर्वं करदपरं जूजुवांसम्। भरच्चक्रमेतशः सं रिणाति पुरो दधत्सनिष्यति क्रतुं नः (५ $\frac{३१}{११}$) = इन्द्रः सूरः सूर्यस्य चित् अपि रथं परितक्म्यायां दिवि गमने पूर्वं जूजुवांसं च सन्तम् अपरं करत् अकरोत्। एतशः चक्रं पुरो दधत् भरत् । किंतु इन्द्रः तत् चक्रं सं रिणाति। अस्मभ्यं च क्रतुं धनं सनिष्यति ददाति.

The Sun was driving his chariot fast in his journey across heaven. Indra, not liking this, stopped the chariot. The Sun sped the wheel and drove it on.. Indra destroyed it. There was a clash between Sun-worship and Indra-worship. परितक्म्या, usually interpreted to mean night, seems to mean a journey. जु= to run fast. जूजुवांसं speeding fast. भरत् and दधत् are verbs having for their subject एतशः. एतशः = the brilliant Sun. सं रिणाति = destroys.

(30) ध्रुवं ज्योतिर्निहितं दृशये कं मनोजविष्ठं पतयत्स्वन्तः । विश्वे देवाः समनसः सकेता एकं क्रतुमभि वि यन्ति साधु ($\frac{६}{९}$) = पतयत्सु चलेषु अन्तः मध्ये मनोजविष्ठं मनसोऽपि अधिकवेगं ध्रुवं ज्योतिः अग्न्याख्यं दृशये कं निहितम्। समनसः सकेताः विश्वे देवाः एकं साधु साधुं क्रतुम् अभि वि यन्ति. A luminary (ज्योतिः), swifter than the mind (मनोजविष्ठं), yet steady (ध्रुवं), has been placed (निहितं) among (अन्तः) flying (पतयत्सु) i. e. mortal men to enable them to see (दृशये). All the gods possessed of wealth (समनसः = सकेताः) go (यन्ति) at once (वि) to (अभि) the wealth-giving (साधु=साधुं) treasure (क्रतुं).

Rk. 4 says:–इदं ज्योतिरमृतं मर्त्येषु। अयं स जज्ञे ध्रुव आ निषत्तोऽमर्त्यस्तन्वा वर्धमानः. So पतयत्सु = मर्त्येषु. Agni is a treasure that unfailingly supplies wealth to the gods. मनः = केतः = wealth.

Ṛk. 6 says :—इदं ज्योतिर्हृदय आहितम्. Agni as reason is placed in man's heart. So Agni is both material and immaterial. He is seen by the physical eye and by the mind.

(31) तव प्र यक्षि संदृशमुत क्रतुं सुदानवः । विश्वे जुषन्त कामिनः (६$\frac{२६}{८}$) = हे अग्ने तव संदृशं रूपं प्र यक्षि प्रकर्षेण देहि । उत अपि च सुदानवः दानूनां दानानां दातारः कामिनः धनकामाः विश्वे सर्वे जनाः क्रतुं त्वया दत्तं जुषन्त सेवन्ते.

यक्षि is 2nd per. sing. imperative. तव संदृशं = gold which has the colour of fire

(32) एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम । विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः (७$\frac{३}{१०}$) = हे अग्ने नः अस्मभ्यम् एता एतानि सौभगा सौभगानि धनानि दिदीहि देहि । सुचेतसं धनयुक्तं क्रतुं धनम् अपि वतेम अन्येभ्यः प्रेषयिष्यामः । स्तोतृभ्यः गृणते च विश्वा विश्वानि सौभगानि सन्तु । यूयं स्वस्तिभिः नः अस्मान् सदा पात रक्षत । यद्वा । सदा धनेन रक्षत.

दी = to give. चित् =to give. चेतस् = a gift, wealth. अपि is sometimes prefixed to वत्, sometimes it is parted from it. अपि-वत् or अपिवातय् =to send; to give स्तोतृभ्यः = गृणते.

(33) इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा । शिक्षा णो अस्मिन् पुरुहूत यामनि जीवा ज्योतिरशीमहि (७$\frac{३२}{२६}$) = हे पुरुहूत इन्द्र यथा पिता पुत्रेभ्यः क्रतुं धनम् आहरति तथा नः अस्मभ्यं क्रतुं धनम् आभर आहर अर्पय । नः अस्मभ्यं अस्मिन् यामनि रणे शिक्ष धनं देहि । जीवाः जीवन्तः वयं ज्योतिः अशीमहि.

शिक्ष् = give, from शक् + स् (of लेट्). यामनि = in this battle. या + मन्. या = to attack, to go against an enemy. जीवाः = when alive. अशीमहि = we shall enjoy. ज्योतिः = the light of the Sun or wealth.

(34) इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः। अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति (७$\frac{६०}{६}$) = दूळभासः दुःखेन कष्टेन ये दभ्यन्ते हिंस्यन्ते ते मित्रः वरुणः अर्यमा इमे देवाः अचेतसम् अधनवन्तं

चित् अपि दक्षैः धनैः चितयन्ति धनवन्तं कुर्वन्ति । सुचेतसं धनयुक्तं क्रतुं धनम् आपिवतन्तः प्रेषयन्तः सुपथा अंहः दारिद्र्यात् चित् अपि तिरः नयन्ति·

चेतस् = wealth, from चित् = to give. तिरः governs the accusative. अंह = adversity, poverty. अपिवत् = to send, to give.

(35) गर्भो यज्ञस्य देवयुः क्रतुं पुनीत आनुषक् । स्तोमैरिंद्रस्य वावृधे मिमीत इत् (८ १२/११) = देवयुः देवान् कामयमानः यज्ञस्य धनस्य गर्भः निधिः भवति । असौ आनुषक् सततं क्रतुं धनं पुनीते ददाति । इन्द्रस्य स्तोमैः स वावृधे वर्धते । अन्येभ्यो धनं मिमीते ददाति इत् एव.

गर्भो यज्ञस्य is obscure. यज्ञ does mean wealth. By praising Indra one grows richer and gives his wealth to the godly.

(36) इन्द्रः सुतेषु सोमेषु क्रतुं पुनीत उक्थ्यम् । विदे वृधस्य दक्षसो महान् हि षः (८ १३/१) = सुतेषु सोमेषु इन्द्रः उक्थ्यं स्तुत्यं क्रतुं धनं पुनीत ददाति । स वृधस्य वृद्धस्य महतः दक्षसः धनस्य विदे दाता भवति.

उक्थ्यं = so great as to demand or deserve praise. We find both क्रतु and दक्ष here; both mean wealth.

(37) इमां धियं शिक्षमाणस्य देव क्रतुं दक्षं वरुण सं शिशाधि (८ ४२/३) = हे देव वरुण इमां धियं शिक्षमाणस्य दातुः दात्रे क्रतुं दक्षं सं पूर्णं शिशाधि देहि·

शक् (reduplicated) + स् (of लेट्) = शिक्ष् = to give. क्रतुं = दक्षं = धनम्. शा by reduplication शिशा. शिशा + धि = give.

(38) आदू नु ते अनु क्रतुं स्वाहा वरस्य यज्यवः । श्वात्रमर्का अनूषतेन्द्र गोत्रस्य दावने (८ ६३/५) = हे इन्द्र आत् अनु अनन्तरम् ऊ नु एव ते तव गोत्रस्य दावने यज्यवः अर्काः वरस्य स्वाहा क्रतुं श्वात्रम् अनूषत =

The givers of wealth (यज्यवः =अर्काः), O Indra, immediately (आत् अनु), gave (अनूषत) wealth (श्वात्रं=क्रतुं) together with an offer (स्वाहा) of the best wealth (वरस्य) at the time of giving (दावने) the contents of the cow-pen (गोत्रस्य). क्रतु, वर, श्वात्र, अर्क, गोत्र= wealth. स्वाहा = with an offer. यज् (= to give) + युः = a giver. अर्क = wealth; one possessed of wealth. I have construed and interpreted the Rk. as above; but I am not satisfied with it, nor with the interpretation given by Sāyaṇa.

(39) सखायः क्रतुमिच्छत कथा राधाम शरस्य । उपस्तुतिं भोजः सूरियों अन्हयः (८ ७०/१३) = हे सखायः शरात् क्रतुं धनम् इच्छत याचध्वम् । यः अन्हयः सूरिः भोजः तस्य शरस्य उपस्तुतिं कथा कथं राधाम साधयिष्यामः. इच्छत = seek, ask, beg. कथा = कथम्. राधाम = shall accomplish. शर was the name of a liberal-minded king. उपस्तुतिः = worthy praise. भोजः = सूरिः = a liberal donor. अन्हयः = never subject to any diminution (न्हय) of wealth.

(40) सना दक्षमुत क्रतुमप सोम मृधो जहि । अथा नो वस्यसस्कृधि (९ ४/३). सन = give. क्रतुं = दक्षं = धनम्. अपजहि = kill outright. मृधः = foes. अथ = then. वस्यसः = वसीयसः = richer, very rich.

(41) भद्रं नो अपि वातय मनो दक्षमुत क्रतुम् (१० २५/१). भद्रं = मनः = दक्षं = क्रतुं = धनम्. अपिवातय = give.

(42) क्रतुं नः सोम जीवसे ० विवक्षसे (१० २५/४) = Thou bringest (विवक्षसे) wealth (क्रतुं) to us that we may live in prosperity (जीवसे).

(43) आपो रेवतीः क्षयथा हि वस्वः क्रतुं च भद्रं बिभृथामृतं च । रायश्च स्थ स्वपत्यस्य पत्नीः सरस्वती तद् गृणते वयो धात् (१० ३०/१२) = हे रेवतीः धनवत्यः आपः यूयं वस्वः वसुनः धनस्य क्षयथ ईशिध्वे । यूयं भद्रं क्रतुम् अमृतं च बिभृथ । यूयं स्वपत्यस्य रायः पत्नीः स्वामिन्यः स्थ । सरस्वती गृणते स्तुवते तत् वयः धनं धात् ददातु.

रे = वसु = क्रतुः = अमृतं = रायः = वयः = wealth. क्षि = to rule over, to be master of. पत्नीः = mistresses, owners. सु धनम् । तेन युक्तम् अपत्यं यस्मिन् तस्य रायः = of wealth that is full of wealth added to wealth. The usual rendering of स्वपत्यस्य is अपत्ययुक्तस्य = consisting of offspring.

(44) ये स्था मनोर्यज्ञियास्ते शृणोतन यद्वो देवा ईमहे तद्ददातन । जैत्रं क्रतुं रयिमद्वीरवद्यशस्तद्देवानामवो अद्या वृणीमहे (१० ३६/१०) = हे देवाः ये यूयं मनोः यज्ञियाः स्थ ते शृणोतन शृणुत । वः युष्मान् यत् ईमहे याचामहे तत् ददातन दत्त । देवानां जैत्रं क्रतुं रयिमत् वीरवत् यशः तत् अवश्च अद्य आवृणीमहे याचामहे.

मनोः याशियाः = givers of wealth to Manu, the human progenitor. शृणोतन = शृणुत. ददातन = दत्त. ईमहे = आवृणीमहे = याचामहे. यज्ञ = जैत्र = क्रतु = रयि = वीर = यशस् = अवः = wealth. यज् = to give. यज्ञ = what is given, wealth.

(45) विश्वस्य हि प्रेषितो रक्षसि व्रतमहेळयन्नुच्चरसि स्वधा अनु। यदद्य त्वा सूर्योपब्रवामहै तं नो देवा अनु मंसीरत क्रतुम् (१० ३७/५) = हे सूर्य प्रेषितः त्वं विश्वस्य व्रतं रक्षसि। स्वधाः अनु अहेळयन् उच्चरासि। यत् अद्य त्वाम् उपब्रवामहै याचामहे तं क्रतुं देवाः नः अस्मभ्यम् अनुमंसीरत अनुमन्यन्ताम्.

रक्षसि = ददासि. प्रेषितः = commissioned (by the highest to perform a certain task) or प्र इषा धनेन युक्तः = possessed of riches. व्रतं = acts, life, or wealth. विश्वस्य = विश्वेषां देवानां मनुष्याणां च. अहेळयन् = not contemning or disregarding. उच्चरसि = movest on high. स्वधाः अनु = in obedience to orders. उपब्रवामहै = we ask or beg. अनुमन् = to give.

(46) प्र वो वायुं रथयुजं पुरंधिं स्तोमैः कृणुध्वं सख्याय पूषणम्। ते हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते सचितः सुचेतसः (१० ६४/७) = हे ऋत्विजः वः यूयं रथयुजं वायुं पुरंधिं पूषणं च स्तोमैः सख्याय प्र कृणुध्वम्। सचितः सुचेतसः ते देवाः हि देवस्य सवितुः सवीमनि क्रतुं सचन्ते.

प्र कृणुध्वं = draw near, attract. प्र + कृ and आ + कृ mean to draw near, to attract. सख्याय = for obtaining wealth. रथयुजं = who yokes Indra's chariot. पुरंधिं = धनवन्तम्. सवीमनि = in the distribution of wealth (made by Savitṛ). सू = to give) + ईमन् = सवीमन् = giving, distribution. चित् and चेतस् both mean wealth. सचितः = सुचेतसः = possessed of wealth. सचन्ते = लभन्ते ददति वा.

(47) इरज्यन्नग्ने प्रथयस्व जन्तुभिरस्मे रायो अमर्त्य। स दर्शतस्य वपुषो वि राजसि पृणाक्षि सानसिं क्रतुम् (१० १४०/४) = हे अमर्त्य अग्ने इरज्यन् ईशानः त्वम् अस्मे अस्माकं रायः प्रथयस्व। स त्वं दर्शतस्य वपुषः रायः वि राजसि। तस्मात् सानसिं क्रतुं पृणाक्षि.

इरज्यन् = ruling (over large treasures of riches). प्रथयस्व = spread i. e. increase. जन्तुभिः ? जन्तुभिः सह ? coupled with children. Give us wealth and children. Cp. अग्निर्देवेभिर्मनुषश्च जन्तुभिः

(३ ३/६). Or जन्तुभिः धनैः युक्तान् रायः. वपुषः = दर्शतस्य = दर्शनीयस्य (रायः). वि राजसि = ईशिषे. पृणाक्षि from पृच् = to give. सानसिं (from सन् = to give; to enjoy) = as large as can be given or enjoyed, full.

क्रतुना = with wealth

(48) त्वया ह्यग्ने वरुणो धृतव्रतो मित्रः शाशद्रे अर्यमा सुदानवः। यत्सीमनु क्रतुना विश्वथा विभुररान्न नेमिः परिभूरजायथाः (१ १४/६ १)= हे अग्ने त्वया सहायेन हि धृतव्रतः वरुणः मित्रः अर्यमा एते सुदानवः देवाः शाशद्रे धनं ददुः। यत् यस्मात् सीम् अनु एतेषु वर्तमानेन क्रतुना सह विश्वथा विभुः त्वम् अरान् नेमिः न इव एतान् देवान् परिभूः अजायथाः.

These 3 gods, known for their liberality (सुदानवः), were made liberal of their gifts by Agni's advancing wealth to them unceasingly. By this wealth which we find in (अनु) these (सीं) gods Agni stood over and around them as a felly stands around the spokes of a wheel. Agni is the richest god and supplies wealth to the other gods. He was born rich. धृतव्रतः=whose laws are obeyed. शद् (=to give) by reduplication शाशद्. शाशद् + र् + ए = शाशद्रे. विश्वथा विभुः = rich in every way.

(49) साकं हि शुचिना शुचिः प्रशास्ता क्रतुनाजनि (२ ५/३)= The donor (प्रशास्ता), the blazing Agni (शुचिः) was indeed (हि) born (अजनि) in company with (साकं) blazing (शुचिना) wealth (क्रतुना) i. e. gold. प्र + शस् = to give. प्रशास्तृ is also the name of a priest. Agni is होतृ, पोतृ, प्रशास्तृ etc.

(50) युवं देवा क्रतुना पूर्व्येण युक्ता रथेन तविषं यजत्रा। आगच्छतं नासत्या शचीभिरिदं तृतीयं सवनं पिबाथः (८ ५/२ ७) = हे देवौ यजत्रौ नासत्यौ पूर्व्येण क्रतुना शचीभिः युक्तौ रथेन तविषं युवाम् आगच्छतम्। इदं तृतीयं सवनं पिबथः पिबतम्.

पूर्व्य = first-rate, prior in value. क्रतुना = शचीभिः = with gifts of wealth युक्ता = युक्तौ = possessed of, taking with (you). यजत्रा= यजत्रौ = gives; from यज् =to give. तविषं occurs 4 times in RV. In 3 places it is an adjective. But here it is an adverb. It means strong, mighty. Here perhaps तविषं = with force, rapidly.

(51) परि चिन्मर्तो द्रविणं ममन्यादृतस्य पथा नमसा विवासेत् । उत स्वेन क्रतुना सं वदेत श्रेयांसं दक्षं मनसा जगृभ्यात् (१०$\frac{३१}{२}$) = मर्तः द्रविणं परि सर्वतः ममन्यात् याचेत चित् एव । ऋतस्य पथा धनमार्गेण नमसा धनेन विवासेत् विवसेत् निवसेत् । उत अपि च स्वेन धनेन क्रतुना धनेन संवदेत संगच्छेत । मनसा धनेन सह श्रेयांसं दक्षं धनं जगृभ्यात् गृण्हीयात् .

Mortal man should pray for, and live happ ly with wealth. **मन्** = to beg. **विवास्** = **विवस्** = to live in close contact with. **द्रविण, ऋत, नमस्, स्व, क्रतु, श्री, दक्ष** and **मनस्** all mean wealth. If **विवास्** means to worship, then **ऋतस्य हविषः पथा = नमसा = हविषा अग्निं विवासेत् परिचरेत् . श्रेयांसं = श्रिया धनेन अधिकं (दक्षं) =** full of wealth.

दक्षैः and **क्रतुना** = with wealth

(52) सुदक्षो दक्षैः क्रतुनासि सुक्रतुरग्ने कविः काव्येनासि विश्वावित् । वसुर्वसूनां क्षयसि त्वमेक इत् द्यावा च यानि पृथिवी च पुष्यतः (१०$\frac{९१}{३}$) = हे विश्ववित् अग्ने त्वं दक्षैः सुदक्षः क्रतुना सुक्रतुः काव्येन कविः असि । यानि द्यावापृथिव्यौ पुष्यतः तेषां सर्वेषां वसूनां वसुः त्वं क्षयसि.

सुदक्षः etc. Cp. $1\frac{91}{2}$ on which the 1st half of the present Ṛk is based. **दक्ष, क्रतु** and **वसु** = wealth. **कविः** = one possessed of wealth. **काव्येन** = with wealth. **क्षयसि** = rulest. **पुष्यतः** = increase. **विश्वं (धनं) वेत्ति ददाति असौ विश्ववित् .**

क्रत्वा = with wealth.

(53) श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् । सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः (१$\frac{६५}{५}$) = उषसि बुध्यते उषसं वा बोधयति असौ उषर्भुत् । क्रत्वा धनेन विशां जनानां चेतिष्ठः दातृतमः । सोमः न इव ऋतात् उदकात् प्रकर्षेण जातः । शिश्वा शिशुना वत्सेन पशुः न इव । विभुः वेधाः । दूरे भाः यस्य सः । अग्निः अप्सु सीदन् हंसः न इव श्वसिति रौति.

While sitting hidden in water, Agni hoots (?) like a swan. **उषर्भुत्** = Agni wakes up at dawn or awakens the Dawn. **चेतिष्ठः** from **चित्**= to give. Sōma and Agni are water-born (**ऋतप्रजातः**). Or **ऋतं धनम् । प्र धनम् । तेन युक्तं जातं धनं यस्य** = one exceedingly

rich. वेधाः = विभुः = powerful. दूरेभाः = shining far off. पशुर्न शिश्वा ? The Dawn is पशुः i. e. a cow who big with child i. e. the Sun shines far off. So does Agni. श्वस् = to roar, to bellow. What is the word for the cry of a swan?

(54) देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा। पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् (१ ७३/२) = सत्यानि मन्मानि यस्य सः अग्निः देवः सविता न इव विश्वानि वृजनानि सर्वाणि धनानि क्रत्वा धनेन नि नितरां पाति ददाति । अमतिः सूर्यप्रकाशः न इव सत्यः। आत्मा इव शेवः । दिधिषाय्यः याच्यः भूत भवति.

सत्यमन्मा = whose gifts (मन्म) are full of wealth. वृजनानि = riches. अमतिः = sunlight. सत्यः = full of gifts like Sunlight or the Sun. आत्मा इव शेवः = Agni is welcome like one's own self or like wealth (आत्मा). दिधिष् = to give as wealth or offerings; or to beg. दिधिषाय्यः = हविरर्हः । अथवा । याचनीयः. पुरु प्र शस्तं धनं यस्य सः = who possesses wealth (प्रशस्तं) packed with wealth (पुरु).

(55) यस्य ते सख्ये पूषन् विपन्यवः क्रत्वा चित्सन्तोऽवसा बुभुज्रिर इति क्रत्वा बुभुज्रिरे। तामनु त्वा नवीयसीं नियुतं राय ईमहे । अहेळमान उरुशंस सरी भव वाजेवाजे सरी भव (१ १३/२ ८) = हे पूषन् विपन्यवः स्तोतारः यस्य ते तव सख्ये सन्तः वर्तमानाः क्रत्वा अवसा चित् बुभुज्रिरे इति एवं क्रत्वा बुभुज्रिरे तं त्वां राये ताम् अनु तत्सदृशीं नवीयसीं नियुतम् ईमहे याचामहे। अहेळमानः अवहेलनं न कुर्वन् हे उरुशंस बहुधन पूषन् वाजेवाजे सर्वेषु संग्रामेषु सरी भव समीपे भव.

विपन्यवः = those that praise. क्रत्वा = अवसा = धनेन. बुभुज् by reduplication of भुज्. बुभुज् + र् = बुभुज्र्. बुभुज्र् + इरे = बुभुज्रिरे = enjoyed. ताम् अनु = like that i. e. the क्रतु enjoyed by older bards. नियुतं = a gift of wealth. नवीयसीं = praiseworthy. राये = that we may be rich. अहेळमानः = not disregarding us. सरी ? Is सरिन् the original word ? सरति इति सरी = one that moves near for help. वाजेवाजे = in all fights for wealth. उरुणा धनेन युक्तं शंसं धनं यस्य स उरुशंसः.

(56) क्रत्वा दक्षस्य तरुषो विधर्मणि देवासो अग्निं जनयन्त चित्तिभिः। रुरुचानं भानुना ज्योतिषा महामत्यं न वाजं सनिष्यन्नुप ब्रुवे (३$\frac{2}{3}$) = देवासः देवाः तरुषः दक्षस्य क्रत्वा अग्निं विधर्मणि चित्तिभिः जनयन्त अजनयन्। भानुना ज्योतिषा रुरुचानं महाम् अत्यं वाजं सनिष्यन् अहम् उपब्रुवे स्तौमि.

The gods created (जनयन्त) Agni with his flames (चित्तिभिः) and with stores (क्रत्वा) of wealth (दक्षस्य) that saves (तरुषः) (from adversity) in heaven (विधर्मणि). I praise (उपब्रुवे) the great (महां) Agni shining (रुरुचानं) with lustre (भानुना = ज्योतिषा). क्रतु and दक्ष both mean wealth. दक्षस्य क्रत्वा=with the treasure of wealth. The expression is difficult to translate. तरुषः = which takes one across (adversity). विधर्मन् was a name of heaven. भानुना = ज्योतिषा= with lustre. चित्ति, भानु and ज्योतिस् all mean flames. अत्यं न वाजं सनिष्यन् is difficult. अत्यं न वाजं = अश्वम् इव वाजयुक्तं धनयुक्तं = possessed of, or bearing, wealth like a war-horse. सनिष्यन्=सनिं धनम् इच्छन् = desirous of wealth.

(57) त्वामग्ने सदमित्समन्यवो देवासो देवमरतिं न्येरिर इति क्रत्वा न्येरिरे। अमर्त्यं यजत मर्त्येष्वा देवमादेवं जनत प्रचेतसं विश्वमादेवं जनत प्रचेतसम् (४$\frac{1}{1}$)=हे यजत हविरर्ह अग्ने समन्यवः बलिनः धनिनो वा देवासः देवाः देवं द्यावापृथिव्योः अरतिं पतिम् अमर्त्यं त्वाम् मर्त्येषु सदम् इत् सदैव क्रत्वा धनेन सह नि आ ईरिरे स्थापितवन्तः। इति एवं न्येरिरे स्थापितवन्तः। ते देवम् आदेवं प्रचेतसम् आजनत। विश्वम् आदेवं प्रचेतसम् आजनत.

सदम् इत् = सदा एव. मन्युः = strength, wealth. अरतिं = a husband. ईर् =to deposit, to place. आदेव occurs 4 times in RV. वायवः० आदेवासः (७।९२।४), विश आदेवीः (६।४९।१५) and आदेवे जने (२।४।१). आदेव is an adjective in all these 4 places. Does it mean including all gods? Agni includes in himself all gods. विश्वं and आदेवं perhaps have the same sense. जनत = अजनयन्. प्रभूतं चेतः धनं यस्य तं प्रचेतसम्. Agni was created wealthy.

(58) यस्त्वामग्न इनधते यतस्रुक् त्रिस्ते अन्नं कृणवत्सस्मिन्नहन्। स सु द्युम्नैरभ्यस्तु प्रसक्षत्तव क्रत्वा जातवेदश्चिकित्वान् (४$\frac{2}{1}$) = हे जातवेदः जातधन अग्ने यः त्वाम् इनधते इन्द्धे प्रज्वलयति यतस्रुक् च सस्मिन् एकस्मिन् अहन् अहनि त्रिः ते तुभ्यम् अन्नं कृणवत् करोति स तव सु द्युम्नैः तव क्रत्वा शत्रून् अभि अस्तु प्रसक्षत् प्रसहतां च.

चिकित्वान् = (हविषां) दाता; from कित् =to give. यताः अर्पिताः घृतेन पूर्णाः स्रुचः येन = one that pours ladle-fuls of ghee into Agni. सास्मिन् occurs 9 times in RV. and qualifies ऊधन् 5 times, अहन् twice and आजौ and योनौ once each. सस् seems to have been the original pronoun and meant one and the same. Did सस् mean 'that'? सास्मिन् looks almost like तास्मिन्. सः (he) shows that सस् may have been the original base. अभ्यस्तु = let (him) overcome (rivals). सह् (=to defeat) + स् (of लेट्) = सक्ष्. अभ्यस् and सक्ष् may mean in the end 'to surpass.'

(59) एवा वस्व इन्द्रः सत्यः सम्राड् हन्ता वृत्रं वरिवः पूरवे कः। पुरुष्टुत क्रत्वा नः शग्धि रायो भक्षीय तेऽवसो दैव्यस्य (४२१/२०) = एवा एवम् इन्द्रः वस्वः वसुनः सत्यः सम्राट् राजा। वृत्रं हन्ता पूरवे वरिवः धनं कः अकरोत्। हे पुरुभिः स्तुत नः अस्मभ्यं क्रत्वा धनेन सह रायः धनं शग्धि देहि। ते तव दैव्यस्य अवसः धनस्य भक्षीय भागं लभेय.

वसु, वरिवः, क्रतु, रै and अवस् all mean wealth. पूरु was the name of an Āryan clan. शक् (=to give) + धि = शग्धि. भज् + स् (of लेट्) = भक्ष् = to distribute.

(60) त्वं नो अग्ने अद्भुत क्रत्वा दक्षस्य मंहना। त्वेऽसुर्यमारुहत्क्राणा मित्रो न यज्ञियः (५१/१०) = हे अद्भुत अग्ने त्वं नः अस्मभ्यं क्रत्वा दक्षस्य मंहना दानेन (वाजाय पन्थां रातिस ५।१०।१)। असुर्यं धनं त्वे त्वयि अरुहत्। क्राणा त्वं मित्रः न इव यज्ञियः धनवान्.

क्रतु and दक्ष both mean wealth. मंहना = मंहनेन; from मंह्= to give. क्रत्वा = दक्षस्य मंहना. असुर्यं = extraordinary power or wealth. क्राणा? क्र (=to give?) + आन = क्राण. (क्र + तुः = what is given?). यज्ञियः = यज्ञः धनम्। तद्वान् = possessed of riches. Agni is wealthy like Mitra.

(61) अस्य क्रत्वा विचेतसो दस्मस्य वसु रथ आ। अधा विश्वासु हव्योऽग्निर्विक्षु प्र शस्यते (५१/७) = विचेतसः दस्मस्य अस्य क्रत्वा रथे आ रथमध्ये वसु विद्यते। अधा अत एव हव्यः अग्निः विश्वासु विक्षु प्रशस्यते.

वि विभूतं चेतः धनं यस्य स विचेताः. दस्म superlative of दस् as दस्र is comparative. दस् = to subdue or to give.

(62) त्वं विश्वु प्रदिवः सीद आसु क्रत्वा रथीरभवो वार्याणाम्। अत इनोषि विधते चिकित्वो व्यानुषग्जातवेदो वसूनि (६ ५/३) = हे चिकित्वः जातवेदः आसु विश्वु त्वं प्रदिवः सीदः सीदसि। क्रत्वा वार्याणां धनानां त्वं रथीः रथेन आनेता अभवः भवसि। अतः एव त्वं विधते हविः ददते यजमानाय आनुषक् सततं वसूनि वि इनोषि प्रहिणोषि.

चिकित्वः (from कित् =to give) = O giver. प्रदिवः = आनुषक् = always. क्रत्वा = धनेन (सहितानां वार्याणाम्). रथीः = one that brings in a chariot. इनोषि = sendest. or क्रत्वा = because of the wealth that thou possessest.

(63) क्रत्वा दा अस्तु श्रेष्ठोऽद्य त्वा वन्वन् सुरेक्णाः। मर्त आनाश सुवृक्तिम् (६ १६/२६) = यः मर्तः सुवृक्तिं स्तुतिम् आनाश तुभ्यम् अर्पयति स त्वां वन्वन् संभजन् अद्य क्रत्वा धनेन सुरेक्णाः धनवान् अस्तु। दाः दाता अस्तु। श्रेष्ठः धनवत्तमः अस्तु.

वन्वन् = worshipping. आनाश ? Is the root नश् or अश् ?

(64) प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति। यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे (७ ६१/२)=हे सुक्रतू मित्रावरुणौ दीर्घश्रुत् ऋतावा स विप्रः वां मन्मानि प्र इयर्ति। यस्य ब्रह्माणि युवां धनेन अवथः यत् यदा च यस्य शरदः न सद्यः युवां क्रत्वा धनेन आ पृणैथे आपूरयथः.

For comment vide 'Who shall be our guide in interpreting RV.' at the end of this book.

(65) तव क्रत्वा सनेयं तव रातिभिरग्ने तव प्रशस्तिभिः। त्वामिदाहुः प्रमतिं वसो ममाग्ने हर्षस्व दातवे (८ १९/२९)=हे वसो अग्ने तव क्रत्वा तव रातिभिः तव प्रशस्तिभिः धनं सनेयं प्राप्नुयाम्। जनाः त्वाम् इत् एव प्रामतिं दातारम् आहुः। मम मह्यं दातवे धनं दातुं हर्षस्व त्वरस्व.

क्रत्वा = रातिभिः = प्रशस्तिभिः. सनेयं from सन् = to obtain or enjoy. प्रमतिः = one that helps with wealth. हर्षस्व = hasten. सनेयं spoils the metre and appears to have been interpolated.

(66) अप्रामिसत्य मघवन् तथेदसदिन्द्र क्रत्वा यथा वशः। सनेम वाजं तव शिप्रिन्नवसा मक्षू चिद्यन्तो अद्रिवः (८ ६१/४) = हे अप्रामिसत्य मघवन् इन्द्र यथा वशः इच्छसि तथा इत् एव असत् अस्तु। हे शिप्रिन् अद्रिवः तव अवसा धनदानेन मक्षू सदैव यन्तः ददतः चित् अपि वयं वाजं सनेम लभेमहि.

अप्रामिसत्य ? अप्रामि occurs here only. अप्रामिं = अहिंसितं (सायणः). How is क्रत्वा to be construed ? क्रत्वा अवसा वाजं सनेम ? क्रत्वा = अवसा. शिप्रिन् = O helmeted one.

(67) कदू महीरधृष्टा अस्य तविषीः कदू वृत्रघ्नो अस्तृतम्। इन्द्रो विश्वान् बेकनाटाँ अहर्दृशा उत क्रत्वा पणीँरभि (८ $\frac{६६}{१०}$) = अस्य वृत्रघ्नः इन्द्रस्य महीः महत्यः अधृष्टाः तविषीः कत् उ क्व खलु। अस्तृतं बलं कत् उ क्व खलु। इन्द्रः क्रत्वा विश्वान् बेकनाटान् उत अपि च पणीन् अभि भवेत्.

Where indeed is Indra's strength that has never been challenged ? It is incomparable. Indra overcomes all foes. अ + धृष्टाः = never challenged. अ + स्तृतं = never resisted. बेकनाटान्= पञ्च जनान्? अहर्दृक् is like स्वर्दृक् which is used of gods and men. Why should अहर्दृशः be used of बेकनाटान्? Or does अहर्दृशः mean स्वर्दृशः i. e. the gods whom Indra surpassed? बेकनाट, अहर्दृक and पणि are three classes whom Indra subdued and surpassed in wealth. Indra was disliked by Devas, the 5 Āryan tribes and the Paṇis.

(67a) For $9^{\frac{16}{2}}$ vide P. 11 No. 5.

(68) प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति। क्रत्वा सधस्थमासदत् (९ $\frac{१६}{४}$)=सोमः प्र चेतसा पवित्रे अर्षति। क्रत्वा सधस्थं योनिं कलशम् आसदत् आसीदति.

अर्षति = runs, flows fast. पवित्रे = through the strainer. सधस्थं= heaven, a seat, a vessel. प्र=चेतसा = क्रत्वा = धनेन सह. पुनानस्य cannot be construed. It seems to be a mispronunciation of पुनानः स्यः. पुनानः पूयमानः स्यः सः सोमः or यः सोमं पुनाति तस्य चेतसा धनेन. Sōma runs towards the strainer with the wealth of (i. e. to be given to) him who purifies him.

(69) आभूत्या सहजा वज्र सायक सहो बिभर्ष्यभिभूत उत्तरम्। क्रत्वा मन्यो सह मेद्येधि महाधनस्य पुरुहूत संसृजि (१० $\frac{८४}{६}$) = हे वज्र हे सायक हे अभिभूते आभूत्या सह जाः जातः त्वम् उत्तरं सहः बिभर्षि। हे पुरुहूत मन्यो महाधनस्य संसृजि क्रत्वा सह नः अस्माकं मेदी एधि भव.

वज्र = सायक = a thunderbolt. Indra is as strong as a thunderbolt ; besides that weapon is his constant associate.

अभिभूते = O overcomer of foes. आभूत्या सह जाः जातः= born with strength and wealth. उत्तरं सहः बिभर्षि = thou hast ever-increasing strength and wealth. मन्यो = O thou possessed of strength and wealth. क्रत्वा सह नः अस्माकं मेदी एधि = be our help (मेदी ?) in company with wea'th. महत् धनं यस्मिन् स महाधनः संग्रामः = a battle in which large booty is to be had. संसृजि = संसर्गे = in the thick (of battle).

(70) एवा तदिन्द्र इन्दुना देवेषु चिद्धारयाते महि त्यजः । क्रत्वा वयो वि तार्यायुः सुक्रतो क्रत्वायमस्मदा सुतः (१०·१४४/६) = एवा एवम् इन्द्रः देवेषु चित् अपि इन्दुना । (= सोमं पीत्वा) महि त्यजः बलं धनं वा तत् प्रसिद्धं धारयते । हे सुक्रतो धनवन् इन्द्र क्रत्वा धनदानेन अस्माकं वयः धनम् आयुः धनं च वितारीः वर्धय । अयं सोमः अस्मत् आ अस्मद्गृहे सुतः वर्तते.

क्रत्वा repeated to show its importance to the devotee. The gods are powerful and rich. Indra makes them still more powerful and rich क्रतु, वयः, आयुः and probably त्यजः mean wealth.

क्रतुभिः (दक्षैः) = with wealth

(71) त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः । त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः (१·९१/२). क्रतुभिः=दक्षैः = द्युम्नैः = धनैः. सुक्रतुः = सुदक्षः = द्युम्नी = धनवान्. Vide No. 52 P. 116. विश्वं वेदः यस्य सः विश्ववेदाः. वेदस् = wealth. वृषत्वेभिः = by heroic deeds. महित्वा = महत्त्वेन. भूः = अभवः. नृणां देवानां चक्षाः = the eye of the gods. Or नृ धनम् । तेन युक्तं चक्षः धनं यस्य = (Agni is) exceedingly rich.

(72) सं यज्जनान् क्रतुभिः शूर ईक्षयद्धने हिते तरुषन्त श्रवस्यवः (१·१३२/५). When (यत् = यदा) brave (शूरः) Indra saw (ईक्षयत् = ऐक्षत) the 5 Āryan tribes (जनान्) in company (सं) with riches, (क्रतुभिः) then his devotees desirous of wealth (श्रवस्यवः) destroyed (तरुषन्त) them in battle (धने हिते).

(73) उत त्ये मा पौरुकुत्सस्य सूरेस्त्रसदस्योर्हिरणिनो रराणाः । वहन्तु मा दश श्येतासो अस्य गैरिक्षितस्य क्रतुभिर्नु सश्चे (५·३३/८)= उत पौरुकुत्सस्य पुरुकुत्सपुत्रस्य सूरेः त्रसदस्योः श्येतासः श्वेतवर्णाः दश अश्वाः रराणाः

मह्यं दीयमानाः दत्ताः वा हिरणिनः हिरण्यालंकारैः अलंकृताः मा मां वहन्तु। गैरिक्षितस्य गिरिक्षितकुलजातस्य तस्य क्रतुभिः धनैः अहं नु अद्य सश्चे पूर्ये.

हिरणिनः qualifies श्येतासः and means wearing gold trappings. हिरणिनः occurs once again (६ $\frac{६३}{९}$). श्येतासः = blazing, resplendent. श्येत occurs thrice again and qualifies Agni.

(74) दिवो न सर्गा असमृग्रमन्हां राजा न मित्रं प्र मिनाति धीरः। पितुर्न पुत्रः क्रतुभिर्यतान आ पवस्व विशे अस्या अजीतिम् (९ $\frac{९७}{३०}$) = न यथा वर्षस्य सर्गाः धाराः दिवः द्युलोकात् सृज्यन्ते तथा सोमस्य सर्गाः धाराः असमृग्रम् प्रवहान्ति। अन्हां राजा सूर्यः न इव धीरः धनवान् सोमः मित्रं प्रमिनाति नाशयति। पितुः क्रतुभिः धनैः इतरैः यतानः यतमानः स्पर्धमानः पुत्रः न इव त्वं हे सोम क्रतुभिः धनैः अस्यै विशे अजीतिम् अजय्यं धनम् आ पवस्व देहि.

अ + ससृज् (by reduplication of सृज्) + र् + अम् = असमृग्रम्. I cannot say how अम् came to replace अन्. अन्हां राजा न मित्रं etc.? Was there antagonism between Sun-worship and Mitra-worship? Or does मित्रं प्र मिनाति mean, increases wealth? यतानः from यत् to vie with. अजीति occurs only once again in अजीतयेऽहतये पवस्व स्वस्तये सर्वतातये (९ $\frac{९६}{४}$); अजीति, अहति, स्वस्ति and सर्वतानि mean welfare, wealth.

(75) यदासु मर्तो अमृतासु निस्पृक् सं क्षोणीभिः क्रतुभिर्न पृङ्क्ते। ता आतयो न तन्वः शुम्भत स्वा अश्वासो न क्रीळयो दंदशानाः (१० $\frac{९५}{९}$) = यत् यदा मर्तः पुरूरवाः आसु अमृतासु निस्पृक् एकजीवो भूतः क्रतुभिः धनैः क्षोणीभिः धनैः ताः स्त्रीः संपृङ्क्ते तदा आतयः न इव दंदशानाः अश्वाः इव क्रीळयः ताः स्वाः तन्वः शुम्भत अलंकुर्वन्ति.

When the mortal P. became wholly mixed (निस्पृक्) among those immortal ladies, when he filled (पृङ्क्ते) them wholly (सं) or endowed them with riches (क्रतुभिः = क्षोणीभिः), those ladies sportive like neighing (दंदशानाः) mares decked their persons immediately (न). नि+स्पृक् (from स्पृश् to fill, to occupy) = mixed. आतयः = अश्वासः = mares. आति (perhaps from अत् to go) not found in RV. आतयः is the only form of that word. दंदशानाः (from दश् to bite) = neighing?

क्रतवे or क्रत्वे = for wealth

(76) दशानामेकं कपिलं समानं तं हिन्वन्ति क्रतवे पार्याय । गर्भं माता सुधितं वक्षणास्ववेनन्तं तृषयन्ती बिभर्ति (१०$\frac{२७}{१६}$) = पूर्वस्याम् ऋचि कथितानां दशानाम् एकं कपिलं कपिलवर्णं समानं तम् अग्निं देवाः पार्याय संकटात् पारं नयते क्रतवे धनाय हिन्वन्ति । माता वक्षणासु सुधितं सुहितम् अवेनन्तं गर्भं तृषयन्ती बिभर्ति.

Agni had 10 mothers. He is red-coloured (कपिलं) and the common son of the ten. They or the gods send him down to the earth to give wealth that would enable men to tide over all difficulties. वक्षणासु = उदरेषु. Every one of these 10 mothers bears (बिभर्ति) Agni in her womb (वक्षणासु) where he is well placed (सुधितं). The fœtus so loved the womb that it did not like to leave it (अवेनन्तं). Every mother was exceedingly desirous of conceiving or bearing in her womb such a child (तृषयन्ती).

(77) ते नो हृदे मनसे सन्तु यज्ञा जुष्टासो अद्य घृतनिर्णिजो गुः । प्र वः सुतासो हरयन्त पूर्णाः क्रत्वे दक्षाय हर्षयन्त पीताः (४$\frac{३७}{२}$) = हे ऋभवः ये घृतनिर्णिजः यज्ञाः गुः अगुः अगच्छन् अद्य भवतां पानाय ते जुष्टासः जुष्टाः सन्तः वः युष्माकं हृदे मनसे सन्तु । पूर्णाः सुताः सोमाः क्रत्वे दक्षाय वः युष्मान् हरयन्त हर्षयन्त हर्षयन्तु.

जुष्टासः = tasted, eaten or drunk. घृतं निर्णिक् येषां = whose dress is ghee; covered with or soaked in ghee; full of ghee. हृदे = मनसे = to your mind or taste. हरयन्त = हर्षयन्त =let (them) gladden. हर् + स् (of लेट्) = हर्ष्. हर् (from हृ) = to carry away, to gladden. क्रत्वे = दक्षाय = धनाय.

(78) त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ । विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः (७$\frac{२५}{४}$) = हे शूर तविषीवः उग्र हरिवः इन्द्र त्वावतः अवितुः दातुः क्रत्वे रातौ अहम् अस्मि । विश्वा विश्वानि इत् एव अहानि अस्मासु ओकः कृणुष्व कुरु । अस्मान् न मा मर्धीः नाशय.

तविषीवान् =possessed of strength (तविषी). हरिवान् =possessed of horses (हरि). तविषीवः and हरिवः are vocatives. ओकः कृणुष्व = make thy home with us. क्रत्वे = धनाय. रातौ = दाने = दानाय.

(79) स नो ज्योतींषि पूर्व्य पवमान वि रोचय। क्रत्वे दक्षाय नो हिनु (९ ३६/३) = हे पूर्व्य श्रेष्ठ पवमान सोम स त्वं ज्योतींषि विरोचय। नः अस्मान् क्रत्वे दक्षाय हिनु प्रेरय

The 1st नः is superfluous; or नः ज्योतींषि=our i. e. Āryan luminaries; or ज्योतींषि = resplendent gold. विरोचय = brighten i. e. increase (our gold). हि = to send.

(80) क्रत्वे दक्षाय नः कवे पवस्व सोम धारया। इन्द्राय पातवे सुतो मित्राय वरुणाय च (९ १००/५)=हे सोम कवे इन्द्राय मित्राय वरुणाय पातवे पातुं सुतः त्वं नः क्रत्वे दक्षाय धारया पवस्व.

पातवे = that they may drink. धारया पवस्व = pass in a stream through the strainer and be pure. नः क्रत्वे दक्षाय=in order to give us wealth. कवे = O rich one.

(81) पवस्व सोम क्रत्वे दक्षायाश्वो न निक्तो वाजी धनाय (९ १०९/१०)= हे सोम वाजी अश्वः न इव निक्तः त्वं क्रत्वे दक्षाय धनाय पवस्व.

निज् (= to wash) + तः = निक्तः = washed, purified. वाजी = booty-laden. क्रत्वे = दक्षाय = धनाय.

क्रतोः (दक्षस्य) = of wealth

(82) अधा ह्यग्ने क्रतोर्भद्रस्य दक्षस्य साधोः। रथीर्ऋतस्य बृहतो बभूथ (४ १०/२) = हे अग्ने अधा अथ त्वं क्रतोः भद्रस्य साधोः दक्षस्य बृहतः ऋतस्य रथीः हि बभूथ. क्रतोः = भद्रस्य = दक्षस्य = ऋतस्य = धनस्य. साधु = which brings in or secures wealth. रथीः=a bringer.

क्रत्वः =of wealth

(83) क्रत्वः समह दीनता प्रतीपं जगमा शुचे। मृळा सुक्षत्र मृळय (७ ८९/३) = हे शुचे वरुण क्रत्वः धनस्य दीनता दीनतया बहुत्वेन समह खलु अहं प्रतीपं जगम। हे सुक्षत्र मृळ मृळय दयां कुरु.

शुचे = O brilliant, shining one. समह = verily. क्रत्वः दीनता = on account of the abundance (दीनता) of my wealth. प्रतीपं जगम= went counter. मृळ् = to have merry on. सुक्षत्र = धनवन्.

क्रतौ = in wealth, in prosperity

(84) अवीरे क्रतौ दविद्युतन्न (१० ९५/३). Urvaśi did not shine (न दविद्युतत्) in a prosperity (क्रतौ) that was not blest with a son (अवीरे).

The whole Ṛk is obscure. This may be the sense of the words quoted.

क्रतुं = strength

(85) नहि नु यादधीमसीन्द्रं को वीर्या परः । तस्मिन् नृम्णमुत क्रतुं देवा ओजांसि सं दधुः (१८०/६) = कः वीर्या वीर्येण इन्द्रं परः । तस्मिन् इन्द्रे देवाः नृम्णं क्रतुम् ओजांसि सं दधुः.

परः governs the accusative. इन्द्रं परः = beyond or superior to Indra. नृम्णं = क्रतुं = ओजांसि = strength. नहि नु यात् अधीमसि? यात् यस्मात् वयं नहि नु न कदापि आधि इमः = whom we can never surpass? अधि + इ = to go higher, to be superior. यात् ablative of य as तात् of त and आत् of अ. These are ancient forms. य = यत्. त = तत्. अ = अत्. Did अत् ever exist? य, त, अ are the bases in many declensional forms of the 3 pronouns. वीर्य, नृम्ण, क्रतु and ओजस् may mean wealth even here.

(86) अनु प्र येजे जन ओजो अस्य सत्रा दधिरे अनु वीर्याय । स्यूमगृभे दुधयेऽर्वते च क्रतुं वृञ्जन्त्यपि वृत्रहत्ये (६३/१) = जनः दैव्यो जनः अस्य इन्द्रस्य ओजः अनु प्र येजे दत्तवान् । ते देवाः सत्रा सदैव वीर्याय इन्द्रम् अनु दधिरे । वृत्रहत्ये ते देवाः स्यूमगृभे दुधये अर्वते इन्द्राय क्रतुं बलं च अपि वृञ्जन्ति.

जनः = the gods. येजे = gave. प्र = प्रकर्षेण = in large quantities. वीर्याय = for heroic deeds. सत्रा = always. अनु = constantly, continuously. स्यूमगृभे occurs here only स्यूमन्=something sewn, an armour made of hides sewn together? स्यूमगृभे = to one that puts on an armour. दुधये dative of दुधि. दुधि ? दुःखेन कष्टेन धीयते गृह्यते = one that is hard to catch? अर्वते = to one who is as brave as a horse. All these 3 words are epithets of Indra. क्रतुं = strength. अपि shows compactness. अपिवृञ्जन्ति = consolidate, put compactly into. प्र, सत्रा, ओजस्, वीर्य, and क्रतु may mean wealth even here.

(87) अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् । अन्विन्द्रं वृत्रतूर्ये (८३/४) = मरुतः युध्यतः त्रितस्य शुष्मम् उत अपि च क्रतुं बलम् वृत्रतूर्ये इन्द्रम् अनु इन्द्रे आवन् निहितवन्तः.

आवन् from अव् =to give. क्रतुं=शुष्मं=बलं धनं वा. वृत्रतूर्यें=वृत्रहत्ये. तूर्य from तृ or तुर् = to destroy. इन्द्रम् अनु = इन्द्रे. अनु repeated for metre. The Maruts put into Indra the strength that once belonged to Trita, the fighter. Trita was the name of an ancient god.

(88) तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् । वज्रं शिशाति धिषणा वरेण्यम् (८ १५/७) = हे इन्द्र देवमाता धिषणा तव माता वा तुभ्यम् तत् प्रसिद्धं बृहत् महत् इन्द्रियं बलं शुष्मम् उत अपि च क्रतुं वरेण्यं श्रेष्ठं वज्रं च शिशाति ददाति.

इन्द्रियं = शुष्मं = क्रतुं = strength. शा = to give. धिषणा was the name of the mother of the gods. The Aświns are called धिष्ण्यौ i. e. धिषण्यौ = sons of धिषणा. Was it another name of Aditi ? इन्द्रस्य इदम् इन्द्रियं = strength befitting Indra.

(89) विश्वे त इन्द्र वीर्यं देवा अनु क्रतुं ददुः । भुवो विश्वस्य गोपतिः पुरुष्टुत भद्रा इन्द्रस्य रातयः (८ ६२/७) = हे इन्द्र विश्वे देवाः ते तुभ्यं वीर्यं क्रतुम् अनु ददुः । हे पुरुष्टुत त्वं विश्वस्य गोपतिः भुवः भवसि । इन्द्रस्य रातयः भद्राः.

क्रतुं = वीर्यं = strength or wealth. गोपतिः = a master. रातयः = gifts. भद्राः = full of wealth. अनु = unceasingly.

(90) उज्जातमिन्द्र ते शव उत्त्वामुत्तव क्रतुम् । भूरिगो भूरि वावृधुर्मघवन् तव शर्मणि भद्रा इन्द्रस्य रातयः (८ ६२/१०) = हे भूरिगो (भूरयः बह्व्यः गावः यस्य) हे मघवन् इन्द्र जनाः तव जातं शवः तव क्रतुं च उत् वावृधुः अस्तुवन् भूरि बहुकृत्वः । वयं तव शर्मणि स्याम । इन्द्रस्य रातयः भद्राः.

जातं = शवः = क्रतुं. त्वां irregular for तव ; or त्वां वावृधुः may be the construction. They praise thee and thy strength.

(91) मह्यं त्वष्टा वज्रमतक्षदायसं मयि देवासोऽवृजन्नपि क्रतुम् । ममानीकं सूर्यस्येव दुष्टरं मामार्यन्ति कृतेन कर्त्वेन च (१० ४८/३) = त्वष्टा मह्यम् आयसं वज्रम् अतक्षत् । देवाः मयि क्रतुं बलम् अपि अवृजन् । मम अनीकं सूर्यस्य अनीकमिव दुष्टरम् । जनाः मां कृतेन कर्त्वेन कर्तव्येन च आर्यन्ति स्तुवन्ति.

I am like Indra, says the speaker. आयसं = of steel. अतक्षन् = fashioned. अपिवृज् = to stuff compactly. अनीकं = splendour. दुष्टरं = difficult to face or encounter. आर्यन्ति = extol. कृतेन = for acts done. कर्त्वेन = for acts to be done. Cp. तमिच्च्यौत्नैरार्यन्ति तं कृतेभिश्चर्षणयः (८ १६/६). आर्यन्ति occurs only twice in RV.

(92) महिम्न एषां पितरश्चनेशिरे देवा देवेष्वदधुरपि क्रतुम्। समविव्यचुरुत यान्यत्विषुरैषां तनूषु नि विविशुः पुनः (१०$\frac{५६}{४}$) = पितरः चन अपि एषां देवानां महिम्नः ईशिरे। देवाः देवेषु देवभूतेषु क्रतुं महिमानम् अपि नैकट्येन अदधुः। यानि तेजांसि देवेषु समविव्यचुः उत अपि च अत्विषुः अदीप्यन् तानि पुनः एषु पितृषु नि आ विविशुः.

The Pitṛs become gods after death and possess the greatness natural to gods. The gods themselves pack into them (अपि अदधुः) divine power. All the splendour that spreads through, that is, informs the bodies of the gods enter the bodies of the Pitṛs too. व्यच् = to spread. सम् + अ + विव्यच् = to spread throughout. त्विष् = to shine. ऐषां = आ + एषाम्.

क्रतुना = with power

(93) सुप्रवाचनं तव वीर वीर्यं यदेकेन क्रतुना विन्दसे वसु। जातूष्ठिरस्य प्र वयः सहस्वतो या चकर्थ सेन्द्र विश्वास्युकथ्यः (२$\frac{१३}{२}$) = हे वीर इन्द्र तव वीर्यं सुप्रवाचनं सुष्ठु प्रकर्षेण वाच्यं स्तुत्यं यत् यस्मात् एकेन क्रतुना सहस्वतः बलवतः जातूष्ठिरस्य वसु वयः प्र विन्दसे लब्धवान् असि। या यानि विश्वा विश्वानि वीर्याणि त्वं चकर्थ तेषां कारणात् सः त्वम् उक्थ्यः स्तुत्यः असि.

सुप्रवाचनं=fit to be loudly and widely bruited. जातूष्ठिर occurs here only. जातू occurs in जातूभर्मा (१$\frac{१०}{३}$) and जातु in यस्यानक्षा दुहिता जात्वास (१०$\frac{२७}{११}$). जातू = wealth ? जातूस्थिर = one that is stationed in wealth, very wealthy. सहस्वतः=धनवतः ? प्र, वसु and वयः = wealth.

(94) साकं जातः क्रतुना साकमोजसा ० साकं वृद्धो वीर्यैः सासहिर्मृधः (२$\frac{२२}{३}$) = Strong (वृद्धः) Indra was born with strength, Indra who conquers (सासहिः) enemies (मृधः). साकं = सह. क्रतुना = ओजसा = वीर्यैः = with strength and heroic deeds; perhaps with wealth.

(95) नाना चक्राते सदनं यथा वेः समानेन क्रतुना संविदाने (३$\frac{५४}{६}$) = समानेन क्रतुना अग्निना संविदाने युक्ते द्यावापृथिव्यौ तस्मै अग्नये वेः पक्षिणः सदनानि यथा इव नाना भिन्नानि सदनं सदनानि चक्राते.

Both heaven and earth are pregnant (संविदाने) with the miracle-worker, powerful (क्रतुना) Agni and make for him all sorts of abodes (सदनं) like those of birds. I have not understood the Ṛk.

(96) ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति । इन्द्र-वायू वीरवाहं रथं वाम् (७९१°) = हे इन्द्रवायू सत्येन मनसा स्वेन क्रतुना दीध्यानाः दीप्यमानाः युक्तासः युक्ताः अश्वाः ते वां युवयोः वीरवाहं रथं वहन्ति.

Those famous (ते) horses (युक्तासः), shining (दीध्यानाः) with wealth (सत्येन = मनसा =स्वेन= क्रतुना), draw (वहन्ति) your (वां) chariot (रथं), O Indra and Vayu, the chariot that carries wealth (वीरवाहं) to your devotees. इन्द्रवायू वीरौ । तौ वहति तं रथम् । यद्वा । वीरं धनं वहति तम्. On reconsideration I think क्रतु means wealth and not power here.

(97) उक्षेव यूथा परियन्नरावीदधि त्विषीरधित सूर्यस्य । दिव्यः सुपर्णोऽव चक्षत क्षां सोमः परि क्रतुना पश्यते जाः (९७१) = इव यथा उक्षा यूथा यूथानि परियन् रौति तथा सोमः अपः परियन् अरावीत् रौति । सूर्यस्य त्विषीः अधि अधित अध्यधात् । दिव्यः सुपर्णः सोमः क्षाम् अव चक्षत चष्टे । जाः क्रतुना परिपश्यते च.

परियन् = going through (the strainer). A bull enters a herd of cows and bellows. Sōma enters waters and bellows too. He puts on the splendour of the Sun. The heavenly (दिव्यः) bird or eagle (सुपर्णः) looks down (अवचक्षत) on the earth (क्षां) and looks around on all his wives (जाः).

The wives are waters. I do not know how क्रतुना is to be construed and what it means. Perhaps it means, with marvellous power and is to be taken with every sentence. Sōma with his marvellous power roars etc. अधित from धा = to put on.

(98) अस्य त्रितः क्रतुना वव्रे अन्तरिच्छन् धीतिं पितुरेवैः परस्य । सचस्यमानः पित्रोरुपस्थे जामि ब्रुवाण आयुधानि वेति (१०८) = पित्रोः द्यावापृथिव्योः उपस्थे अङ्के सचस्यमानः त्रितः वव्रे अन्तर् धीतिम् इच्छन् आयुधानि जामि ब्रुवाणः परस्य पितुः एवैः अस्य क्रतुना वेति.

वव्रः = that which covers or envelops, an abyss, a sea. वव्रे अन्तर धीतिम् इच्छन् = seeking (इच्छन्) wealth (धीतिं) inside (अन्तर्) the sea. आयुधानि जामि ब्रुवाणः = declaring weapons to be superfluous (जामि) because of Agni's (अस्य) marvellous power (क्रतुना). With Agni's help Trita was confident of secur-

ing wealth. **परस्य पितुः एवैः** = with the marvellous powers (**एवैः**) of the Great Father. But who is the Great Father and what does **एवैः** mean? Who are Trita's parents who foudle him in their lap? I have no clear idea of the sense of the Ṛk.

क्रत्वा = with marvellous power

(99) प्र यदित्था परावतः शोचिर्न मानमस्यथ । कस्य क्रत्वा मरुतः कस्य वर्पसा कं याथ कं ह धूतयः (१³⁸/१) = हे धूतयः मरुतः यत् यदा यूयम् इत्था एवं परावतः शोचिः न इव मानं प्र अस्यथ तदा यूयं तत् कर्म कस्य क्रत्वा कस्य वर्पसा कुरुत । कं ह खलु याथ.

धूतयः = shakers. The Maruts shake the universe while marching. **शोचिः** = a flame, a flash of lightning. **प्र** = with force. **अस्यथ** = hurl. **मानं** ? a multitude ? **क्रत्वा** = **वर्पसा** = by the marvellous power of. When you thus hurl your whole multitude as though it were a flash of lightning from the highest heaven (**परावतः**), (tell me) by whose power you do it. (Tell me) verily (**ह**) to whom you go (in such hot haste).

(100) शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः । परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन् (१⁶⁹/१) = उषः उषसः जारः । दिवः ज्योतिः सूर्यः । सः इव शुक्रः शुशुक्वान् समीची समीच्यौ द्यावापृथिव्यौ पप्रौ । देवानां पुत्रः सन् तेषां पिता भुवः भवसि । कदा । यदा प्रजातः प्रकृष्टबलः तान् क्रत्वा शक्त्या परि बभूथ अतिशेषे.

शुक्रः and **शुशुक्वान्** (from **शुच्** to blaze up)= resplendent. **दिवः ज्योतिः** = day's star, the Sun. He of mighty strength (**प्रजातः**) surpassed the gods by (his) strength. Though their son, he became their father i. e. ruler. The gods created Agni.

पप्रा =**पप्रौ**. **पप्रा** = **आपूरयिता (सायणः)**. **समीची** = heaven and earth who both go (**अञ्च्**) together (**सम्**) or have the same length. Who is the paramour of the Dawn? Agni or the Sun? If the former, then the **न** in **उषो न जारः** is an expletive. Perhaps **उषः जारः** = **दिवः ज्योतिः** = **सूर्यः**.

(101) क्रत्वा महाँ अनुष्वधं भीम आ वावृधे शवः । श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान् दधे हस्तयोर्वज्रमायसम् (१ ८१/४) = क्रत्वा बलेन् महान् भीमः इन्द्रः अनुष्वधं शवः आवावृधे । ऋष्वः महान् शिप्री हरिवान् इन्द्रः हस्तयोः आयसम् उपाकयोर्नि वज्रं श्रिये दधे.

अनुष्वधं=after large potations of Sōma or after having drunk Sōma to his heart's content. शवः = strength. भीमः etc. =The terrible one increased his might. ऋष्वः = महान् . उपाके योनिः स्थानं यस्य = whose place was near Indra ; it was always near him; it was his constant companion. शिप्री = who wore a helmet. हरिवान्=having two horses. श्रिये =for beauty (i. e. as an ornament) and not for use since he had no enemy.

(102) आदिद्धोतारं वृणते दिविष्टिषु भगमिव पपृचानास ऋञ्जते। देवान् यत्क्रत्वा मज्मना पुरुष्टुतो मर्तं शंसं विश्वधा वेति धायसे (१ १४१/६) = पपृचानासः हविषां दातारः आत् इत् तस्मिन्नेव क्षणे दिविष्टिषु यज्ञेषु होतारं वृणते । भगम् इव अग्निम् ऋञ्जते यत् यदा पुरुभिः स्तुतः अग्निः देवान् क्रत्वा मज्मना (अतिशेते) । मर्तं शंसं विश्वधा सर्वप्रकारैः धायसे पोषणाय वेति गच्छति.

All in a moment select Agni as their carrier of oblations in sacrifices. Offerers of offerings worship (ऋञ्जते) him when by his might the many-praised Agni surpasses the gods. He goes to the mortal (मर्तं) devotee (शंसं) to help (धायसे) him in all possible ways (विश्वधा). Who is भग here ?

क्रत्वा = मज्मना. दिविष्टिः = a sacrifice for obtaining wealth. देवान्० पुरुष्टुतः is appropriate to Indra ; it is ornamental here. The words may have been put in to fill up a gap. Vide, however, the next quotation. Agni released the gods from darkness by his power. This may be the sense.

(103) स जायमानः परमे व्योमन्याविरग्निरभवन्मातरिश्वने । अस्य क्रत्वा समिधानस्य मज्मना प्र द्यावा शोचिः पृथिवी अरोचयत् (१ १४३/२)=परमे व्योमनि जायमानः सः अग्निः मातरिश्वने आविरभवत् । समिधानस्य समिध्यमानस्य अस्य अग्नेः शोचिः ज्वाला द्यावापृथिवी द्यावापृथिव्यौ क्रत्वा मज्मना अरोचयत्. क्रत्वा = मज्मना = शक्त्या. प्र = exceedingly.

Agni's flames were so powerful that they illumined heaven and earth.

(104) भूरि चकर्थ युज्येभिरस्मे समानेभिर्वृषभ पौंस्येभिः । भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम । (१ १६५/७) = हे शविष्ठ वृषभ इन्द्र अस्मे अस्माभिः समानेभिः समानैः युज्येभिः युज्यैः सखिभिः पौंस्येभिः पौंस्य-युक्तैः त्वं भूरि बहूनि शूरकर्माणि चकर्थ कृतवान् असि । वयं मरुतः यत् यानि वशाम इच्छामः तानि भूरीणि वयं क्रत्वा वीर्येण कृणवाय कृतवन्तः हि खलु.

युज्य = a companion. **समान** = an equal. **पौंस्य** = a heroic act or heroism. The word seems to qualify **युज्य** and may mean **पौंस्ययुक्त.** **वशाम** imperative used for present indicative.

(105) उपस्तुतिं नमस उद्यतिं च श्लोकं यंसत्सवितेव प्र बाहू । अस्य क्रत्वाहन्यो यो अस्ति मृगो न भीमो अरक्षसस्तुविष्मान् (१ १९०/३) = मृगः न इव भीमः अरक्षसः अशत्रुः तुविष्मान् बलयुक्तः यः बृहस्पतिः अस्ति अस्य तस्य क्रत्वा अहन्यः सविता इव यथा बाहू प्र यंसत् यंसति तथा यजमानः अस्मै बृहस्पतये उपस्तुतिं नमसः हविषः उद्यतिं श्लोकं च प्र यंसत् प्रयच्छति.

Who is meant by **यः** and **अस्य** ? Who offers (**यंसत्**) praise ? What happens by his power? **अहन्यः** = he who causes day. Does it mean **अ + हन्यः = न हन्तुं शक्यः** ? Savitṛ causes day by throwing up or raising bis arms i. e. by his rays. **उपस्तुतिं = श्लोकं** = praise. **नमसः उद्यतिं** = raising i. e. offer of oblations. **अरक्षसः = अविद्यमानं रक्षसं यस्य सः.** Though **रक्षस्** is the ordinary spelling, in a few cases we have **रक्षस** also. **मृगः** = a fierce animal such as a tiger. Bṛ. is powerful and it is by his power that the Sun shines; to him the devotee offers praise and offerings. Is that the sense ?

(106) व्रता ते अग्ने महतो महानि तव क्रत्वा रोदसी आ ततन्थ । त्वं दूतो अभवो जायमानस्त्वं नेता वृषभ चर्षणीनाम् (३ ६/५).

Great as thou art (**महतः**), O Agni, thy acts (**व्रता**) are great (**महानि**). By thy marvellous power (**क्रत्वा**) thou didst stretch heaven and earth. (Heaven and earth seem contracted and diminutive in darkness. Light as it were streches them to their full extent). **चर्षणीनां = पञ्च जनानाम्.** **जायमानः** = the moment thou wrst born.

(107) तं त्वा मर्ता अगृभ्णत देवेभ्यो हव्यवाहन । विश्वान् यद्यज्ञाँ अभिपासि मानुष तव क्रत्वा यविष्ठ्य (३ १०/६).

अगृभ्णत = अगृण्हन्. Mortals received Agni from the gods that he might carry offerings to them. मनुषः अयं मानुषः. Agni belongs to Manus, man's progenitor. Manus also means man. यविष्ठं is correct and not यविष्ट्य which is a wrong pronunciation. Agni guards all offerings (यज्ञान्) on their way to the gods. यत् etc. = Since Agni is such an able guard, mortals did well in choosing him as their messenger.

(108) अहन्निन्द्रो अदहदग्निरिन्दो पुरा दस्यून् मध्यंदिनादभीके । दुर्गे दुरोणे क्रत्वा न यातां पुरू सहस्रा शर्वा नि बर्हीत् (४ $\frac{२८}{३}$) = हे इन्दो सोम पुरा इन्द्रः दस्यून् मध्यंदिनात् अभीके अहन् । अग्निश्च तान् अदहत् । इन्द्रः शर्वा शरुनामकेन आयुधेन यातां पुरू पुरूणि सहस्रा सहस्राणि दुर्गे दुरोणे क्रत्वा न सद्यः नि बर्हीत् नाशितवान् .

मध्यंदिनात् अभीके (from अभि+अञ्च्) = exactly at mid-day. दुर्गे= दुरोणे= in their inaccessible home. न=in a trice. यातां= of the assailants; या=to assail. बर्ह् = to destroy. शर्वा instr. sing. of शरु. शर्वा is Siva's name in modern Sanskṛta. शर्वा occurs 5 times in RV.; everywhere it is instr. sing; e. g. युवं ताँ इन्द्रावरुणावमित्रान् हतं पराचः शर्वा विषूचः (७ $\frac{८५}{२}$).

(109) अध क्रत्वा मघवन् तुभ्यं देवा अनु विश्वे अददुः सोमपेयम् यत्सूर्यस्य हरितः पतन्तीः पुरः सतीरपरा एतशे कः (५ $\frac{२९}{५}$) = हे मघवन् अध अथ विश्वे देवाः तुभ्यं क्रत्वा सह सोमपेयम् अनु सततम् अददुः यत् यदा क्रत्वा सूर्यस्य पुरः पतन्तीः हरितः एतशे अपराः कः.

क्रत्वा = along with power. When the gods gave Indra Sōma, they gave him strength also. हरितः = the horses of the Sun. पतन्तीः = flying, rushing. अपराः = backward, regressive. कः = अकरोः. एतश is a name of the Sun. But it was also the name of a sage who was a rival of the Sun (1$\frac{61}{15}$) and whom Indra favoured; एतशे = एतशम् अनुग्रहीतुम्. Or एतशे = एतशवर्णे हिरण्यवर्णे दिवि.

(110) सखा सख्ये अपचत्तूयमग्निरस्य क्रत्वा महिषा त्री शतानि । त्री साकमिन्द्रो मनुषः सरांसि सुतं पिबद् वृत्रहत्याय सोमम् (५ $\frac{२९}{७}$) = सखा अग्निः सख्ये इन्द्राय तूयं महिषा महिषाणां त्रीणि शतानि अपचत् । इन्द्रः साकं मनुषः त्री त्रीणि सरांसि सुतं सोमं वृत्रहत्याय पिबत् अपिबत्.

तूर्यं = at once. महिषा = महिषाणि ; but महिष is not neuter. महिषान् may have been mispronounced as महिषा. साकं = simultaneously, all at once. अस्य क्रत्वा = (inspired) by his marvellous power.

(111) प्र ये जाता महिना ये च नु स्वयं प्र विद्मना ब्रुवत एवयामरुत्। क्रत्वा तद्वो मरुतो नाधृषे शवो दाना मन्हा तदेषामधृष्टासो नाद्रयः (५ $\frac{८}{३}$ ^{७}) = ये मरुतः महिना प्र प्रकर्षेण जाताः बलवन्तः ये च एवयामरुत् एवैः अश्वैः यातारः मरुतः विद्मना स्वयं प्र ब्रुवते तेषां: वः युष्माकं बलं हे मरुतः युष्माकं क्रत्वा आधृषे आधर्षणीयं न भवति । तत् तस्मात् एषां मरुतां दाना दानानि मन्हा महत्त्वेन युक्तानि । एते मरुतः अद्रयः न इव अनाधृष्टासः अनाधृष्टाः.

जाताः = जातं बलं तेन युक्ताः. विद्मना = with consciousness of power. प्रब्रुवते = speak out, thunder. एव means a horse. एवैः यान्ति ते एवयाः = riders. एवयाः मरुतः = the Maruts who are wild riders. The word is singular for metre. क्रत्वा = by marvellous power. न आधृषे = cannot be challenged or defied; is unassailable. दाना etc. Their gifts are characterised by greatness.

(112) तव क्रत्वा तव तद्दंसनाभिरामासु पक्वं शच्या नि दीधः ।और्णोर्दुर उस्रियाभ्यो वि दळहोदूर्वाद्गा असृजो अङ्गिरस्वान् (६ $\frac{१}{६}$ ^{७}) = हे इन्द्र तव क्रत्वा तव दंसनाभिः तव शच्या त्वम् आमासु तत् पक्वं नि दीधः न्यधाः । उस्रियाभ्यः दुरः द्वाराणि वि और्णोः । दृळ्हात् ऊर्वात् गाः उत् असृजः.

क्रत्वा = दंसनाभिः . शच्या = by (thy) gift. आमासु = into calves. पक्वं = strong, healthy milk. नि+दीधः (from धृ) = didst deposit. और्णोः from ऊर्णु = to cover. वि + ऊर्णु = to discover, open. दृळ्हात् = दृढात्. ऊर्वात् = from the cattle-prison. वि + असृजः = lettest loose, didst release. अङ्गिरस्वान् = (Indra did all this) with (the help of) the Aṅgirasas. Indra impregnated the Dawns with the Sun. This is what is meant by his putting milk into calves. Indra also released the cows viz. the Dawns from Vṛtra.

(113) प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः । अयं य उर्वी महिना महिव्रतः क्रत्वा वि भात्यजरो न शोचिषा (६ $\frac{६}{९}$) = हे सप्रथः अध्वर्यो सम्राजे बृहते देवाय वरुणाय प्रियं मन्म नु अधुनैव प्र अर्च अर्पय। यः अयं महिव्रतः वरुणः अजरः अग्निः शोचिषा ज्वालया क्रत्वा महिना उर्वी द्यावापृथिव्यौ न सद्यः विभाति.

नु = न = at once. सप्रथः = rich. क्रत्वा = महिना. शोचिषा = ज्वालया. Agni is Varuna here.

(114) अभि क्रत्वेन्द्र भूरध ज्मन् न ते विव्यङ् महिमानं रजांसि। स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते (७ २१/६) = हे ज्मन् परिज्मन् इन्द्र अध अथ क्रत्वा शौर्येण त्वं सर्वान् लोकान् अभिभूः अभिभवसि। ते तव महिमानं रजांसि लोकाः न विव्यक् व्याप्नुवन्ति। स्वेन शवसा हि त्वं वृत्रं जघन्थ। ते तव अन्तं शत्रुः युधा न विविदत्.

ज्मन् occurs here and in एप स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन् (७ ६०/२). In both we have अभि and ज्मन्. ज्मन् occurs in परिज्मन्. It probably means 'going'. Indra is addressed as परिज्मान् in 1 6/४. स्वेन = शवसा. विव्यक् = विविचुः=equal. युधा = युद्धेन.

(115) हवं त इन्द्र महिमा व्यानड् ब्रह्म यत्पासि शवसिन्नृषीणाम्। आ यद्वज्रं दधिषे हस्त उग्र घोरः सन् क्रत्वा जनिष्ठा अषाळ्हः (७ २८/२) = हे शवसिन् उग्र इन्द्र त्वं क्रत्वा अषाळ्हः जनिष्ठाः जातः यत् घोरः सन् हस्ते वज्रम् आदधिषे। यत् यस्मात् ऋषीणां ब्रह्म हवं पासि तस्मात् ते तव महिमा रोदसी व्यानट् व्याप्नोति.

शवसिन्=बलिष्ठ. व्यानट् from वि+अश्. पासि = protectest or rewardest. हवं=ब्रह्म. Or does हव (हु=to call) mean a battle in which warriors challenge one another? In that case 'Indra's greatness fills the whole battle-field' would be the sense. दधिषे from धा + स्(of लेट्). क्रत्वा अषाळ्हः = not to be defeated on account of his strength.

(116) उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम्। समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् (७ ६२/१) = बृहत् सूर्यः मानुषाणां पुरु पुरूणि विश्वा विश्वानि जनिम जनिमानि यावत् अर्चींषि उदश्रेत् उत् श्रयति प्रसारयति। रोचमानः दिवा समः ददृशे। कर्तृभिः क्रत्वा कृतः असौ सूर्यः सुकृतः भूत् भवति.

The Sun spreads his light throughout all the groups of men. Shining he looks like Dyans. Made by the gods (by their marvellous power), he appears well-made. उत् + श्रि = to spread

out. पुरु = विश्वा. जनिम = a gronp, a race. दिवा समः = resembling Dyans. The Sun was fashioned by the gods (कर्तृभिः). It was an excellent creation and showed great skill and power. Vide 117.

(117) उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्। क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः (७ ७६/१) = विश्वानरः सविता देवः विश्वजन्यम् अमृतं ज्योतिः उत् अश्रेत्। देवानां चक्षुः क्रत्वा अजनिष्ट। उषाः विश्वं भुवनम् आविः अकः अकरोत्.

विश्वजन्यं = belonging to all the 5 Āryan tribes. Is ज्योतिः the Dawn? The Sun spreads his immortal light. The gods by their miracle-working power created this eye of theirs. Is that eye the Sun or the Dawn? विश्वानरः = विश्वं धनम्। तेन युक्तः ना धनं यस्य सः = exceedingly rich.

(118) योद्धासि क्रत्वा शवसोत दंसना विश्वा जातानि मज्मना। आ त्वायमर्क ऊतये ववर्तति यं गोतमा अजीजनन् (८ ८८/४) = क्रत्वा शवसा उत अपि च दंसना दंसनया मज्मना च विश्वा विश्वानि जातानि योद्धा आसि। त्वाम् अयम् अर्कः ऊतये धनदानाय आववर्तति यम् अर्कं गोतमाः अजीजनन्.

क्रत्वा = शवसा = दंसना = मज्मना. जातं = strength. जातानि = बलवान्ति = strong creatures. अर्कः = a praise. ऊतये = for (obtaining) wealth. आववर्तति = आववर्ततु = इह आनयतु = turn hither.

(119) विश्वाः पृतना अभिभूतरं नरं सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे। क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं तवसं तरस्विनम् (८ ९७/१०).

अभिभूः = one that overcomes. अभिभूतरं = one that overcomes more than any विश्वाः पृतनाः = all hostile armies. सजूः = in co-operation. ततक्षुः = जजनुः = created. राजसे = for ruling. क्रत्वा वरिष्ठं = highest in strength or richest by wealth. उग्रं = ओजिष्ठं = तवसं = तरस्विनं = strong or strongest. नरं = a hero. वरे आमुरिं? आमूः आमुरौ आमुरः etc. आमुरः occurs 4 times in RV. and is either genitive or nominative. आमुरिः seems a variation of आमूः. आमुरिः = a destroyer? आ + मुर = to destroy? क्रत्वा वरे धने वरिष्ठं may be the construction.

(120) क्रत्वा शुक्रेभिरक्षभिर्ऋणोरप व्रजं दिवः। हिन्वन्नृतस्य दीधितिं प्राध्वरे (९^{१०२}_८)= अध्वरे ऋतस्य दीधितिं प्र हिन्वन् हे सोम त्वं क्रत्वा शुक्रेभिः शुक्रैः अक्षभिः अक्षिभिः दिवः व्रजम् अप ऋणोः.

क्रत्वा = by thy marvellous power. As Agni opened the cow-fold of heaven i. e. brought down rain by his flames, Sōma too does the same with his flaming eyes. ऋतस्य दीधितिं प्र हिन्वन् = sending gifts of wealth.

(121) आ मध्वो अस्मा असिचन्नमत्रमिन्द्राय पूर्णं स हि सत्यराधाः। स वावृधे वरिमन्ना पृथिव्या अभि क्रत्वा नर्यः पौंस्यैश्च (१०^{२९}_७) = अस्मै इन्द्राय मध्वः मधुनः सोमस्य पूर्णम् अमत्रं पात्रम् ऋत्विजः आ असिचन्। हि यस्मात् सत्यराधाः (सत्यं धनम्। तेन युक्तं राधः धनं यस्य सः) नर्यः शूरः इन्द्रः क्रत्वा पौंस्यैः च पृथिव्याः वरिमन् आ विस्तृते प्रदेशे अभि वावृधे अवर्धत. यद्वा। नर्यः धनयुक्तः। क्रत्वा धनेन। पौंस्यैः धनैः.

सत्यराधाः = abundantly rich. वरिमन् आ पृथिव्याः = in the broad and wide expause of पृथिवी. पृथिव्याः = दिवः = of wide heaven or the wide mid-region. क्रत्वा = पौंस्यैः = by heroic deeds. असिचन् = असिञ्चन् = poured, emptied. आ = completedly. अमत्रं= a drinking vessel. Or क्रत्वा = पौंस्यैः = with riches ; नर्यः =wealthy.

(122) अभागः सन्नप परेतो अस्मि तव क्रत्वा तविषस्य प्रचेतः। तं त्वा मन्यो अक्रतुर्जिहीळाहं स्वा तनूर्बलदेयाय मेहि (१०^{८३}_५) = हे प्रचेतः मन्यो तविषस्य तव क्रत्वा अभागः सन् अप अस्मि परेतः अस्मि। अक्रतुः अहं तं त्वा त्वां जिहीळ। मम स्वा तनूः मा मां बलदेयाय इहि.

प्रकृष्टं चेतः धनं यस्य स प्रचेताः. हे प्रचेताः = O rich (Manyu). Metre requires प्रचेतसः which then would qualify तव. अक्रतुः = who makes no offerings. I have made thee no offerings and have on that account offended (जिहीळ) or disrespected thee. Thou art powerful (तविषस्य). By thy power (क्रत्वा) I have no share in riches (अभागः). As such I am far removed (अप अस्मि) from thee. I am dead (परेतः = परा + इतः). Become my own self (स्वा तनूः) and come (इहि) to me (मा) for giving me the strength of wealth (बलदेयाय). स्वा तनूः is difficult.

18

क्रतुभिः = with power

(123) त्वं चिदस्य क्रतुभिर्निषत्तममर्मणो विददिदस्य मर्म । यदीं सुक्षत्र प्रभृता मदस्य युयुत्सन्तं तमसि हर्म्ये धाः (५३३²) = हे इन्द्र अस्य अमर्मणः शुष्णस्य निषत्तं चित् अपि मर्म त्वं क्रतुभिः विदत् लब्धवान् इत् एव । यत् यदा तदा हे सुक्षत्र बलवन् इन्द्र मदस्य सोमस्य प्रभृता प्रभृतौ त्वं युयुत्सन्तं ईम् एतं तं शुष्णं तमसि हर्म्ये धाः निहितवान्.

Ś. had concealed his vulnerable part (मर्म) deep in his body and appeared as having no vulnerable part (अमर्मणः). Notwithstanding (चित्) this, Indra did discover (विदत् इत्) that part by his power (क्रतुभिः). After drinking Sôma in large quantities (मदस्य प्रभृता) Indra shut (धाः) him in a heaven (हर्म्ये) of darkness (तमसि). Ś. had desired to live in real heaven (हर्म्ये). ' अस्य शुष्णस्य क्रतुभिः. निषत्तं' (= lying concealed by his tricks) may also be the construction of क्रतुभिः.

(124) त्वां विश्वे अमृत जायमानं शिशुं न देवा अभि सं नवन्ते । तव क्रतुभिरमृतत्वमायन् वैश्वानर यत्पित्रोरदीदेः (६७४) = हे अमृत वैश्वानर विश्वे देवाः जायमानं त्वां शिशुं न इव अभिसंनवन्ते । तव क्रतुभिः ते अमृतत्वम् आयन् यत् यदा पित्रो त्वम् अदीदेः.

अभिसंनवन्ते = fondle, kiss (thee as they would a new-born babe). It was owing to Agni's wonder-working powers that the gods became immortal or wealthy. पित्रोः अदीदेः = when thou didst shine out of thy two parents i. e. either the two fire-sticks or heaven and earth.

(125) प्रास्तौदृष्वौजा ऋष्वेभिस्ततक्ष शूरः शवसा । ऋभुर्न क्रतुभिर्मातरिश्वा (१०१०५६) = ऋष्वौजाः प्रास्तौत् । शूरः मातरिश्वा ऋभुः न शवसा क्रतुभिः ततक्ष.

ऋष्वम् ओजः यस्य सः = of mighty strength. ऋष्वेभिः = ऋष्वैः = (in company) with the mighty. Who were these? The Maruts? Brave Indra (शूरः) like Ṛbhu manufactured (ततक्ष) by using his strength (शवसा) and marvellous powers (क्रतुभिः) in co-operation with the mighty (Maruts ?). What did he manufacture? Why is he called Mātaris'van ? Indra of mighty

strength began (प्र + असौत्) and manufactured his horses like Rbhu with great skill. The Rk. seems incomplete and is unintelligible.

क्रत्वे = for power

(126) स्तीर्णं बर्हिरुप नो याहि वीतये सहस्रेण नियुता नियुत्वते शतिनीभिर्नियुत्वते । तुभ्यं हि पूर्वपीतये देवा देवाय येमिरे । प्र ते सुतासो मधुमन्तो अस्थिरन् मदाय क्रत्वे अस्थिरन् (१ १३५/१) = हे वायो बर्हिः आसनार्थं स्तीर्णं वर्तते । वीतये हविर्भक्षणाय नः अस्मान् उप याहि सहस्रेण नियुता दानेन शतिनीभिः शतसंख्याकाभिः (नियुद्भिः) नियुत्वते धनवते दानाय । देवाः तुभ्यं देवाय पूर्वपीतये सोमं येमिरे । मधुमन्तः सुताः सोमाः ते तव मदाय तव क्रत्वे बलाय प्र अस्थिरन् प्रास्थिताः सन्ति.

सहस्रेण नियुता = with wealth to be counted by thousands. नियुत् = a gift. शतिनीभिः (नियुद्भिः) = (with gifts) consisting of hundreds of cows etc. नियुत् is feminine. येमिरे from यम् = to give. प्र + अस्थिरन् = have set out. स्था becomes स्थि in the aorist; रन् is the plural termination. ते मदाय क्रत्वे = to put hilarity (मदाय) and strength (क्रत्वे) into thee. Or क्रत्वे = मदाय = for power.

(127) असावि ते जुजुषाणाय सोमः क्रत्वे दक्षाय बृहते मदाय । हरी रथे सुधुरा योगे अर्वागिन्द्र प्रिया कृणुहि हूयमानः (५ ४३/५) = हे इन्द्र जुजुषाणाय ते तुभ्यं क्रत्वे दक्षाय बृहते मदाय सोमः असावि । हूयमानः त्वं रथे योगे सुधुरा सुधुरौ प्रिया प्रियौ हरी अर्वाक् कृणुहि कुरु.

असावि = has been extracted. क्रत्वे = दक्षाय = मदाय = for power. योगे = रथे. सुधुरा = bearing the yoke. अर्वाक् कृणुहि = turn them down (hither). हूयमानः = आहूयमानः. Or क्रत्वे = दक्षाय = बृहते = मदाय = for (giving us) wealth.

(128) अस्य पिब जज्ञान इन्द्र मदाय क्रत्वे अपिबः (६ ४०/२) = Drink of this, O Indra, of which the moment thou wast born (जज्ञानः) thou drankest for (obtaining) strength. क्रत्वे = मदाय.

क्रतुं = a command

(129) नहि देवो न मर्त्यो महस्तव क्रतुं परः (१ १९/२) = हे अग्ने महः महतः तव क्रतुं परः न हि खलु देवः न मर्त्यः वर्तते.

परः = beyond (the reach of); the word governs the accusative or the instrumental. क्रतुं = command or strength. Everyone must submit to Agni's command and strength.

(130) क्रतुं सचन्ते वरुणस्य देवा राजामि कृष्टेरुपमस्य वव्रेः (४ ४२/१)= The gods obey (सचन्ते) the command of Varuṇa. (So all must obey my command, says a king). I rule over all people (कृष्टेः) and also over Vṛtra, the water-enveloper (वव्रेः), the unrivalled (उपमस्य) foe of Indra.

I am Varuṇa, I am Indra. Indra crushed the 5 Āryan tribes and became their suzerin; he killed Vṛtra. I resemble Indra. राजामि, राजावः etc. is the conjugation of राज् = to rule over. कृष्टेः = कृष्टीनाम्. वव्रिः = one that envelopes (water), Vṛtra, an enemy. उपमस्य वव्रेः= of the greatest enemy. Vṛtra was the greatest enemy of Indra.

(131) अहं केतुरहं मूर्धाहमुग्रा विवाचनी । ममेदनु क्रतुं पतिः सेहानाया उपाचरेत् (१० १५९/२) = I am the head (केतुः = मूर्धा) of the house. I am fierce of tongue (उग्रा) and capable of out-tounging any (विवचनी). My husband must follow (अनु उपाचरेत्) my command (क्रतुं) only (इत्), as I can discomfit him (सेहानायाः).

विवाचनी = speaking wildly, out-heroding Herod himself. With my terrible tongue I can silence any co-wife. सेहानायाः from सह् = to bear down.

क्रतुः = an offering

(132) परि सुवानश्चक्षसे देवमादनः क्रतुरिन्दुर्विचक्षणः (९ १०७/३) = (पवित्रं) परि सुवानः सूयमानः देवमादनः इन्दुः विचक्षणः क्रतुः भवति.

परि = through. When Sōma passes through the strainer for lustre (चक्षसे), then he becomes a lustrous (विचक्षणः) offerng. देवमादनः = who intoxicates the gods, throws them into an ecstacy. क्रतुः = an offering ; or full of wealth.

क्रतुं = an offering

(133) प्र सू तिरा शचीभिर्ये त उक्थिनः क्रतुं पुनत आनुषक् (८ ५३/६) =

हे इन्द्र ये उक्थिनः स्तोतारः ते तुभ्यं हविः आनुषक् सततं पुनते ददति तान् सु शचीभिः धनैः यद्वा सु अत्यन्तम् प्र तिर वर्धय.

(134) अञ्जते व्यञ्जते समञ्जते क्रतुं रिहन्ति मधुनाभ्यञ्जते । सिन्धोरुच्छ्वासे पतयन्तमुक्षणं हिरण्यपावाः पशुमासु गृभ्णते (९.८६.४३) = (Priests purifying Sōma mix him with sweet milk (मधुना); they lick him i. e. smear him with it. They seize him while he is rushing in the river-stream. अञ्ज् = to smear. रिह् = to lick, to smear. वि = in a variety of ways. सम् = wholly. अभि= on all sides. All 3 prefixes indicate complete dilution. क्रतुं = Sōma-offering. सिन्धुः = the water in the big vessel. In the language of exaggeration it is a river tl at rushs along in waves. उच्छ्वासे = in the current. उक्षणं = (Sōma is) a bull that flies (पतयन्तं) along the stream. पशुं = Sōma is an animal, a bull. आसु = अप्सु (understood). गृभ्णते = गृण्हन्ति. The priests capture him while he is rushing along. हिरण्यं पान्ति (= पिबन्ति) ते हिरण्यपावानः. But who are these that drink gold ? gods or priests ? Gods drink the gold-coloured Sōma but they do not prepare the drink. It is priests that do it. They are हिरण्यपावाः but not in the first instance. पावाः is irregular. Cp सुतपावन् and सोमपावन्.

(135) सो चिन्नु भद्रा क्षुमती यशस्वती उषा उवास मनवे स्वर्वती । यदीमुशन्तमुशतामनु क्रतुमग्निं होतारं विदथाय जीजनन् (१०.११.३) = भद्रा क्षुमती यशस्वती स्वर्वती सा उषाः मनवे उवास उदियाय । यत् यदा क्रतुं हविः उशतां कामयमानानां देवानाम् अर्थे ईम् एतम् उशन्तं कामयमानं होतारम् अग्निं विदथाय यज्ञाय हविर्वहनाय ऋत्विजः जीजनन् अजीजनन्.

सो = सा + उ. उ, चित्, नु all mean, certainly. भद्रा etc. = possessed of wealth. भद्र = क्षु = यशस् = स्वर् = wealth. उवास = rose. मनवे = for (the good of) man. अनु = immediately after the rise of the Dawn. उशन्तं = Agni himself desires offerings. विदथाय = that he may convey offerings.

क्रत्वा= with an offering

(136) स सुक्रतुः पुरोहितो दमेदमेऽग्निर्यज्ञस्याध्वरस्य चेतति क्रत्वा

यज्ञस्य चेतति । क्रत्वा वेधा इषूयते विश्वा जातानि पस्पशे। यतो घृतश्रीरतिथिरजायत वन्हिर्वेधा अजायत (१ १२८/४)= दमे दमे पुरोहितः सः सुक्रतुः अग्निः यज्ञस्य अध्वरस्य यज्ञम् अध्वरं चेतति देवेभ्यः ददाति । वेधाः क्रत्वा इषूयते । विश्वा विश्वानि जातानि पस्पशे । यतः यदा घृतं श्रीः यस्य सः वन्हिः वेधाः अजायत ततःप्रभृति.

दमेदमे = in every house पुरोहितः = Agni is the chief priest in every house. यज्ञस्य = अध्वरस्य = यज्ञम् = अध्वरं = हविः. चेतति from चित्=to give. वह्निः = the carrier (of offerings). वेधाः =the leader. इषूयते ? इषुवत् आचरति = goes straight like an arrow to carry out his mission of conveying offerings to the gods. पस्पशे = sees. विश्वा जातानि = all creatures. घृतश्रीः = having the lustre of ghee. सुक्रतुः = क्रतुयुक्तः = possessed of offerings. यतः etc. (he did all this) as soon as he was born. The 1st क्रत्वा seems to be put in for metre. If it has any meaning, it must be हविषा. हविषा युक्तस्य यज्ञस्य हविषः.

(137) क्रत्वा यदस्य तविषीषु पृञ्चतेऽग्ने रवेण मरुतां न भोज्येषिराय न भोज्या । स हि ष्मा दानमिन्वति वसूनां च मज्मना । स नस्त्रासते दुरितादभिन्हुतः शंसादघादभिन्हुतः (१ १२८/५) = यत् यदा अस्य अग्नेः तविषीषु बलयुक्तासु ज्वालासु इषिराय धनयुक्ताय अग्नये भोज्या भोज्यानि हवींषि क्रत्वा हविषा सह पृञ्चते ददति तदा सः अग्निः वसूनां दानम् इन्वति ददाति मज्मना च शक्त्या सः नः अस्मान् अभिन्हुतः नाशकात् दुरितात् संकटात् अभिन्हुतः नाशकात् अघात् शंसात् अघशंसात् त्रासते रक्षति.

तविषीषु = in (his) strong, powerful flames. मरुतां रवेण न may be construed with तविषीषु. The flames crackle as if with the roar of the Maruts. The 2nd न is put in for metre. इष् = wealth. इषिर = wealthy. भोज्य = an offering. क्रत्वा (= हविषा) is superfluous. हि ष्मा = certainly. त्रा + स् (of लेट्). अभिन्हुत् = injurious. अघशंसात् has been split into शंसात् अघात्.

(138) तामिन्न्वेव समना समानमभि क्रत्वा पुनती धीतिरश्याः (४ ५/७)= समना पुनती धीतिः तम् इत नु एव समानं क्रत्वा अभि अश्याः अश्यात् अश्नोतु.

May prayera, (like) a faithful wife, serve the husband (Agni) with food. समना = a wife. समानं = a husband. धीतिः = a prayer which is as it were a wife. पुनती = offering herself. पू (= to purify) also means 'to give'. अभि + अश्याः (used for अश्यात्) = serve completely.

(139) क्रत्वा हि द्रोणे अज्यसेऽग्ने वाजी न कृत्व्यः । परिज्मेव स्वधा गयोऽत्यो न ह्वार्यः शिशुः (६ २/२) = हे अग्ने द्रोणे कलशे वर्तमानेन क्रत्वा हविषा त्वम् अज्यसे । वाजी न इव त्वं कृत्व्यः शूरः असि । परिज्मा वायुः । स इव त्वं स्वधा स्वधावान् गयः गययुक्तः असि । अपां शिशुः त्वम् अत्यः न इव ह्वार्यः असि.

अज्यसे from अञ्ज्=to smear, to cover. कृत्व्यः=brave, capable. परिज्मा = that which goes all about; here the wind. स्वधा = गयः = wealth; wealthy. ह्वार्यः = fast-going ? ह्वृ seems to mean 'to go'. The word occurs again in उत स्म दुर्गृभीयसे पुत्रो न ह्वार्याणाम् (५ ९/६) where ह्वार्याणां seems to mean 'of rushing waters'. अत्यः = वाजी = a horse.

(140) सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः । द्रवन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः (६ १/४/२) = स जातवेदाः अग्निः दमे आ मध्ये अस्माकेभिः अस्माकं शूषैः स्तुतिभिः एतरी उषाः न इव स्तवे स्तूयते । द्रुः अन्नं यस्य सः वन्वन् क्रत्वा यज्ञैः हविर्भिः .

(211) **षळश्वाँ आतिथिग्व इन्द्रोते वधूमतः । सचा पूतक्रतौ सनम् (८$\frac{६८}{१७}$) = इन्द्रेण ऊते अतिथिग्वस्य पुत्रे पूतक्रतौ अहं वधूमतः षट् अश्वान् सचा सनम् आप्नवम्.**

ऊते = rewarded. **पूतः क्रतुः धनं येन** = one that gives away wealth in charity. **वधूमतः अश्वान्** = horses with their wives i. e. with as many mares; or were six wives on horseback presented to the devotee? **पूतक्रतौ** locative for ablative is idiomatic. **सचा** = at one and the same time. Or does it mean a friend of the king? **सन्** means both to give and to obtain. I obtained six horses and six mares from the son of A. who gave away wealth to whomsoever asked for it and who had been endowed with enormous riches by Indra.

पूतक्रतायै

(212) **तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता । अश्वानामिन्न यूथ्याम् (८$\frac{५६}{४}$) = तत्रो तत्र उ एव पूतक्रतायै अश्वानां व्यक्ता अलंकृता यूथ्यां (?) प्र वेगेन अपि अनीयत इत् एव न सद्यः.**

It is impossible to construe and interpret the Ṛk. unless we alter **यूथ्यां** to **यूथ्या.** There (**तत्र उ**) and then (**इत् न**) was presented (**अपि अनीयत**) a bedecked (**व्यक्ता**) troop (**यूथ्यां** ?) of horses (**अश्वानां**) to P. **व्यक्ता = अञ्जिभिः अलंकृता** = bedecked. **न** = immediately. **पौतक्रत** in the following quotation may be the son of this P. **पूतं क्रतं धनं यया सा पूतक्रता**. Sāyaṇa does not explain the Ṛk as it is a **वालखिल्य.**

पौतक्रतः son of पूतक्रत ।

(213) **दश मह्यं पौतक्रतः सहस्रा दस्यवे वृकः । नित्याद्रायो अमंहत (८$\frac{५६}{२}$) = दस्यवे वृकः पौतक्रतः मह्यं नित्यात् स्वकीयात् रायः धनात् दश सहस्रा सहस्राणि अमंहत.**

दस्यवे वृकः = a wolf to Dasyus, a destroyer of enemies. पूत-क्रतायाः पुत्रः पौतक्रतः. क्र (= to give) + तं = given, a gift. There is पूतक्रतौ (८¹⁄₁₆) loc. sing. of पूतक्रतुः. नित्यात् = from his own. मंह = to give.

वरेण्यक्रतो (अग्ने) = from whom wealth or offerings are desirable

(214) उत त्वा नमसा वयं होतर्वरेण्यक्रतो । अग्ने समिद्भिरीमहे (८४३)= हे होतर् वरेण्यक्रतो अग्ने वयं त्वां नमसा समिद्भिश्च ईमहे याचामहे.

होतर् = O invoker of the gods or giver of wealth. वरेण्यः क्रतुः यस्य सः = offerings from whom are desirable or wealth from whom is asked. नमसा = हविषा. समिद्भिः = हविर्भिः; समिध् in ṚV. means an offering.

विभुक्रतुः = whose power is all prevailing

(215) अर्भको न कुमारकोऽधि तिष्ठन्नवं रथम् । स पक्षन्महिषं मृगं पित्रे मात्रे विभुक्रतुम् (८६९) = अर्भकः कुमारकः न इव इन्द्रः नवं नूतनं रथम् अधि तिष्ठत् तिष्ठति । पित्रे मात्रे विभुक्रतुं महिषं मृगं स पक्षत् पचति.

अर्भः = small. अर्भकः = very small. कुमारः = a boy. कुमारकः = a little boy. अर्भकः कुमारकः = a very very tiny boy. Like a very very tiny boy Indra sits in a brand-new chariot; and yet he (kills and) cooks a powerful (विभुक्रतुं), wild beast (मृगं), viz. a fierce wild buffalo for (i. e. to satisfy) his hungry parents.

वृषक्रतुः (इन्द्रः) =having the strength of a bull

(216) य एक इत्तमु ष्टुहि कृष्टीनां विचर्षणिः । पतिर्जज्ञे वृषक्रतुः (६४५) = विचर्षणिः वृषक्रतुः यः एकः इत् एव कृष्टीनां पतिः तम् उ एव स्तुहि. विश्वाः चर्षणयः यस्य स विश्वचर्षणिः. कृष्टि a name of the 5 Āryan tribes; so also चर्षणि. विचर्षणिः (which ought to be. विश्वचर्षणिः to suit the metre) = having all the wealth of the 5 Āryan tribes.

वृषक्रतो (इन्द्र)

(217) वृषा त्वा वृषणं वर्धतु द्यौर्वृषा वृषभ्यां वहसे हरिभ्याम् । स नो वृषा वृषरथः सुशिप्र वृषक्रतो वृषा वज्रिन् भरे धाः (५३६). Dyaus is a bull,

so is Indra; his horses are bulls, his chariot is a bull. त्वा द्यौः वर्धतु = let Dyaus praise thee. वहसे = उह्यसे. सुशिप्र = O thou that wearest two helmets or two crowns. नः भरे धाः = place i. e. support us in the battle-field. वृषन् occurs 7 times in this Ṛk. 'Indra's horses are bulls' is rather humorous.

संभृतक्रतो (इन्द्र) = O thou in whom all strength is concentrated

(218) जघन्वाँ उ हरिभिः संभृतक्रतविन्द्र वृत्रं मनुषे गातुयन्नपः। अयच्छथा बाह्वोर्वज्रमायसमधारयो दिव्या सूर्यं दृशे (१$\frac{५२}{२}$) = हे संभृतक्रतो इन्द्र हरिभिः मनुषे वृत्रं जघन्वान् अपः उदकानि च गातुयन् संचारयन् त्वं बाह्वोः आयसं वज्रम् अयच्छथाः। दिवि च सूर्यं दृशे आ अधारयः.

हरिभिः is unconnected with any word in the Ṛk. हरिभिः युक्तं रथम् आतिष्ठन् = while seated in thy horse-chariot? or हरिभिः वृत्रं जघन्वान्? or हरिभिः अश्वबलैः मरुद्भिः सह? अयच्छथाः from यम् = to place. आयसं = of steel. दृशे = that men may look at the Sun.

हेषक्रतवः (मरुतः) = whose strength is their roar

(219) अग्निश्रियो मरुतो विश्वकृष्टय आ त्वेषमुग्रमव ईमहे वयम्। ते स्वानिनो रुद्रिया वर्षनिर्णिजः सिंहा न हेषक्रतवः सुदानवः (३$\frac{२६}{५}$) = हे अग्निश्रियः विश्वकृष्टयः मरुतः वयं युष्माकम् उग्रं त्वेषम् अवः आ ईमहे। ते मरुतः स्वानिनः रुद्रियाः वर्षनिर्णिजः सुदानवः सिंहाः न इव हेषक्रतवः. अग्निश्रियः = possessed of Agni's splendour. विश्वकृष्टयः = who have all the 5 Āryan tribes obedient unto them. त्वेषम् उग्रं = lustrous and huge. अवः = wealth. आ + ईमहे = we beg. स्वानिनः = स्वानः विद्यते एषां ते = thunderers. रुद्रियाः = रुद्रपुत्राः. वर्षः निर्णिक् येषां ते = whose dress is rain; they appear in rain. हेष = the roar of a lion? हेषे क्रतुः येषां ते. The Maruts show their utmost power in roaring like lions. हेषा ह्रेषा च निस्वनः (अमर २$\frac{६}{४७}$) = the neighing of horses is हेषा or ह्रेषा. हेषस्वतः (६$\frac{३}{३}$) अग्नेः = of Agni roaring. But in तपिष्ठेन हेषसा (१०$\frac{६}{१}\frac{३}{२}$) हेषस् is a missile. So हेषेषु क्रतुः येषां = whose power is seen in their hurling missiles. Agni's flames may be his missiles. So he is हेषस्वान्.

शतक्रतुः = possessed of immense wealth

(220) द्विता यो वृत्रहन्तमो विद इन्द्रः शतक्रतुः। उप नो हरिभिः

सुतम् (८१३) = यः वृत्रहन्तमः शतक्रतुः इन्द्रः द्विता विदे स नः सुतं हरिभिः उप (आगच्छतु) = May Indra come to our Sōma with his horses. Indra who gives (विदे) permanently (द्विता), being possessed of countless wealth (शतक्रतुः). वृत्रहन्तमः (= the greatest killer of foes) is an ornamental epithet.

शतक्रतुं

(221) आ व इन्द्रं क्रिविं यथा वाजयन्तः शतक्रतुम् । मंहिष्ठं सिञ्च इन्दुभिः (१३१०) = क्रिविं यथा इव शतक्रतुं मंहिष्ठम् इन्द्रं वाजयन्तः वः यूयम् इन्दुभिः आ सिञ्च सिञ्चत.

क्रिवि seems to have been a mighty god who was fond of Sōma. वाजयन्तः = desirous of wealth. मंहिष्ठं = दातृतमम्; मंह = to give. सिञ्च (irregular for सिञ्चत) = drench.

(222) अभीमवन्वन् स्वभिष्टिमूतयोऽन्तरिक्षप्रां तविषीभिरावृतम् । इन्द्रं दक्षास ऋभवो मदच्युतं शतक्रतुं जवनी सूनृतारुहत् (१५१) = अन्तरिक्षं पूरयति तम् अन्तरिक्षप्रां तविषीभिः बलैः आवृतम् अभिष्टयः घनानि विद्यन्ते अस्य तं स्वभिष्टिं मदेन पर्वतान् च्यावयति तम् ईम् एतम् इन्द्रम् ऊतयः दक्षासः दक्षाः ऋभवः अभि अवन्वन् । शतक्रतुम् इन्द्रं जवनी सूनृता अरुहत् आरोहत्.

अभिष्टि, ऊति, दक्ष, ऋभु, and सूनृता all mean wealth. अभि + अवन्वन् = chose (for residence). मदच्युत् = one that fells mountains through intoxication (i. e. strength). स्वभिष्टिं = शतक्रतुं = possessed of immense wealth. क्रतु may denote both wealth and strength. जवनी (from जु = to send in haste) = something sent, a gift. जवनी = सूनृता.

(223) शतक्रतुमर्णवं शाकिनं नरं गिरो म इन्द्रमुप यन्ति विश्वतः । वाजसनिं पूर्भिदं तूर्णिमप्तुरं धामसाचमभिषाचं स्वर्विदम् (३५१). शतक्रतुं, अर्णवं, शाकिनं, वाजसनिं, धामसाचं refer to wealth. नरं, पूर्भिदं, तूर्णिं, अप्तुरं, अभिषाचं refer to strength. अर्णवं = अर्णयुक्तम्. अर्ण means water and then wealth. (अर्णसातौ = in a battle for wealth). शक् = to give. शाक = a gift. शाकी = a giver of gifts. वाजसनिं = a giver of wealth. धामसाचं = one that gives (सचते) wealth. धा + मन् = धाम. धा = to give. स्वर्विद् = one that gives the Sun i. e. wealth. नरं = a warrior or a giver from नृ = to fight, to give. पूर्भिदं

= a smasher of forts and a giver of cows pent therein. तूर्णिं = a destroyer or a giver. अप्तुरं=one that destroys (Vṛtra that hems in) water. अभिषाचं = one that helps by killing (अभि) foes. In fact all the epithets refer to wealth directly or indirectly. गिरः मे इन्द्रम् उप यन्ति विश्वतः = my praises approach Indra from all sides.

(224) यस्मै त्वं वसो दानाय मंहसे स रायस्पोषमिन्वति । वसूयवो वसुपतिं शतक्रतुं स्तोमैरिन्द्रं हवामहे (८ ५२/६) = हे वसो वसुमन् इन्द्र यस्मै त्वं दानाय मंहसे स रायः पोषम् इन्वति । वसूयवः वसुकामाः वयं वसुपतिं शतक्रतुं स्तोमैः हवामहे आव्हयामः.

यस्मै त्वं दानाय मंहसे ; here दानाय is equal to दानं. इन्वति = गच्छति. मंहसे = ददासि. रायः = पोषं The second half is also the 2nd half of $8\frac{81}{10}$. वसुपतिं = शतक्रतुं.

(225) य आयुं कुत्समतिथिग्वमर्दयो वावृधानो दिवेदिवे । तं त्वा वयं हर्यश्वं शतक्रतुं वाजयन्तो हवामहे (८ ५३/२). This Kutsa seems to be different from the son of Arjuni whom Indra so often saved. The Kutsa in the present Ṛk is of the Āyu tribe. अर्दयः = destroyest. वावृधानः = वर्धमानः = prospering (his devotees). हरी अश्वौ यस्य स हर्यश्वः. If अर्द् means to reward, then Āyu etc. would be Indra's devotees. Most probably अर्द् has this sense here.

(226) पान्तमा वो अन्धस इन्द्रमभि प्र गायत । विश्वासाहं शतक्रतुं मंहिष्ठं चर्षणीनाम् (८ ९२/१) = अन्धसः सोमस्य आ पान्तं पातारं शतक्रतुं मंहिष्ठं चर्षणीनां विश्वासाहम् इन्द्रम् अभि प्र गायत वः यूयम्.

पान् पान्तौ पान्तः पान्तं etc. is the declension of पान् pres. part. of पा. आ may be a prefix to पान्तं. आपान्तं = निःशेषं पातारम्. विश्वासाहं चर्षणीनां = विश्वासां चर्षणीनां साहं सहितारम् अभिभवितारम्; or चर्षणीनां पञ्चजनानां विश्वं धनं यः सहते जयति तम्. मंहिष्ठं= दातृतमम्.

(227) इष्कर्तारमनिष्कृतं सहस्कृतं शतमूतिं शतक्रतुम् । समानमिन्द्रमवसे हवामहे वसवानं वसूजुवम् (८ ९९/७). इषः धनस्य कर्तारं दातारम्. शतमूतिं = शतम् ऊतयः दानानि धनानि यस्य तं = शतक्रतुम्. वसु वनोति ददाति असौ वसुवा । तम्. वसूजुवम् = वसुनः प्रेरयितारम्. अवसे = धनाय. अनिष्कृतं = अ + निः + कृतं = never driven out ; or

निः निर्गतं कृत् धनं यस्मात् स निष्कृत् । न निष्कृत् आनिष्कृत् = one who is never without wealth. सहस्कृतं = a doer of mighty acts or a giver of wealth (सहः). समानं = (the) common (god of all).

शतक्रतो

(228) तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो । धनानामिन्द्र सातये (१ ४/९) = हे शतक्रतो इन्द्र धनानां सातये वाजिनं तं त्वा त्वां वाजेषु वाजयामः. वाजयामः = वाजाय प्रेरयामः । अथवा । आह्वयामः = we invoke thee to give us wealth.

(229) त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो । त्वां वर्धन्तु नो गिरः (१ ५/८). स्तोमः = उक्था (= उक्थानि) = गिरः. वृध् = to praise. Indra is praised that he as शतक्रतु may give wealth.

(230) गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे (१ १०/१). गायत्रिणः = those that compose prayers in the gāyatri metre. अर्कम् अर्च् is a phrase. अर्क is a particular poetic song; or अर्क = अर्चनीयम् (इन्द्रम्). ब्रह्माणः = reciters of praises. ब्रह्मन् = a prayer. उत् + येमिरे = raise on high, extol. वंश occurs here only. They raise thee on high as they do a staff or a pole. Praise expects wealth.

(231) सेमं नः काममा पृण गोभिरश्वैः शतक्रतो । स्तवाम त्वा स्वाध्यः (१ १६/९). सेमं = सः + इमम्. कामम् आपृण = satisfy our desire (by giving us cows and horses). स्तवाम = स्तुमः. स्वाध्यः = possessed of or composers of good praises. सु + आधीः. आधीः = a prayer. स्वाधीः is opposed to दुराधीः (= one that does not praise).

(232) ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो । समन्येषु ब्रवामहे (१ ३०/६) = हे शतक्रतो नः ऊतये अस्मिन् वाजे ऊर्ध्वः तिष्ठ । अन्येषु वाजेषु संब्रवामहे. वाजे = in (this) battle. नः ऊतये = to give us wealth. संब्रवामहे = shall invoke (thee). अन्येषु = in other battles.

(233) आ यद्दुवः शतक्रतवा कामं जरितॄणाम् । ऋणोरक्षं न शचीभिः (१ ३०/१५) = हे शतक्रतो यत् जरितॄणां दुवः कामं शचीभिः आ ऋणोः अक्षं न.

आ + ऋ = to fulfil, or fill Cp. आ त्वा गोभिरिव व्रजं गीर्भिर्ऋणोम्यद्रिवः । आ स्मा कामं जरितुरा मनः पृण (८ ३४/६). शचीभिः = with gifts. अक्षं न = यथा रथकारः चक्रयोः अक्षं सारयति तथा. Cp. आ०

स्तोतृभ्यः ० ऋणोरक्षं न चक्रयोः (१$\frac{१३०}{४}$). As one drives an axle into two wheels. It is a strange simile. A car-maker pushes an axle into two wheels; so Indra pushes the desires of devotees. As a car-maker fills the holes of wheels by driving in the axle, so Indra should fill i. e. fulfil the desires of devotees.

(234) युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो। तेन जायामुप प्रियां मन्दानो याह्यन्धसो योजा न्विन्द्र ते हरी (१$\frac{८२}{५}$) = हे शतक्रतो ते तव दक्षिणः (अश्वः) उत तथा सव्यः (अश्वः) (रथे) युक्तः अस्तु । तेन रथेन अन्धसः मन्दानः प्रियां जायाम् उप याहि। हे इन्द्र ते तव हरी योज नु.

Indra is asked to yoke the right-hand and the left-hand horse to his chariot and to drive in it to meet his dear wife at home, after having drunk Sōma and exhilarated himself at the sacrificer's house. अश्वः or हरिः is understood. योजा नु = do yoke. Since Indra has drunk Sōma at the sacrificer's house, he must in return give him wealth. शतक्रतो therefore refers to Indra's immense wealth.

(235) सं मा तपन्त्यभितः सपत्नीरिव पर्शवः । मूषो न शिश्ना व्यदन्त्याध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी (१$\frac{१०५}{८}$) = पर्शवः सपत्नीः इव मा माम् अभितः सं तपन्ति। हे शतक्रतो ते तव स्तोतारं माम् आध्यः वि अदन्ति न यथा मूषः शिश्ना वि अदन्ति तथा। हे रोदसी अस्य मे वित्तम्.

Enemies (पर्शवः) scorch (सं तपन्ति) me on all sides as co-wives torment their husband from every side. My capturers (आध्यः) devour me (वि अदन्ति) as rats devour flour-balls (शिश्ना). O heaven and earth, give (वित्तं) me (wealth). The enemies may be money-lenders who harass debtors with demands for return of debt. They almost eat him up. Hence the prayer to heaven and earth for pecuniary help. Indra, it seems, though possessed of wealth, neglects the devotee who in despair turns to heaven and earth. पर्शवः occurs here only. पर्श् in पर्शाने (७$\frac{१०४}{४}$) may mean to injure, to destroy. पर्शुः = one that injures. The word is feminine. शिश्ना occurs here and in शिश्नदेवाः. शिश्न may mean an image made of flour. आध्यः (f) = capturers. The 2nd line of this Ṛk is the 1st of 10$\frac{33}{2}$.

(236) पुरा संबाधादभ्यावव‍ृत्स्व नो धेनुर्न वत्सं यवसस्य पिप्युषी। सकृत्सु ते सुमतिभिः शतक्रतो सं पत्नीभिर्न वृषणो नसीमहि (२$^{१\,६}_{८}$) = यवसस्य पिप्युषी यवसं भक्षयित्वा पिप्युषी दुग्धपूर्णा धेनुः न यथा वत्सम् अभि आ वर्तते तथा हे सकृत् शतक्रतो संबाधात् पुरा नः अस्मान् अभि आ ववृत्स्व । वृषणः न यथा पत्नीभिः सं नस्यन्ते तथा वयं ते तव सु सुमतिभिः सं नसीमहि.

संबाधात् पुरा = before affliction or distress. अभि आ वृत् = to turn towards. यवसस्य पिप्युषी = having eaten grass? Or does यवस mean milk here? Overflowing (पिप्युषी) with milk (यवसस्य). Cp. इमास्त इन्द्र पृश्नयो घृतं दुहत आशिरम् । एनामृतस्य पिप्युषीः (८$\frac{६}{१९}$). ऋतस्य पिप्युषी = having drunk water.

The two comparisons are significant. As the cow that has her udder distended with milk runs home to feed the calf that is hungry and pining for her return, so Indra overflowing with wealth should run back to the devotee to satisfy his hunger for wealth for which he is pining. Indra is a cow for the nonce.

As wives that have been long estranged from their lords closely besiege them and would never part from them, so Indra's gifts should closely besiege the devotee and never part from him. सकृत् = once for all. Or हे सकृत् = O thou possessed (स) of wealth (कृत्). सु = fully. Or सु = सुमतिभिः. सुमति is feminine; so it is compared to पत्नी. The devotee is a husband and gifts are his wives. Poets have always a strong leaning towards the feminine gender.

(237) अर्वाचीनं सु ते मन उत चक्षुः शतक्रतो। इन्द्र कृण्वन्तु वाघतः (३$^{३\,७}_{२}$) = हे शतक्रतो इन्द्र वाघतः यजमानाः ते तव मनः चक्षुः उत च अर्वाचीनं कृण्वन्तु कुर्वन्तु.

(238) इन्द्र सोमाः सुता इमे तान् दधिष्व शतक्रतो। जठरे वाजिनीवसो (३$^{४\,२}_{५}$). दधिष्व = धारय. वाजिनीवसो = शतक्रतो. वाजिनी धनम्। तत्सहितं वसु यस्य सः वाजिनीवसुः.

(239) उरोष्ट इन्द्र राधसो विभ्वी रातिः शतक्रतो । अधा नो विश्वचर्षणे द्युम्ना सुक्षत्र मंहय (५$^{३\,८}_{१}$) = हे विश्वचर्षणे शतक्रतो सुक्षत्र इन्द्र ते तव

उरोः राधसः विभ्वी रातिः अस्ति । अधा अथ अतः नः अस्मभ्यं द्युम्ना द्युम्नानि महय देहि.

राधस् = द्युम्नं = wealth. उरोः = wide, large. विभ्वी = great. रातिः = a gift. विश्वाः चर्षणयः यस्य ; Indra had subdued the 5 Āryan tribe and become a master of their wealth. So विश्व-चर्षणे = शतक्रतो.

(240) इमा उ त्वा शतक्रतोऽभि प्र णोनुवुर्गिरः । इन्द्र वत्सं न मातरः (६$\frac{४}{२}$$^{५}_{५}$) = न यथा मातरः वत्सं प्रणवन्ते तथा हे शतक्रतो इन्द्र इमाः गिरः उ खलु त्वा त्वाम् अभि प्र णोनुवुः नवन्ते.

नु = to bend in order to suckle or to run towards. नोनु by reduplication. गिरः is feminine like मातरः. Indra is वत्स. Praises, as it were, suckle Indra or hasten towards him to suckle him.

(241) त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो। त्वं हिरण्ययुर्वसो (७$\frac{३}{२}$^{१})= हे वसो शतक्रतो इन्द्र त्वं नः अस्मभ्यं वाजयुः गव्युः हिरण्ययुः.

The affix यु means a giver. वसो = वसुमन्. वाज, हिरण्य, वसु, क्रतु and गो all mean wealth.

(242) आ यस्य ते महिमानं शतमूते शतक्रतो । गीर्भिर्गृणन्ति कारवः (८$\frac{४}{३}$^{६}) = हे शतमूते शतक्रतो यस्य ते तव महिमानं कारवः स्तोतारः गीर्भिः आ गृणन्ति. शतमूते = शतक्रतो, ऊतिः = क्रतुः = wealth. महिमानं was most probably महि मानं (= a great gift) i. e. *two* padas and not *one*.

(243) यस्य त्वमिन्द्र स्तोमेषु चाकनो वाजे वाजिन् शतक्रतो। तं त्वा वयं सुदुघामिव गोदुहो जुहूमसि श्रवस्यवः (८$\frac{५}{४}$^{२}) = हे वाजिन् शतक्रतो इन्द्र यस्य स्तोमेषु वाजे च त्वं चाकनः तं त्वाम् इव यथा गोदुहः सुदघां धेनुम् आव्हयन्ति तथा श्रवस्यवः वयं जुहूमसि जुहुमः आव्हयामः.

यस्य त्वं should really be यः त्वं so as to agree with तं त्वा. कन् = to take pleasure in. चाकन् by reduplication. सुदुघां etc. = just as those that milk cows call a good cow homewards in order to milk her. श्रवस्यवः = श्रवः धनम् इच्छन्तः. वाजे = यज्ञे; for a sacrifice also brings in wealth.

(244) वयं त इन्द्र स्तोमेभिर्विधेम त्वमस्माकं शतक्रतो । महि स्थूरं शशयं राधो अह्रयं प्रस्कण्वस्य नि तोशय (८$\frac{५}{८}$^{४}) = हे शतक्रतो इन्द्र वयं ते

स्तोमेभिः स्तोमैः विधेम। त्वम् अस्माकम् असि। प्रस्कण्वस्य राधः नि तो-शाय देहि.

ते तुभ्यं स्तोमैः विधेम = we will offer praises unto thee. मंहि = स्थूरं = large. शशाय (perhaps from शां = to give) = which can be given. स्तनः शशायः (१ १६४/४९) = a breast that yields milk. शशायं दुदुह्रे (३ ५७/२) = they yield milk. धेनवः ० शशयाः (२ ३१/१६) = cows full of milk. प्रस्कण्वस्य=प्रस्कण्वाय. Metre requires स्तोमैः and not स्तोमेभिः.

(245) अविप्रो वा यदविधद्विप्रो वेन्द्र ते वचः। स प्र ममन्दत्त्वाया शतक्रतो प्राचामन्यो अहंसन (८ ६१/९) = When (यत्) one whether he is capable of compos ng prayers (विप्रः) or otherwise (अविप्रः) offers praise (वचः) unto thee (ते), being devoted to thee (त्वाया) he must rejoice (प्रममन्दत्), O thou possessed of wealth. प्राचा-मन्यो ? प्राचा मन्युः धनं यस्य सः = one that has brilliant (प्राचा ?) wealth. अहंसन ?

(246) मरुत्वाँ इन्द्र मीढ्वः पिबा सोमं शतक्रतो। अस्मिन् यज्ञे पुरुष्टुत (८ ७६/१) = हे पुरुष्टुत शतक्रतो मीढ्वः इन्द्र अस्मिन् यज्ञे मरुत्वान् मरुद्भिः सह सोमं पिब. मीढ्वः = O giver; from मिह् = to shower.

(247) नह्यन्यं मृळाकरं मर्डितारं शतक्रतो। त्वं न इन्द्र मृडय (८ ८०/१) = हे शतक्रतो त्वत्तः अन्यं मृळाकरं मर्डितारं न हि जाने। हे इन्द्र त्वं नः मृडय. मृड् or मृळ् = to show kindness or favour. मृड् + इ + तृ = मर्डितृ. मृळा (a noun from मृळ्) = a favour, a gift.

(248) वयमु त्वा शतक्रतो गावो न यवसेष्वा। उक्थेषु रणयामसि (८ ९२/१२) = न यथा गावः यवसेषु आ मध्ये रमन्ते तथा हे शतक्रतो वयं त्वाम् उक्थेषु रणयामसि रमयिष्यामः उ खलु. यवसेषु आ = in the midst of grass.

(249) विश्वा हि मर्त्यत्वनानुकामा शतक्रतो। अगन्म वज्रिन्नाशसः (८ ९२/१३) = हे वज्रिन् शतक्रतो विश्वाः आशसः स्तुतीः मर्त्यत्वना मर्त्यत्वेन अनु-कामा कामम् अनुगच्छन्तीः वयम् अगन्म.

We have gone to i. e. uttered all prayers that owing to our human nature express some desire or desires. Or आशसः = hopes. All our hopes have gone (to thee) as we are human. मर्त्यत्वना = मर्त्यत्वेन = by our human nature. अनुकामा is difficult

to construe. अनुकामा qualifying आशसः would be intelligible. Or अनुकामा=अनुकामेन=in obedience to our desires; as we cherish desires. आशाः आशसौ आशसः etc. is the declension of which only आशसा and आशसः occur in ṚV. नू अन्यत्रा चिदद्रिवस्त्वन्नो जग्मुराशसः (८$\frac{२}{१}\frac{४}{१}$) = Our prayers or hopes have never (नू चित्) strayed from thee, O Indra.

(250) यस्ते नूनं शतक्रतविन्द्र द्युम्निन्तमो मदः । तेन नूनं मदे मदेः (८$\frac{९}{१}\frac{२}{६}$) = हे शतक्रतो इन्द्र यः नूनं खलु ते तव द्युम्निन्तमः मदः सोमः तेन सोमेन उत्पन्ने मदे मदेः आत्मानं मादयस्व हृष्यस्व नूनम् अद्य.

There is a play on the word मद्. मदः = सोमः. मदे = in intoxication. मदेः = be merry. द्युम्नं = wealth. द्युम्निन्तमः = which brings in greatest wealth.

(251) भद्रंभद्रं न आ भरेषमूर्जं शतक्रतो । यदिन्द्र मृळयासि नः(८$\frac{९}{२}\frac{३}{८}$) = If you (wish to) favour us, O Indra, then give us wealth. भद्रं = इषं = ऊर्जं = wealth.

(252) स नो विश्वान्या भर सुवितानि शतक्रतो । यदिन्द्र मृळयासि नः (८$\frac{९}{२}\frac{३}{९}$). सुवितानि = good things, wealth.

(253) त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे । आ वीरं पृतनाषहम् (८$\frac{९}{१}\frac{८}{०}$) = हे शतक्रतो विचर्षणे इन्द्र त्वं नः अस्मभ्यम् ओजः नृम्णं च आभर । पृतनाषहं वीरं च आभर.

विचर्षणिः = one who has the wealth of the 5 Āryan tribes. ओजः = नृम्णं = वीरं = wealth. पृतनाषहं = पृतनाः पृतनानां शत्रूणां धनं यत् सहते तत् = which conquers (the wealth of) foes. विचर्षणे is an interpolation. This Sūkta has such interpolations in every Ṛk. Who made them ?

(253) (a) त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ । अधा ते सुम्नमीमहे (८$\frac{९}{९}\frac{८}{१}$). वसो = वसुमन्. सुम्नं = wealth. ईमहे = याचामहे. बभूविथ (= भवसि) is an interpolation. Vide 253.

(254) त्वां शुष्मिन् पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो । स नो रास्व सुवीर्यम् (८$\frac{९}{१}\frac{८}{२}$). शुष्मिन् = O rich one. वाजयन्तं = giving wealth. उपब्रुवे = I invoke or beg. रास्व = देहि. सुवीर्यं = abundant wealth. पुरुहूत or शतक्रतो interpolated. Vide 253.

(255) For $10^{\frac{112}{6}}$ vide P. 86 No. 1.

(256) अव यत्त्वं शतक्रतविन्द्र विश्वानि धूनुषे । रयिं न सुन्वते सचा सहस्रिणीभिरूतिभिर्देवी जनित्र्यजीजनद्भद्रा जनित्र्यजीजनत् $(\text{१०}^{\text{१}}\frac{\text{३}}{\text{४}}{}^{\text{४}})$ = हे शतक्रतो इन्द्र यत् यस्मात् त्वं विश्वानि धनानि अव धूनुषे ददासि तस्मात् सुन्वते न सद्यः रयिं धनम् सचा देहि । भद्रा देवी जनित्री त्वां विश्वाभिः ऊतिभिः अजीजनत्.

विश्वानि = धनानि. अव धूनुषे = ददासि. सचा = सच = देहि. न = at once. विश्वाभिः = ऊतिभिः = धनैः. भद्रा = देवी = possessed of wealth. जनित्री = जनयित्री. Thy mother who begot thee endowed thee with wealth at thy very birth.

शतक्रतू

(257) याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र दभीतिमावतम् । याभिर्ध्वसन्तिं पुरुषन्तिमावतं ताभिरू षु ऊतिभिरश्विना गतम् $(\text{१}\frac{\text{१}}{\text{२}}\frac{\text{१}}{\text{३}}{}^{\text{२}})$ = याभिः आर्जुनेयम् अर्जुनिपुत्रं कुत्सं तुर्वीतिं दभीतिं च प्र आवतं याभिः ध्वसन्तिं पुरुषन्तिं च आवतं ताभिः ऊतिभिः हे शतक्रतू अश्विनौ आगतम् आगच्छतम्. अव् = to reward. ऊतिः = wealth.

शतक्रतुः = of immense strength.

(258) उत त्यं पुत्रमग्रुवः परावृक्तं शतक्रतुः । उक्थेष्विन्द्र आभजत् $(\text{५}\frac{\text{३}}{\text{१}}\frac{\text{०}}{\text{६}})$ = उत अपि च परावृक्तं हतं तम् अग्रुवः युवत्याः पुत्रम् अग्निं शतक्रतुः इन्द्रः उक्थेषु आभजत्.

Agrū = a young damsel ; Agni's mother. There may have been a story that Indra cut off the head of Agni and then gave him a share in sacrificial offerings and prayers (उक्थेषु). परा + वृज् = to cut off. आभज् = to give a portion. Agni and other Āryan gods were Indra's foes once.

(259) यच्चुदत्सूर एतशं वङ्कू वातस्य पर्णिना । वहत्कुत्समार्जुनेयं शतक्रतुस्त्सरद्गन्धर्वमस्तृतम् $(\text{८}\frac{\text{१}}{\text{१}\,\text{१}})$ = यत् यदा इन्द्रः सूरः सूर्यस्य एतशम् एतशवर्णम् अश्वं वातस्य च वङ्कू वङ्कुनामानौ पर्णिनौ पक्षवन्तौ अश्वौ तुदत् अतुदत् तदा इन्द्रः आर्जुनेयम् अर्जुनेः पुत्रं कुत्सं रथेन वहत् अवहत् । अस्तृतम् अहिंसितं गन्धर्वं च त्सरत् अत्सरत् नाशयामास.

Indra pricked the Sun's horse and the horses of Vāta as lag" gards. He carried Kutsa in his chariot and attacked or destroyed the Gandharva who had till then not been injured. त्सर् = to go. eo attack, to injure. The sense of त्सर I have yet not determined.

(260) जज्ञानो नु शतक्रतुर्वि पृच्छादिति मातरम् । क उग्राः के ह शृण्विरे (८ $\frac{७७}{१}$) = जज्ञानः जायमानः नु एव शतक्रतुः मातरं वि पृच्छत् के उग्राः के ह शृण्विरे श्रूयन्ते इति. पृच्छत् = अपृच्छत्. उग्राः = powerful warriors. ह = इह अथवा खलु.

(261) प्र व इन्द्राय बृहते मरुतो ब्रह्मार्चत । वृत्रं हनति वृत्रहा शतक्रतुर्वज्रेण शतपर्वणा (८ $\frac{८९}{३}$) = हे मरुतः बृहते इन्द्राय वः यूयं ब्रह्म अर्चत । यस्मात् वृत्रहा शतपर्वणा वज्रेण वृत्रं हनति हन्ति.

बृहत् is an epithet of द्यौस् whom Indra subdued; after which Indra became बृहत् himself. The Maruts were perhaps devotees of द्यौस् once; but after the subjugation of the latter, they were cômpelled to worship Indra. ब्रह्म = a prayer or praise. प्र + अर्चत = offer. शतपर्वणा = having a hundred joints.

शतक्रतो

(262) त्वमाविथ नर्यं तुर्वशं यदुं त्वं तुर्वीतिं वय्यं शतक्रतो । त्वं रथमेतशं कृत्व्ये धने त्वं पुरो नवतिं दम्भयो नव (१ $\frac{५४}{६}$). आविथ = didst reward. नर्यं = वय्यं = rich. तुर्वश, यदु and तुर्वीति were Indra's devotees. त्वं रथ etc. = Thou didst turn back the Sun's bright (एतशं) chariot in battle (कृत्व्ये धने). A verb is wanting दम्भयः may be that verb. दम्भ् = to destroy. नवतिं नव पुरः = 99 forts.

(263) वाजेषु सासहिर्भव त्वामीमहे शतक्रतो । इन्द्र वृत्राय हन्तते (३ $\frac{३७}{६}$) = हे शतक्रतो इन्द्र वाजेषु संग्रामेषु सासहिः शत्रूणाम् अभिभविता भव । वृत्राय हन्तवे वृत्रं हन्तुं त्वाम् ईमहे याचामहे.

(264) त्वं तामिन्द्र मर्त्यममित्रयन्तमाद्रिवः । सर्वरथा शतक्रतो नि याहि शवसस्पते (५ $\frac{३५}{५}$) = हे अद्रिवः शतक्रतो शवसः पते इन्द्र अमित्रयन्तं शत्रुवत् आचरन्तं तं मर्त्यं सर्वरथा नि याहि.

अद्रिवः, शतक्रतो and शवसस्पते refer to strength. याहि = attack; या = to attack. नि याहि = fall down (on him). सर्वरथा ? The word occurs again in तीव्रस्याभि वयसो अस्य पाहि सर्वरथा वि हरी इह मुञ्च (१० $\frac{१६०}{१}$) where सर्वरथा seems to qualify हरी and may mean :—(horses) to whom belongs the whole chariot. सर्वरथा सर्वरथौ हरी. But what business has the word in the present Ṛk? Does it mean:—(fall on the foe) with the whole weight of thy chariot ? Or सर्वरथा = हे सर्वरथ (इन्द्र) ?

(265) ह्वयामसि त्वेन्द्र याह्यर्वाङरं ते सोमस्तन्वे भवाति । शतक्रतो मादयस्वा सुतेषु प्रास्माँ अव पृतनासु प्र विक्षु (६$\frac{४\,१}{५}$)=हे इन्द्र त्वा त्वां ह्वयामसि आह्वयामः । अर्वाङ् आ याहि । ते तुभ्यं तन्वे यद्वा तव शरीराय सोमः अरं पर्याप्तः भवति । हे शतक्रतो सुतेषु मादयस्व । पृतनासु विक्षु अस्मान् प्र अव.

अरं = enough. ते तन्वे = for thy own self or for thy body. पृतनासु विक्षु = among hostile people.

(266) वृषायमिन्द्र ते रथ उतो ते वृषणा हरी । वृषा त्वं शतक्रतो वृषा हवः (८$\frac{३\,३}{३\,१}$). वृषन् refers to the strength of the bull. Indra's chariot, horses and Indra himself might be strong like a bull; but in what sense is हव a वृषा? In the next 2 Ṛks यज्ञ etc. are वृषन् and वृषा हवः are the concluding words. वृषा हवः = thy call to the Maruts or warriors in general is strong or loud. Or हवः = a gift. Thy gifts are huge.

(267) वृषणस्ते अभीशवो वृषा कशा हिरण्ययी । वृषा रथो मघवन् वृषणा हरी वृषा त्वं शतक्रतो (८$\frac{३\,३}{१\,१}$). अभीशवः = reins. कशा = a whip. हिरण्ययी = हिर॰मयी. In both these Ṛks. वृषन् may mean a giver of wealth.

(268) खे रथस्य खेऽनसः खे युगस्य शतक्रतो । अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् (८$\frac{१\,१}{७}$) = हे शतक्रतो इन्द्र अपालां रथस्य खे अनसः खे युगस्य खे त्रिः पूत्वी पूत्वा शोधयित्वा तां सूर्यत्वचं त्वम् अकृणोः अकरोः.

अपाला occurs here only; who she was and what she suffered cannot be ascertained owing to lack of data. रथ, अनस् and युग are three different vehicles. What is ख? Is it the felly or the hole into which the axle is driven. Indra passed Apālā thrice through the holes of three conveyances and made her resplendent like the Sun.

शतक्रत्वः =having hundreds of curative properties

(269) अधा शतक्रत्वो यूयमिमं मे अगदं कृत (१०$\frac{१\,७}{२}$) = Therefore (अधा), possessed as you are of hundreds of medicinal properties (शतक्रत्वः), make (कृत = कुरुत) this cure (अगदं) for me (मे=मह्यं).

शतानि क्रतवः यासां ताः शतक्रत्वः. शतक्रतूः शतक्रत्वौ शतक्रत्वः is the declension. शतक्रतूः is feminine while शतक्रतुः is masculine. शतक्रत्वः qualifies यूयं.

Doubtful

शतक्रतुः = having immense wealth or strength

(270) तव त्यन्नर्यं नृतोऽप इन्द्र प्रथमं पूर्व्यं दिवि प्रवाच्यं कृतम्। यद्देवस्य शवसा प्रारिणा असुं रिणन्नपः। भुवद्विश्वमभ्यादेवमोजसा विदादूर्जं शतक्रतुर्विदादिषम् (२ २२/४) = हे नृतो इन्द्र तव त्यत् प्रथमं पूर्व्यं नर्यम् अपः दिवि प्रवाच्यम् कृतम्। यत् देवस्य सोमस्य शवसा बलेन अपः उदकानि रिणन् ददत् वृत्रस्य असुं प्रारिणाः नाशितवान् आसि। ओजसा विश्वम् आदेवम् अभि भुवत् अभ्यभवत्। शतक्रतुः ऊर्जम् इषं विदात् अविदत् ददौ = O donor or hero (नृतो), Indra, that first, primal heroic deed, still adumbrated throughout heaven, was performed by thee, when by the strength obtained from divine Sōma thou didst destroy the life (of Vṛtra) for giving water to men. Indra subdued all godlings (आदेवं) through that strength and gave wealth, since he possessed endless wealth (शतक्रतुः). तव त्यन्नर्यं नृतोऽप इन्द्र पूर्व्यं दिवि प्रवाच्यं कृतम्। यद्देवस्य शवसा रिणन्नपो भुवद्विश्वमभ्यादेवमोजसा was most probably the original stanza. The rest is subsequent stuffing. नर्यं = worthy of a hero or a donor. प्रथमं = पूर्व्यं; or the first and the best of its kind. नृतो = O giver or hero. नृ (= to give, to be brave) + तुः = नृतुः. अपः=a deed; Lat. opus. दिवि प्रवाच्यं = deserving to be adumbrated in heaven. देवस्य = सोमस्य. प्र + अरिणाः = didst destroy. अपः रिणन् = (thus) releasing water. विश्वम् आदेवं = all godlings. अभिभुवत् = अभिबभूव = subdued. शवसा = ओजसा. विदात् = अविदत् = gave. ऊर्जं = इषं = wealth देवस्य शवसा may also mean:— त्वं देवः। तस्य शवसा = with the strength of a god which thou art. Was अदेव lengthened into आदेव as असत् was into आसत् (false)? विश्वम् आदेवं = all ungodly people.

(271) यः संस्थे चिच्छतक्रतुरादीं कृणोति वृत्रहा। जनितृभ्यः पुरुवसुः (८ ३२/११) = यः शतक्रतुः पुरुवसुः वृत्रहा इन्द्रः संस्थे संग्रामे चित् अपि जरितृभ्यः आत् ईम् कृणोति.

शतक्रतुः = पुरुवसुः = one that has immense wealth. संस्थे चित्= in battle itself. आत् = in no time. ईम् perhaps stands for wealth. If शतक्रतुः be taken along with वृत्रहा and संस्थे, it would

mean one that has immense strength, if with **जरितृभ्यः पुरुवसुः**, it would then mean one that has immense wealth.

शतक्रतो

(272) **अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः। प्रावो वाजेषु वाजिनम्** (१ $\frac{४}{८}$). **अस्य = इमं सोमम्. घनः = हन्ता. प्रावः = प्र + आवः. अव् =** to endow with gifts. **वाजेषु** = in battles in which booty is to be secured. **वाजिनं** = a warrior that brings in booty.

(273) **नामानि ते शतक्रतो विश्वाभिर्गीर्भिरीमहे। इन्द्राभिमातिषाह्ये** (३ $\frac{३७}{३}$) **=हे शतक्रतो इन्द्र अभिमातयः शत्रवः तेषां साह्ये अभिभवे विश्वाभिः गीर्भिः ते तव नामानि ईमहे याचामहे.**

अभिमातिः = an enemy. **अभिमातिषाह्ये** = in a battle where enemies are defeated. **विश्वाभिः = गीर्भिः = धनैः (सहितानि). नामानि = धनानि.** We beg of thee an abundance of riches.

(274) **शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम्। इन्द्र सोमं शतक्रतो** (३ $\frac{३७}{८}$) **= हे शतक्रतो इन्द्र नः अस्माकम् ऊतये शुष्मिन्तमं द्युम्निनं जागृविं सोमं पाहि पिब.**

शुष्मिन्तमं = the best of those that give wealth or strength **शुष्म** = strength, and then wealth which is the result of strength. **द्युम्निनं** = possessed of wealth. **जागृविं** = giving (wealth). **गृ** = to give.

(275) **नू त आभिरभिष्टिभिस्तव शर्मन् शतक्रतो। इन्द्र स्याम सुगोपाः शूर स्याम सुगोपाः** (५ $\frac{३८}{५}$) **=हे शूर शतक्रतो इन्द्र आभिः अभिष्टिभिः ते तव शर्मन् शर्मणि सुगोपाः स्याम.**

अभिष्टिः = a gift. **शर्मन्** = under the patronage of. Here are **अभिष्टि** and **शर्मन्** as against **शूर** and **सुगोपाः**.

(276) **वहन्तु त्वा रथेष्ठामा हरयो रथयुजः। तिरश्चिदर्यं सवनानि वृत्रहन् अन्येषां या शतक्रतो** (८ $\frac{३}{१}\frac{३}{४}$) **= हे वृत्रहन् शतक्रतो रथयुजः हरयः अन्येषां या यानि सवनानि अर्यं अर्यः सवनानि च तिरः रथेष्ठां त्वा त्वाम् आवहन्तु.**

रथयुजः = that yoke themselves to the chariot; or the constant companions of the chariot. **रथेष्ठां = रथेष्ठं** = seated in the chariot. **अर्यं** must have been **अर्यः = अरेः**. Or **अर्यं = अर्याणि =**

शत्रूणां. तिरः governs सवनानि which is in the accusative case. तिरः = across, disregarding.

(277) अवितासि सुन्वतो वृक्तबर्हिषः पिबा सोमं मदाय कं शतक्रतो । यं ते भागमधारयन् विश्वाः सेहानः पृतना उरु ज्रयः समप्सुजिन्मरुत्वाँ इन्द्र सत्पते (८$\frac{३}{२}$६)= हे शतक्रतो वृक्तबर्हिषः सुन्वतः यजमानस्य अविता दाता असि । यं (सोमस्य) भागं ते तुभ्यम् अधारयन् तं सोमं मदाय कं हे अप्सुजित् सत्पते विश्वाः पृतनाः सेहानः उरुज्रयः मरुत्वान् त्वं सं पिब.

अविता = a giver of wealth. वृक्तं बर्हिः आसनार्थं येन स वृक्तबर्हिः = one that cuts grass to make seats of for the gods to sit on. कं governs the dative (here मदाय) and always indicates something good. पृतनाः = foes. सेहानः perfect participal of सह् = to defeat. अप्सुजित् = अप् + सु + जित् = one that conquers wealth (अप् = सु = धनं). मरुत्वान् = accompanied by the Maruts. Indra is शतक्रतु either because he rewards or because he conquers hostile armies. यं ते भागमधारयन् is an interpolation ; it spoils the metre. सत्पते = O master of wealth. उरुज्रयः = whose speed or force is great.

(278) प्रभङ्गी शूरो मघवा तुवीमघः संमिश्लो वीर्याय कम् । उभा ते बाहू वृषणा शतक्रतो नि या वज्रं मिमिक्षतुः (८$\frac{६}{१}\frac{१}{८}$). प्रभङ्गी = a smasher. Cp. प्रभङ्गं दुर्मतीनां (८$\frac{४}{१}\frac{६}{१}$).

तुवीमघः = बहुधनः. वीर्याय कं संमिश्लः = foimed for heroism. कं vide 277. या यौ बाहू वज्रं निमिमिक्षतुः = which arms hold the bolt. उभा = उभौ. वृषणा = वृषणौ =powerful. शूरः etc. is in favour of क्रतु meaning power ; but मघवा and तुवीमघ are in favour of its meaning wealth.

(279) आ ते दधामीन्द्रियमुक्था विश्वा शतक्रतो । स्तोतृभ्य इन्द्र मृळय (८$\frac{१}{२}\frac{३}{७}$)=हे शतक्रतो ते तुभ्यम् इन्द्रियं विश्वा विश्वानि उक्था उक्थानि च आदधामि अर्पयामि । हे इन्द्र स्तोतृभ्यः मृळय.

इन्द्रियं = strength worthy of Indra or Sōma which produces such strength. विश्वानि उक्थानि = all praises. मृळय = show favour in the shape of wealth.

सक्रतुः = wealthy

(280) **इमा ब्रह्मेन्द्र तुभ्यं शंसि दा नृभ्यो नृणां शूर शवः । तेभिर्भव सक्रतुर्येषु चाकन्नुत त्रायस्व गृणत उत स्तीन् (१० १४/८)** = I have recited (**शंसि**) these (**इमा = इमानि**) praises (**ब्रह्मा = ब्रह्माणि**) unto thee (**तुभ्यं**), O Indra. Give (**दाः**) wealth (**शवः**) to donors (**नृभ्यः**), O giver (**शूर**) of riches (**नृणां**). Be full of riches (**सक्रतुः**) or gifts to those (**तेभिः = तेभ्यः**) among whom (**येषु**) thou lovest (**चाकन्**) to receive offerings and praises. Give (**त्रायस्व**) to the devotee (**गृणते**) riches (**स्तीन्**). **शवः** = strength; wealth which is the result of strength. **तेभिः भव सक्रतुः येषु चाकन् = येषु ब्रह्मसु चाकन् धनस्य दाता भवसि तेभिः तैः ब्रह्मभिः सक्रतुः धनस्य दाता भव** = give us wealth in exchange for those praises owing to which thou art in the habit of giving wealth. This may be the sense. Or it may be an idiom that has the sense given above.

सक्रतू (अग्निः सोमश्च) = possessed of power

(281) **युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तम् । युवं सिन्धूँरभिशस्तेरवद्यादग्नीषोमावमुञ्चतं गृभीतान् (१ ९३/५) = हे अग्निश्च सोम अग्नीषोमौ सक्रतू युवां दिवि रोचनानि अधत्तम् । गृभीतान् गृहीतान् सिन्धून् अवद्यात् अभिशस्तेः अमुञ्चतम् .**

रोचनानि = the 3 stories of heaven. **अभिशस्तेः** = from the injurer, the destroyer. **अवद्यात्** = from the villain. These two words stand for Vṛtra. **गृभीतान्** =seized.

सक्रतवः (मित्रो अर्यमा वरुणः) = possessed of wealth

(282) **इमं स्तोमं सक्रतवो मे अद्य मित्रो अर्यमा वरुणो जुषन्त । आदित्यासः शुचयो धारपूता अवृजिना अनवद्या अरिष्टाः (२ २७/२) =सक्रतवः मित्रः अर्यमा वरुणः एते देवाः अद्य मे मम इमं स्तोमं जुषन्त जुषन्तु सेवन्ताम् । एते देवाः आदित्यासः आदित्याः अदितेः पुत्राः । शुचयः ज्वलन्तः तेजस्विनः । धारपूताः । अवृजिनाः वृजिनं हिंसा तया रहिताः । अनवद्याः अरिष्टाः अहिंसिताः अथवा हिंसारहिताः.**

शुचयः = resplendent. धारपूताः? It occurs also in Ṛk 9 of this Sūkta and after शुचयः as here. There is no such word as धार in ṚV. पूत means purified. धारेण पूताः धारपूताः; but what does धार mean? वृजिनं = अवद्यं = evil, injury. रिष् = to injure. अरिष्टाः = not injured or rather not injuring.

सुक्रतुः = possessed of wealth

(283) For १ ९/२ १ vide P. 122 No. 71.

(284) For १ १ ३/४ ८ vide P. 141 No. 136.

(285) होता यक्षद्वनिनो वन्त वार्यं बृहस्पतिर्यजति वेन उक्षभिः पुरुवारेभिरुक्षभिः। जगृभ्मा दूरआदिशं श्लोकमद्रेरध त्मना। अधारयदररिन्दानि सुक्रतुः पुरू सद्मानि सुक्रतुः (१ १ ३ ९/१ ०) = होता अग्निः यक्षत् यजति धनं ददाति। वनिनः वनानि पातयन्तः मरुतः वार्यं धनं वन्त ददति। वेनः बृहस्पतिः पुरु वारं धनं येषां तैः उक्षभिः उक्षबलैः मरुद्भिः यजति धनं ददाति। अध अथ वयं त्मना धनेन सह अद्रेः ग्रावृणः दूरआदिशं दूरे श्रूयमाणं श्लोकं शब्दं जगृभ्म गृण्हीमः। सुक्रतुः अग्निः अररिन्दानि पुरू पुरूणि सद्मानि धनानि अधारयत् धारयति ददाति.

यज् = to give. यज् + स् (of लेट्) = यक्ष्. वनिनः = the Maruts that sway forests. वन्त from वन् = to give. Agni is बृहस्पति here. B. is called वेन (=a bird) out of endearment. The Maruts are bulls (उक्षभिः). जगृभ्मा etc.=We catch i. e. hear the sound of the crushing stones. अररिन्दानि (which occurs here only) = riches ? अधारयत् etc. = Agni gives riches. त्मना = with wealth.

(286) अस्मे रयिं न स्वर्थं दमूनसं भगं दक्षं न पपृचासि धर्णसिम्। रश्मीँरिव यो यमति जन्मनी उभे देवानां शंसमृत आ च सुक्रतुः (१ ९ ४ १/२ १) = हे अग्ने अस्मे अस्मभ्यं शोभनम् अर्थं यस्य तं स्वर्थं दमूनसं धर्णसिं रयिं भगं दक्षं न सद्यः पपृचासि ददासि देहि। यः रयिः यथा कश्चित् अश्वानां रश्मीन् नियमति तथा उभे जन्मनी उभौ संघौ नियमति। ऋते धने आ मध्ये देवानां धनानां शंसं दानम् आ दधाति च.

अर्थ, रयि, भग, दक्ष, क्रतु, देव, शंस all mean wealth. न=in a moment. न is repeated twice for emphasis. स्वर्थ = (wealth) whose destination or end is wealth. दमूनसं (Latin dominus) = which

will be master of the house. पृच् = to give. धर्णसिं (= धृ + नसिं) like सानसिं. धर्णसिः = which brings in wealth. उभे जन्मनी = gods and men. देवानां शंसम् ऋते आ च = puts in i. e. adds wealth to wealth.

(287) उत स्य न इन्द्रो विश्वचर्षणिर्दिवः शर्धेन मारुतेन सुक्रतुः। अनु नु स्थात्यवृकाभिरूतिभी रथं महे सनये वाजसातये (२३१) = उत अपि च विश्वचर्षणिः सुक्रतुः स्यः सः इन्द्रः दिवः मारुतेन शर्धेन महे सनये वाजसातये अवृकाभिः ऊतिभिः नु अधुना रथम् अनुस्थाति.

विश्वाः चर्षणयः यस्य = who has conquered the 5 Āryan tribes and their wealth. दिवः मारुतेन शर्धेन = with the multitude of the Maruts belonging to heaven. अनु + स्थाति = आतिष्ठति = occupies. अवृकाभिः = harmless, doing no injury. ऊतिभिः = with wealth. सनये = वाजसातये = for giving wealth. महे = महते.

(288) अग्ने जरस्व स्वपत्य आयुन्यूर्जा पिन्वस्व समिषो दिदीहि नः। वयांसि जिन्व बृहतश्च जागृवे उशिग्देवानामसि सुक्रतुर्विपाम् (३३) = Increase (जरस्व) us, O Agni, in wealth (आयुनि) and in offspring (सु + अपत्ये = अपत्यवति). Fatten (पिन्वस्व) us with wealth (ऊर्जा). Give (सं दिदीहि) us (नः) wealth (इषः). (For this purpose) conquer (जिन्व) the riches (वयांसि) of heaven (बृहतः), O liberal giver (जागृवे). Possessed of riches (सुक्रतुः), thou art the messenger (उशिक् ?) of gods (देवानां) and of those that sing their praises (विपां). आयु = ऊर्ज् = इष् = वयस् = wealth. गृ = to give. जागृ by reduplication. जागृ + विः = जागृविः = a giver. उशिक् ? विप् = to sing. अपत्ये आयुनि सु धनं जरस्व देहि (= add wealth unto wealth) is perhaps the real construction and sense. अपत्यं = आयु = सु = धनम्.

(289) यश्चिकेत स सुक्रतुर्देवत्रा स ब्रवीतु नः। वरुणो यस्य दर्शतो मित्रो वा वनते गिरः (५६५) = यस्य मनुष्यस्य गिरः स्तुतीः वरुणः मित्रः वा वनते संभजते यः च चिकेत धनं ददाति स सुक्रतुः भवतु । स नः अस्मान् एते अपापाः इति देवत्रा देवेषु ब्रवीतु.

चिकेत from कित् =to give. He really is possessed of wealth who gives it in largesses. दर्शतः = दर्शनीयः = good to look at. देवत्रा = among the gods, specially to Mitra and Varuna.

Or

यः चिकेत ददाति स एव सुक्रतुः धनवान् । यस्य यस्मै दर्शतः वरुणः दर्शतः मित्रः वा गिरः धनानि वनते ददाति स नः अस्मान् देवत्रा देवे धने ब्रवीतु धनं ददातु = He really is wealthy who gives wealth to the deserving. Let him to whom wealthy (दर्शतः) Varuṇa or wealthy Mitra gives (वनते) riches (गिरः) bespeak (ब्रवीतु) us in wealth i. e. give us wealth. दर्शतं दर्शनीयं सुवर्णम् । दर्शतः धनवान्. This may be the real sense.

(290) उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः । घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि (६ ७१/१) = ष्यः सः सुक्रतुः देवः सविता हिरण्ययौ बाहू सवनाय उत् अयंस्त । रजसः विधर्मणि युवा मखः सुदक्षः घृतेन पाणी अभिप्रुष्णुते.

सुक्रतुः = सुदक्षः = possessed of wealth. बाहू = पाणी. हिरण्यया = हिरण्ययौ = हिरण्मयौ = of gold. सविता = Savitṛ who awakens (सु = to awaken, to give). सवनाय = for awakening; or for giving. उत् + अयंस्त = has raised or extended. घृतेन etc. = he washes his hands with water (before giving as donors have to do in Hindu society). मखः = मखवान् = मघवान् = possessed of wealth. रजसः दिवः विधर्मणि रोचने. विधर्मन् was perhaps another name of रोचन. Perhaps the whole expression means in heaven.

(291) स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः । होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् (७ ९/२) = यः अग्निः नः अस्मभ्यं पुरुभोजसं बहुधनम् अर्कं धनं पुनानः ददत् दातुम् इच्छन् पणीनां दुरः द्वाराणि वि वः उद्घाटितवान् स सुक्रतुः धनवान् विशां होता मन्द्रः दमूनाः राम्याणां रात्रीणां तमः तिरः ददृशे.

वः must be understood after वि. The Paṇis shut cows within their strongholds the doors of which Agni opens by force. पुनानः = giving; पू often means to give; in the 9th Mandala we have any number of instances of पू meaning to give. अर्क, पुरु and भोजस् mean wealth. मन्द्रः = rejoicing. विशां होता = an invoker employed by men to invite the gods. दमूनाः = the master of the house. तिरः governs the accusative and means

through. **राम्या** = a night; so called perhaps because animals cease their activity; from **रम्** = to halt.

(292) **स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान् । आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान्** (७ ८५/४) = **हे आदित्य आदित्यौ इन्द्रावरुणौ स यजमानः सुक्रतुः ऋतचित् अस्तु यः नमस्वान् हविष्मान् प्रयस्वान् शवसा शवसौ धनयुक्तौ वाम् अवसे आववर्तत् । स सुविताय असत् अस्तु इत् एव.**

ऋतचित् = a giver of wealth or a possesser of wealth. **नमस्** = **हविस्** = **प्रयस्** = an offering. **आदित्य** irregular for **आदित्यौ**. **शवसा** = **शवसौ** = **शवसा धनेन युक्तौ**. **आववर्तत्** from **आ** + **वृत्** = to turn towards, bring. **अवसे** = **सुविताय** = for welfare.

(293) **मित्रा तना न रथ्या वरुणो यश्च सुक्रतुः । सनात्सुजाता तनया धृतव्रता** (८ २५/२). **मित्रावरुणा** a compound split into **मित्रा** and **वरुणः** which latter is qualified by **यश्च सुक्रतुः**. **तना न** ? If **न** means **च**, then **तना** would mean with wealth. **रथ्या** = **रथ्यौ**. It qualifies **मित्रावरुणौ**. **तना मित्रः न च सुक्रतुः वरुणश्च रथ्या रथ्यौ** would be the construction. **रथीः** = a bringer (of wealth). **सनात्** = for ever, always. **सुजाता** = **सुजातौ** = **धनवन्तौ**. **सु** indicates possession. **जात** = wealth. **तनया** = **तनयौ** (=**आदितेः पुत्रौ**) or **धनवन्तौ**. **धृतव्रता** = **धृतव्रतौ** = whose ordinances hold i. e. are obeyed or givers of wealth. **तना, तनय, ऋतु, व्रत** and **जात** mean wealth.

(294) **यः सुषव्यः सुदक्षिण इनो यः सुक्रतुर्गृणे । य आकरः सहस्रा यः शतामघ इन्द्रो यः पूर्भिदारितः** (८ ३३/५) = **सु धनं सव्ये हस्ते यस्यास्ति स सुषव्यः । तथैव सुदक्षिणः । इनः यः सुक्रतुः तं गृणे स्तौमि । यः आकरः धनानां खनिः । यः सहस्रा सहस्रामघः शतामघः बहुधनः । इन्द्रः यः पूर्भिद् पुरां भेत्ता । आरितः.**

सुषव्यः etc. = Indra has wealth in both hands. **शतानि मघानि यस्य सः** = one that has wealth countable by hundreds. **सहस्रा** is most probable to be connected with **मघः** as **सहस्रामघः**. **आकरः** = a mine. **पूर्भिद्** = a smasher of forts and a giver of wealth contained therein. **आरितः** occurs thrice again; yet its meaning cannot be guessed. (१) **य आरितः कर्मणिकर्मणि स्थिरः** (१ १०१/४); (२) **सहुरिर्विक्षु आरितः** (२ २१/३); (३) **आरितः पूर्भिद्** (१० १११/१०). In all these

places the word qualifies **इन्द्रः**. **अर्** = to run to. **आ + अर् + इ + तः = आरितः** = run up to for help. People run up to Indra for help This may be the sense.

(295) **एन्द्र याहि पीतये मधु शविष्ठ सोम्यम् । नायमच्छा मघवा शृणवद्गिरो ब्रह्मोक्था च सुक्रतुः (८$\frac{३}{१}\frac{३}{३}$) = हे शविष्ठ इन्द्र सोम्यं मधु पीतये नायम् अच्छ आ याहि । सुक्रतुः मघवा गिरः ब्रह्म उक्था च शृणवत् शृणोतु.**

सोम्यं मधु = honey-sweet Sōma. **सुक्रतुः = मघवा** = possessed of wealth. **उक्था = उक्थानि. गिर् = ब्रह्मन् = उक्थं** = praise. **नायम्?** towards one that praises? The word occurs also in 6 $\frac{24}{10}$, 6 $\frac{46}{11}$ and 9 $\frac{91}{4}$. **नायमच्छा** spoils the metre and is not wanted.

(296) **यो म इमं चिदु त्मनामन्दच्चित्रं दावने । अरट्वे अक्षे नहुषे सुकृत्वनि सुकृत्तराय सुक्रतुः (८$\frac{४}{२}\frac{६}{७}$) = अरट्वे अक्षे नहुषे सुकृत्वनि वर्तमानम् त्मना सहितम् इमं चित्रं सुकृत्तराय मे मह्यं दावने अमन्दत्.**

Which king, possessed of wealth rejoiced to give me, so reputed for good deeds, this wealth that lay with **अरट्व** etc. **चित् + उ** = even. **त्मना** = along with wealth. **चित्रं = धनं. अमन्दत्** = took delight in. **दावने = दातुम्. अरट्व** and **अक्ष** occur only here. We have **नहुस्** and **नहुष** both in ṚV. **सु + कृत् + वन् = सुकृत्वन्** = one that performs good deeds or has abundant wealth.

(297) **स मातरा न ददृशान उस्रियो नानददेति मरुतामिव स्वनः । जानन्नृतं प्रथमं यत्स्वर्णरं प्रशस्तये कमवृणीत सुक्रतुः (९$\frac{७०}{६}$) = न यथा मातरा मातरौ पश्यन् अग्निः ते प्रति रोरुवन् एति तथा सोमः उस्रियः ददृशानः ताः प्रति नानदत् एति गच्छति । तदा तस्य स्वनः मरुतां स्वनः इव श्रूयते । ऋतं धनं जानन् ददत् सुक्रतुः सोमः प्रथमं स्वर्णरं प्रशस्तये कम् अवृणीत.** Agni has two mothers on seeing whom he runs up to them uttering joyous cries. Sōma sees cows (i. e. milk) and goes up to them bellowing like a bull His bellowing resembles the roar of the Maruts.

The 2nd half is difficult. Having to give (**जानन्**) wealth (**ऋतं**) he chose (**अवृणीत**) the best (**प्रथमं**) wealth (**स्वर्णरं**) for making gifts (**प्रशस्तये**). For **कं** vide 277.

(298) ऋतस्य गोपा न दभाय सुक्रतुस्त्री ष पवित्रा हृद्यन्तरा दधे। विद्वान् स विश्वा भुवनानि पश्यत्यवाजुष्टान् विध्यति कर्ते अव्रतान् (९ ७३/८) = सुक्रतुः ऋतस्य गोपाः सोमः दभाय न भवति न दभ्नोति न दभ्यते वा। स हृदि अन्तर् त्री त्रीणि पवित्रा पवित्राणि आदधे। विश्वा विश्वानि भुवनानि विद्वान् सः अजुष्टान् अव्रतान् जनान् अव पश्यति कर्ते च विध्यति.

ऋतस्य गोपाः = the guardian of wealth. **न दभाय** = is not subject to injury or would not injure. **त्री पवित्रा** = three purifiers. What are they? The strainer, water, and milk? **षः = सः**. **अजुष्टान्** = **आविद्यमानं जुष्टं हविः येषां तान्** = those that do not make offerings that are liked by the gods. **अव्रतान्** = those that do not embrace the Āryan religion **अजुष्टान् अव्रतान् अव पश्यति विध्यति च**=he sees below or looks down upon infidels and hurls (**विध्यति**) them (into the deep abyss). **कर्ते? कर्त्रे ?** in order to oblige him who does obey Sōma's dispensation ? **विश्वा भुवनानि विद्वान्** = giving abundant wealth (to his devotees).

(299) त्वं नः सोम सुक्रतुर्वयोधेयाय जागृहि। क्षेत्रवित्तमो मनुषो वि वो मदे द्रुहो नः पाह्यंहसो विवक्षसे (१० २५/८) = हे सोम सुक्रतुः त्वं नः अस्मभ्यं वयः धनं तस्य देवाय दानाय जागृहि। मनुषः क्षेत्रवित्तमः त्वं नः अस्मान् द्रुहः अंहसः पाहि रक्ष.

वि वो मदे and **विवक्षसे** are words inserted into the 2nd half of every Ṛk of this Sūkta. **क्षेत्रं वेत्ति ददाति असौ क्षेत्रवित्.** Sōma is the greatest land-giver of i. e. to man (**मनुषः**). **जागृहि** = give. **गृ** (=to give) by reduplication **जागृ**. **जागृ + हि = जागृहि.**

(300) For 10 ९१/३ vide P. 116 No. 52.

सुक्रतू (मित्रावरुणौ) = possessed of wealth

(301) आ चिकितान सुक्रतू देवौ मर्त रिशादसा। वरुणाय ऋतपेशसे दधीत प्रयसे महे (५ ६६/१) = हे चिकितान मर्त मित्रावरुणौ सुक्रतू रिशादसा रिशादसौ भवतः। ऋतपेशसे महे महते प्रयसे वरुणाय मर्तः आदधीत.

चिकितान = हविषां दातर् = O thou that makest offerings ; **कित्** = to give. **रिशां धनं दत्तः तौ रिशादसौ. ऋतपेशसे महे महते**

प्रयसे प्रयस्वते वरुणाय हविः आ दधीत = one should make offerings to V. ऋतेन युक्तं पेशः यस्य = who possesses wealth added to wealth. प्रयसे = प्रयस्वते. प्रयस् = wealth.

(30: a) For 7 $\frac{61}{2}$ vide P. 120 No. 64.

(302) नपाता शवसो महः सूनू दक्षस्य सुक्रतू । सुप्रदानू इषो वास्त्वधि क्षितः (८$\frac{२५}{५}$) = शवसः बलवतः महः महतः दक्षस्य नपाता नपातौ सूनू सुक्रतू सुप्रदानू इषः वास्तु अधि क्षितः.

Daksha is mighty (शवसः = महः). Mitra and Varuṇa are his sons. सुप्रदानू = धनवन्तौ. सु = प्र = दानु = a gift. इषः = wealth. वास्तु = वास्तूनि = houses. अधिक्षितः = rule over (riches and houses).

सुक्रतवः (देवाः) = possessed of wealth

